28. Āyudhāni, 29. Kṣpaḥ, 30. Ahiḥ, 31. Akṣram, 32. Srotaḥ, 33. Tṛptiḥ, 34. Rasaḥ, 35.Udakam, 36. Payaḥ, 37. Saraḥ, 38. bheṣajam, 39. Sahaḥ, 40. Śavaḥ, 41. Yahaḥ, 42. Ojaḥ, 43. Sukham, 44. Kṣatram, 45. Āvayāḥ, 46. Śubham, 47. Yaduḥ, 48. Bhūtam, 49. Bhuvanam, 50. Bhabiṣyat, 51. Āpaḥ, 52. Mahat, 53. Vyoma, 54. Yaśaḥ, 55. Mahaḥ, 56. Sarṇîkam, 57. Sṛtîkam, 58. Satînam, 59. gahanam, 60. gabhîram, 61. gambharam, 62. īm, 63.Haviḥ, 64.Sadma, 65. Sadanam, 66. Ṛtam, 67. Yoniḥ, 68. Ṛtasya Yoniḥ, 69. Satyam, 70. Nîram, 71. Rayiḥ, 72. Sat, 73. Pūrṇaṃ, 74. Sarvam, 75. Akṣitam, 76. Barhiḥ, 77. Nām, 78. Sarpiḥ, 79. Apaḥ, 80. Pabitram, 81. Amṛtam, 82. Induḥ, 83. Hema, 84. Svaḥ, 85. Sargāḥ, 86. Śambaram, 87. Abhvam, 88. Bapuḥ, 89. Ambuḥ, 90. Toyam, 91. Tūyam, 92. Kṛpitam, 93. Śukram, 94. Tejaḥ, 95. Svadhā, 96. Vāri, 97. Jalam, 98. Jāmi, 99. Arṇam, 100. jalāṣam.(See Sarup, Part-III 2009: 4-5)

3. Ṛg.-Veda; -7-17-1
4. Ṛg.-Veda; 7-3-8-5
5. Ṛg -Veda; 2.1.18.5
6. It is the practice among the Hindus to offer water to god and their deceased parents after taking bath and on specific occasion.
7. Introduction to the *Amarakoṣa*, Commentary by *Kṣirasvāmi* (1913:9)
8. The *Brāhmaṇas*, dating from about 600 BC, are mainly the commentaries on the Vedic hymns, describing in detail the sacrificial ceremonial, and giving many curious explanations both linguistic and legendary of the origin and meaning of the ritual. Each *Veda* has its own *Brāhmaṇas*. The *Ṛg-Vedic Brāhmaṇs* include the *Aitareya Brāhmaṇa* (c.600 BC, the oldest of them all) and the *Asvālayana Brāhmaṇa*. The *Brāhmaṇas* of *Yajur-Veda* are the *Taittirīya Brāhmaṇas* and the *Śatapatha Brāhmaṇas*. The important *Brāhmaṇas* of the *Sāma Veda* are the *Prauda Brāhmaṇas,* the *Sāma-vidhāna Brāhmaṇa*, the *Adbhuta Brāhmaṇa* and the *Chhāndogya Brāhmaṇa.*The *Atharva Veda* has one *Brāhmaṇa* known as gopatha. (See Walker; vol.I, 1983: 166-167)
9. While the *Brāhmaṇas* of the *Veda* are the hymns and represent the *Karma-Kāṇḍa* or the ritual portion, the *Upaniṣads* are then known as *Jñāna- Kāṇḍa* or the knowledge portion. They are regarded as the philosophical and meditative portions of the *Veda.* The principal enquiry of the *Upaniṣads* is to identify the relationship of individual soul with the Universal Soul or Brahma. The *Upaniṣads* were composed in their present form between 400-200 BC. There are about 150 'major' *Upaniṣads* but 108 have acquired wider traditional acclamation. The *Ṛg-Vedic Upaniṣads* are *Aitareya* and *Kauśitaki Upaniṣad*. The *Yajur-Vedic Upaniṣads* are *Bṛhadāraṇyaka*, *Isā*, *Taittirīya, Svetāsvatara, Maitrāyan*i and *Kaṭhopaniṣad*. The Sāma-vedic *Upaniṣads* are Chhāndogya and Kenopaniṣad. The Atharva-Vedic *Upaniṣads* are *Muṇḍaka, Māṇḍukya* and *Praśna*. Besides them, there are a number of lesser *Upaniṣads* were composed along with the old *Upaniṣads* in later periods. They mainly expound teachings of one or other of the 'schools' of philosophy, or propagate the virtues of a particular sect or deity and some of them critical about the contents of the *Veda* and *Upaniṣads*. (See: Rādhākrishnan 1953: 24; Also see Walker, Vol-II, 1983: 530-535).
10. *Śatapatha-Brāhmaṇa*: 6.50.7

11. *Taittirīya-Saṁhitā* 1.2.1
12. Śatapatha-Brāhmaṇa, 6.8.2.3
13. Śatapatha-Brāhmaṇa, 1.6.3.2.3
14. Śatapatha- Brāhmaṇa, 9.1.6.1
15. Aitareya-Upaniṣad, 1.2 and 1.3
16. Aitareya-Upaniṣad, 1.4
17. Bṛhadāraṇyaka -Upaniṣad, .2.1 and 1.4.3
18. Chhāndogya-Upaniṣad 5.2
19. Baartmans 1990:.271
20. *Purāṇa*, means 'ancient', refers to a class of Sanskrit writings primarily deals the subjects of *itihāsa*, (Epics), a part of the *smṛti* (non-Vedic scriptures). It is known as 'the *Veda* of the common folk', since the *Purāṇas* present much traditional materials through myth and legend, story and symbol. Much of the materials from the earlier scriptures have included in their contents but the date of their composition is estimated from sixth century (*Vāyu-Purāṇa*) to sixteenth century AD (*Vāmana-Purāṇa*). From the point of contents, these *Purāṇas* contain the accounts of (a) the creation of the universe, (b) the genealogy of the gods and *ṛshis*, (c) the rule of the *manus*, (d) the destruction of the universe, and its recreation, with the history of mankind, and (e) dynastic legends of the Solar and Lunar dynasties. There are eighteen great *Purāṇas*, called *Mahā-Purāṇas* and eight to eighty-eight lesser *Purāṇas* (*Upa-Purāṇas*). The names of eighteen great *Purāṇas* are: 1. *Viṣṇu Purāṇa*, 2. *Nārada Purāṇa*, 3. *Bhāgavata Purāṇa* or (*Śrīmad Bhāgavatam*), 4. *Garuḍa Purāṇa*, 5. *Padma Purāṇa*, 6. *Varāha Purāṇa*, 7. *Matsya Purāṇa*, 8. *Kūrma Purāṇa*, 9. *Liṅga Purāṇa*, 10). *Vāyu Purāṇa*, 11. *Skanda Purāṇa*, 12. *Agni-Purāṇa*, 13. *Brahma-Purāṇa*, 14. *Brahmāṇḍa-Purāṇa*, 15. *Brahma-Vaivasvata Purāṇa*, 16. *Mārkaṇḍeya-Purāṇa*, 17. *Bhaviṣya-Purāṇa* and 18. *Vāmana-Purāṇa*.
21. *Liṅga-Purāṇa* 103, 42-45,
22. *The Mahābhārata*, 1.15.5-13; 1.16.1-40; 1.17.1-30
23. *Skanda-Purāṇa* 3.3, 7.20
24. *Liṅga-Purāṇa* 12.30-31
25. *Vāyu- Purāṇa* 2.2, 2.8, *Bhāgavata Purāṇa* 5.17; *Kūrma Purāṇa* 1.44, 28-33,
26. (i) Vais Subh IV.2, quoted from *Kalātattvakoṣa* Vol.III, P.336, (ii) *Tarka-Saṅgrah* of Annam Bhaṭṭa (1976:8); also see *Tarka-Bhāṣā* of Sri Kesava Mishra, by V. Siddhāntaśiromaṇi, (1963).
27. Susam Sastha-II.33 quoted from *Kalātattvakoṣa* Vol.III, P.339
28. Ṛg-Veda I.23-22
29. See the footnote of the *Vāyu-Purāṇa*, Part-I, Chapter-47 (1987:307)
30. The *Brahmavaivarta- Purāṇa –Gaṅgopākhyāna*, Ist Chapter; *Bṛhannāradīya Purāṇa* –7th and 8th chapter, Rāmāyaṇa – Bālakāṇḍa –38

31. *Brahmavaivarta-Purāṇa*, *Prakṛti Khaṇda*, *Gaṅgopākhyān*, Chapter-1, *Śloka* (verse)- 26

32. The *Skanda-Purāṇa*, *Kāśikhaṇḍa-Gaṅgā Daśaharā Stotra*, Chapter-4, *Śloka* (verse)- No. 18-21

33. *Gaṅgā Lahari*, by Pt. Jagannath, English Translation by Irma Schotsman (1999)

References

1. *Agni-Purāṇa*, translated by N Gangadharam, (1998) Delhi. Motilal Banarasidass
2. *Aitareya-Brāhmaṇa* of the *Ṛg-Veda*, Edited and translated by Sudhakar Malaviya (1983) Varanasi: Tara Printing Works,
3. *Amarakośa*, Commentary by Kṣirasvāmi, (1913) Poona: D. G. Khandekar
4. Baartmans, F. (1990) "Āpaḥ": the Sacred Waters, Delhi, B.R.Publishing Corporation
5. *Bhāgavata-Purāṇa*, Vol.8,pt.III, Translated by G.V.Tagare, (1986) (reprinted). Delhi: Motilal Banarasidass.
6. *Brahma-Purāṇa*, translated and annotated by a Board of Scholars, (1986), Delhi, Motilal Banarasidass,
7. *Gaṅgā-Lahari* by Pt. Jagannath: English Translation by Irma Schotsman, (1999) Delhi: Nag Publishers
8. *Kalātattvakoṣa*, Vol.III, Edited by Bettina Baumer (1996), New Delhi, Indira Gandhi National Centre for the Arts and Motilal Banarasi Dass
9. *Kūrma-Purāṇa*, translated by Ganesh Vasudeo Tagare, (1981) Delhi: Motilal Banarasidass,
10. *Manu Smṛti*, Vol.I, Edited by J.H.Dave, (1972) Bombay: Bharatiya Vidya Bhawan,
11. *Mārkaṇdeya Mahāpurāṇam*, edited by Dharmendranath Shastri, (1983) Meerut: Sahitya Bhandar,
12. *Nārada-Purāṇa*, translated, annotated by Ganesh Vasudeo Tagare and Hemendra Nath Chakravarty (2008)Delhi: Motilal Banarasidass.
13. *Padma Purāṇa*, translated by N.A.Deshpande, (1989), Delhi: Motilal Banarasidass,
14. *Purāṇo Me Gaṅgā* (In Hindi), Edited by D. S.Dube (1995) Allahabad: Hindi Sahitya Sammelan (2nd Edition).
15. Rādhākrishnan, S. (1953), The Principal Upaniṣads. London: George Allen & Unwin Ltd
16. Rai, S. (1993), Kumbha Melā, Varanasi: Ganga Kaveri Publishing House,
17. Sarup, Lakshman, 2009 (Reprint), The *Nighaṇṭu* and the *Nirukta*, Delhi: Motilal Banarasidass (1967).
18. *Śatapatha Brāhmaṇa*, translated by Max Muller, (1972) Delhi: Motilal Banarasidass (Reprint)
19. *Tāṇḍya-Brāhmaṇa*, Edited by Chinnaswami Shastri and Pattabhiram Shastri (1987) Varanasi: Chawkhamba Sanskrit Sansthan

20. *Tarka-Bhāṣā* of Sri Keśava Mishra, Edited by V.Siddhantashiromani, (1963) Varanasi : Chawkhamba Sanskrit Series

21. *The Mahābhārat*, Edited by R.N.Dandekar (1964), Poona: Bhandarkar Oriental Research Institute,

22. *Tristhalisetu* of Narayana Bhatta, Edited by Ganesh Shastri Gokhale (1915), Poona: Anandasharma Press

23. *Vāyu-Purāṇa*, Translation by G.V.Tagare (1987), Delhi: Motilal Banarasidass,

24. Walker, Benjamin (1983), Hindu World: An Encyclopaedic Survey of Hinduism, Vol I &.II, Delhi: Indus

* The author humbly thanks Prof. Banamali Biswal. Prof. Braja Kishore Swain and Prof. Jagannath Pathak for helps in interpretation of original Sanskrit texts. However, the author owes responsibility to any misconception if lies in the paper.

❑❑❑

मीमांसाशास्त्रस्य परिचयः

किशोरनाथ झा

(The present paper introduces the मीमांसाशास्त्र known as science of interpretation. It is a matter of great concern today that this particular शास्त्र is going into oblivion day - by - day as the scholars knowing this शास्त्र are being placed in rarest category. The शास्त्र is almost disappearing from the syllabus of both traditional as well as modern trends. Thus, this paper is very important as a common student can understand the aim of this शास्त्र as it deals with the procedureal details (इतिकर्तव्यता) of vedic knowledge. The concepts such as अतिदेश, ऊह, बाध, समुच्चय, तन्त्रावाप and प्रसङ्ग etc. are well explained in this paper with definitions and examples. It is worth-mentioning here that the paper is the gist of the extension lecture delivered in the compus by the learned author.)

वेदवाक्यानामर्थनिर्धारणाय लघूपायस्तर्क एव मीमांसा। पारस्करगृह्यसूत्रं स्फुटमभिलपति - 'विधिर्विधेयस्तर्कश्च'। अत्र विधिपदेन वेदस्य ब्राह्मणभागः विधेयेन मन्त्रभागस्तथा तर्केण मीमांसाशास्त्रं विवक्षितमस्ति। यतो हि वेदवाक्यमवलम्ब्य मीमांसाशास्त्रं प्रवर्तते। अतः प्रसिद्धदार्शनिकः वाचस्पतिमिश्रस्तात्पर्यटीकायामभिदधाति यथा मेरूपमे लवणे यदि सूक्ष्मं काष्ठखण्डं सम्मिलितं भवत् लवणत्वं प्रपद्यते तथा वेदविचार एव निमग्नः मीमांसासंज्ञकस्तर्कः वेदत्वं भजति-

मीमांसासंज्ञकस्तर्कः सर्वो वेद समुद्भवः।

सोऽतो वेदो रुमाप्राप्तकाष्ठाम्बुलवणाब्धिवत्।।'

पुराकाले ब्राह्मणग्रन्थानामुपदेशेनाभिमतधर्मसूत्राणां निर्देशेन च सर्वथा परिचितोऽभिज्ञ-समाजः कुलपरम्परयैव सर्वथा कर्मकाण्डपरिपालने तत्पर आसीत्। पश्चात् परिवर्तिते समये कर्मकाण्डं प्रति निरादरभावोदये सति कर्मकाण्डं ह्रासतामगच्छत्। धीधनेषु पारस्परिकं विवादं वैमत्यं च वीक्ष्याभिजातवर्गेषु कर्मकाण्डं प्रत्यविश्वास उत्पाद्यत। फलत एतादृशं विवादं निराकर्तुं यागदानहोमादिकर्मसु निष्प्रमादां प्रवृत्तिं विधातुं च सुव्यस्थितस्य प्रामाणिकस्य सर्वसम्मतस्य चोपायस्यान्वेषणे सति परिणामतया मीमांसाशास्त्रमुदभूत्। जैमिनिमहर्षिः मीमांसासूत्रं निर्माय धार्मिकसमाजं न केवलं पथभ्रष्टतः कर्तव्यच्युतेरक्षत्

अपितु वैदिककर्मकाण्डे प्रवृत्तये वेदवाक्यार्थावबोधाय च प्रामाणिकीं प्रक्रियामपि निरदिशत्। अत्र द्वादशस्वध्यायेषु वेदवाक्यानामर्थबोधाय व्याख्यानाय च पद्धतिरस्ति निर्दिष्टा। अतः द्वादशलक्षणीति नामान्वर्थं मीमांसायाः प्रसिद्ध्यति। सूत्रकृतः समये विवादविषया सहस्रमिता आसन्निति तन्निर्णयार्थं प्रवृत्तस्य शास्त्रस्य सहस्राधिकरणीत्यपि नाम्ना सुधीषु प्रसिद्धिरभूत्।

यद्यपि मीमांसाशास्त्रं विंशत्यध्यायेषु परिपूर्णं विद्यते। तत्रान्तिमाः चत्वारोऽध्यायाः उत्तरमीमांसाशास्त्रतया प्रथन्ते येषु ज्ञानकाण्डात्मकस्य वेदस्यार्थादुपनिषदः विचार उपनिबद्धः। षोडशाध्यायाः कर्मकाण्डस्य यागहोमदानादिविधायक-वेदवाक्यानामर्थनिर्धारणप्रक्रियां निर्दिशन्ति।

त्रयोदशतः षोडशाध्यायं यावत् चत्वारोऽध्यायाः दैवतकाण्डतया प्रथन्ते मात्र विचारः क्रमबद्धोऽपितु संकीर्णः विश्रृङ्खलश्चेति संकर्षकाण्डतयाप्यभिधीयन्ते।

अत्र द्वादशलक्षण्याः परिचयं प्रस्तोतुकामोऽहं भवतां समक्षमुपस्थितोऽस्मि। वेदवाक्यानामर्थनिर्धारणस्य प्रक्रियामुपदिशदिदं मीमांसाशास्त्रं वाक्यशास्त्रत्वेनाप्यभिहितं भवति।

यद्यप्यनादिकालादेव मीमांसापदप्रयोगं पश्यामस्तस्मात् सप्रमाणं प्राचीनत्वमस्य शास्त्रस्याकलयामः। तैत्तिरीयारण्यके 'सैवानन्दस्य मीमांसा भवति [2]' इति दृश्यते। छान्दोग्योपनिषदि समेत्य मीमांसां च बुद्ध[3] इत्युपलभ्यते। मैत्रायणीसंहितायां, काठकसंहितायां, शांखायनब्राह्मणे, ताण्ड्यमहाब्राह्मणे, शतपथब्राह्मणे मीमांसापदस्य प्रयोगा उपलभ्यन्ते। सुचरितमिश्रस्तु काशिकायामारम्भे प्राह- 'ब्रह्ममहेश्वरो वा मीमांसा-प्रजापतये प्रोवाच। प्रजापतिरिन्द्राय इन्द्र आदित्याय इत्येवमादि। क्रमममुं पार्थसारथिमिश्र एवमग्रे सारयति-' स चार्थादादित्यश्च वसिष्ठाय, सोऽपि पाराशराय, पाराशरः कृष्णद्वैपायनाय, सोऽपि जैमिनये' इत्यादि। तथापि सुश्रृङ्खलं सुव्यवस्थितं च स्वरूपं शास्त्रस्यास्य महर्षिणा जैमिनिना सूत्राणि निर्माय विहितमिति निर्विचिकित्सं वक्तुं शक्यम्। सूत्रनिर्माणात् प्राक् मीमांसापदार्थाः विश्रृङ्खलाः विकीर्णाश्च तज्ज्ञानां मुखपरम्परायामासन् यतोहि शास्त्रस्यास्य चिन्तनधाराऽनादिकालात् प्रवहति। अतः विभिन्नानामृषीणां चिन्तनपराणामवदानं नामोल्लेखपुरस्सरं सूत्रेषु जैमिनिमहर्षिणोपनिबद्धमिति सूत्रकालादपि प्राचीनत्वं साधयत्यस्य शास्त्रस्य। एषु आत्रेयः , ऐतिशायनः, कामुकायनः, कार्ष्णाजिनिः, वादरिः, वादरायणः, लावुकायनः, आश्मरथ्यः सन्त्युल्लिखिताः मीमांसासूत्रेषु।

यद्यपि सूत्रवृत्तिकर्तुः भर्तृमित्रस्य उपवर्षस्य, भवदासादेश्चावदानं समुल्लेखनीयं विद्यते तथापि खीष्टपूर्वप्रथमशतकीयस्य शवरमुनेः भाष्यमवाप्य शास्त्रमिदं वैशद्यं, परिणाहमत एव पूर्णाङ्गतां च प्राप्नोदिति तथ्यम्।

भाष्यस्य परवर्तिन आचार्यः पारस्परिकचिन्तनभेदेन मीमांसाशास्त्रिषु सम्प्रदायेषु व्यभजन्। भट्टकुमारिलः प्रभाकरमिश्रः मुरारिमिश्रश्चाविद्यन्त स्व-स्व-सम्प्रदायप्रवर्तकाः। तस्मात् शास्त्रस्य निरन्तरता निर्बाधमनादिकालादेव प्रमाणिता भवति। विद्यासागरस्य गङ्गानाथझा-महाशयस्य दृष्ट्या प्रभाकरमिश्रः शवरस्वामिविचारेण नैकट्यमधिकं बिभर्ति व्याख्याप्यस्य सरला किन्त्वनुगामिनामस्य संख्याऽपेक्षाकृतं स्वल्पा विद्यते। शालिकनाथमिश्रः नन्दीश्वराचार्यः रामानुजाचार्यश्च प्रभाकरमतसंरक्षणे सन्ति बद्धपरिकराः।

भट्टकुमारिलस्यानुगामिनोऽधिकाः सन्ति। मण्डनमिश्रः, उम्वेकः वाचस्पतिमिश्रः, सुचरितमिश्रः,

पार्थसारथिमिश्रः, परितोषमिश्रः, भट्टसोमेश्वरः, भवदेवः, खण्डदेवोऽन्ये च भट्टसम्प्रदायस्य संपोषकाः सन्ति कुमारिलप्रभाकरयोः समसामयिकतामेव मनुते सुधीसमुदायः। यतोहि नैकस्याः कृतेर्विचारस्य वा खण्डनमण्डनेऽपरत्र समुपलभ्येते किन्तु विद्यासागरः गंगानाथझामहाशयः प्राभाकर स्कूल ऑफ पूर्वमीमांसानाम्नि स्वकीये शोधप्रबन्धे प्रभाकरमिश्रं भट्टकुमारिलतः पूर्वभवं मनुते प्रमाणमपि तत्रास्ति तेन प्रस्तुतम्।

उदयनाचार्यः गङ्गेशोपाध्यायश्च निजकृत्यो प्रभाकरविचारं खण्डयति। कुसुमाञ्जलावभिहितम् 'गुरुमतमेतत् न तु गुरोर्मतम्'। अत्र प्रथमं गुरुपदमनादरे समस्तं सत् प्रभाकरं संकेतयति। तत्त्वचिन्तामणौ संकल्पश्लोकांशो विद्यते-

'अन्वीक्षानयमाकलय्य गुरुभिर्ज्ञात्वा गुरूणां मतम्' इति अत्र षष्ठीबहुवचने प्रयुक्तं गुरुपदं प्रभाकरं संकेतयति।

तृतीयसम्प्रदाय-प्रवर्तकस्य मुरारिमिश्रस्य मतमपेक्षाकृतं नवीनम् स्वसमये प्रतिष्ठितमपि नालभत विवृद्धिं समृद्धिञ्च 'मुरारेस्तृतीयः पन्थाः' इति सूक्त्या प्रसिद्धत्यस्य सम्प्रदायः। 'त्रिपादीनीतिनयनमितिकृतिश्चास्य समवाप्नोत् ख्यातिम्। अस्य सम्प्रदायस्याध्ययनाध्यापनयोरप्रचलितयो विकासोऽवरुद्धश्चिरात् परतः प्रामाण्यस्थापने नव्यनैयायिकैः मतमस्य निराकृतं वैशद्येन। तस्माद् लब्धप्रतिष्ठमासीदस्य तदानीमेतन्मतमिति तर्कयते।

मीमांसाया व्याख्याप्रक्रिया अधिकरणप्रणाल्या प्रचलति। अधिकरणं पञ्चभिरङ्गैः परिपूर्णतामेति। विचार्य विषयस्तमधिकृत्य संशयस्तत्र पूर्वपक्ष उत्तरपक्षः सङ्गतिश्चेति तदङ्गानि-

विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरः।

संगतिश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतम्।

प्राचीनाः मीमांसकास्तु किञ्चिद् विपरिवर्त्य पञ्चाङ्गान्यधिकरणस्याङ्गीकुर्वन्ति। तथा हि तन्मतम्-

विषयो विशयश्चैव विचारो निर्णयस्तथा।

प्रयोजनं च पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतम्।।इति।

विचारस्याधारशिलायामस्यामेवाधिकरणप्रणाल्यां कस्यापि वेदवाक्यस्य विवादः द्वादशलक्षणी निर्दिष्टयुक्तिसहकारेण उपक्रमोपसंहारादिविधिभिश्च तात्पर्यनिर्णायकोपायैः निर्णयपथमारोहति-

उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्।

अर्थवादोपपत्तीच लिङ्गतात्पर्यनिर्णये।।

इति प्राचीनं पद्यं स्मरणीयम्।

अधिकरणमिदं बहुत्र न्यायपदेनापि संलप्यते। अत एव मीमांसान्यायप्रकाशः न्यायरत्नाकरः न्यायकणिकादिश्च मीमांसाग्रन्थानामभिधानं विश्वजिन्न्यायादिश्चाधिकरणनामसंगतिमितः। नात्र परार्थानुमानस्य पञ्चावयवात्मकस्य न्यायशास्त्रानुमतस्य भ्रमः पालनीयः न्यायपदं वीक्ष्य। नीयते प्राप्यते

विवक्षितार्थसिद्धिरनेननेति न्यायपदव्युत्पत्तिस्तु न्यायमीमांसाशास्त्रयोः न्यायपदस्य संगच्छत एव। उभायत्र प्रक्रियाभेदेऽपि नाम साम्यादेकस्यैव कार्यस्य सम्पादकत्वात्। एकोऽधिकरणा-त्मकन्यायोऽपरस्तु कार्यकारणभावभित्तौ विद्यमानोऽनुमानोऽङ्गोऽपि प्रमाणचतुष्टयसम्पन्नः। उभयत्रावयवसंख्यायां साम्येऽपि अवयवानां स्वरूपगतो भेद आकलनीयो भवति।

इदमत्रावधेयम् वेदाध्ययनसमाप्तौ सत्यां स्नातकस्य कृते मार्गहृदयमपिहितं भवति। कृतदारः गृहस्थधर्मं पालयतु अथवा धर्मज्ञानस्योत्कर्षलाभाय गुरुकुले स्थितः सन् वेदार्थस्यानुसन्धानालोचनयोरात्मा समर्पयितव्य इति। बृहती कथयति - अधीते वेदे हृदभिदमापतति गुरुकुलं च समावर्तितव्यम् वेदवाक्यानि च विचारयितव्यानि। तत्र गुरुकुलान्मा समावर्त्ति कथं नु वेदवाक्यानि विचारयेत् इत्येव व्यर्थोऽयमुपदेश इति।[4]

अयमभिप्रायः- धर्मज्ञानाय वेदार्थानुसन्धाने प्रवृत्तस्य मीमांसाशास्त्रं सदैव सहकर्तुमात्मानं प्रस्तौति-

'धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनम्।' इतिश्लोकवार्त्तिकपंक्तिरुपर्युक्तं समर्थयति।

वेदात्मकप्रकृष्टसाधनेन धर्मस्य परिज्ञाने मीमांसाशास्त्रमितिकर्तव्यतां सम्पादयति-

धर्मे प्रमीयमाणे हि वेदेन करणात्मना।

इतिकर्तव्यता भागं मीमांसा पूरयिष्यति।।

इति श्लोकवार्त्तिकं स्फुटमभिदधाति। तस्मात् वेदस्याध्ययनेन तदर्थज्ञानार्जनं प्रत्येकं व्यक्तेः कर्तव्यः भवति। तस्मात् कर्तव्याकर्तव्यज्ञानं संपद्यते। लोकव्यवहारः परलोकसाधनं च सिद्ध्यति ततः। 'या लोकद्वयसाधनी चतुरता सा चातुरी चातुरी' इति प्रसिद्ध्यति।

शास्त्रमाहात्म्यकीर्तनातन्तरमधुना शास्त्रप्रतिपाद्य-परिचयोऽत्रापेक्ष्यते। किं स्वरूपोऽत्र धर्मः किं चात्र प्रमाणमिति मीमांसा-द्वितीयसूत्रे प्रतिपादितं विद्यते संक्षेपण -

1. अत्र विषयः धर्मलक्षणं तत्प्रामाण्यं च,

2. धर्मस्य लक्षणं तत्प्रामाण्यं च भवितुमर्हति न वेति विप्रतिपत्तिः,

3. धर्मस्य मानवबुद्धिगम्यत्वाभावात् लक्षणं नैव भवितुमर्हति, तर्हि कुतः प्रामाण्यमिति पूर्वपक्षः।

4. सत्यं धर्मे मानवबुद्धिगम्यत्वं नास्ति तथाप्यलौकिकसाधनेन वेदेन तस्य लक्षणं भवितुमर्हतीत्युत्तरपक्षः। आत्मकल्याणाय कर्तव्यताप्रवर्तक उपदेशो हि धर्मः। 'चोदना चोपदेशश्च विधिश्चैकार्थवाचिनः[5]' इति श्लोकवार्त्तिकमभिदधाति। चोदनाविधिवचनं लक्षणं स्वरूपं यस्य तादृशः अर्थः लौकिकाभ्युदयनिःश्रेयसोरिष्टयोः साक्षात् फलद्वारा वा साधनं विहिताचरणं धर्मो भवति। एतावतैवानर्थस्य प्रत्यवायस्य साधने निषिद्धाचरणे साक्षात् परम्परया वा संबन्धाभावोऽपि परिज्ञायते। तस्मात् धर्मपदेन विधिबोधितकर्तव्याचरणमभिप्रेतमिति। वेदबोधितत्वे सति साक्षात् फलद्वारा वा यदनर्थाननुबन्धीष्ट साधनं च स धर्म इति तल्लक्षणे भवति। धर्मश्चायमत्र कर्मस्वरूपः। प्रवर्ततामिति फलतोऽपि यत्कर्म नानर्थेनानुबध्यते-

केवलप्रीतिहेतुत्वात् तद्धर्म इति गीयते।।[6] इति

श्लोकवार्तिकम् धर्मपदमधर्मस्याप्युपलक्षणम्। त्याज्यतयाऽधर्मोऽपि जिज्ञास्यो अधर्मः भवति। अनिष्टसाधनेनानर्थेन पापकर्मणा साक्षात् फलद्वारा वा संबद्धो भवति। फलतः निषिद्धं कर्माचरणं वा अधर्मो भवति। न्यायदर्शनसम्मतं शुभाशुभाचरणजन्यं पुण्यात्मकं पापात्मकं वा अदृष्टं धर्माधर्मपदाभ्यां नात्राभिप्रेतम्। न चात्र वेदविहितयागादिकर्मानुष्ठानतः समुत्पन्नाः विशेषप्रकारिकान्तःकरणवृत्तिः सांख्यदर्शनानुमतः धर्मस्य तद्विपरीतश्चाधर्मः, वा वासनाविशेषः पुद्गलो वा बौद्धजैनदर्शनयोरनुमतः धर्मः स्वीक्रियते। लोकव्यवहारे सदाचरणसंपन्न एव धार्मिकत्वेनाभिहितो भवति। तस्मात् क्रियारूपो धर्मः-

अन्तःकरणवृत्तौ वा वासनायां च चेतसः।

पुद्गलेषु च पुण्येषु नृगुणेऽपूर्वजन्मनि।।[7]

प्रयोगो धर्मशब्दस्य न दृष्टो न च साधनम्।

पुरुषार्थस्य ते ज्ञातुं शक्यते चोदनादिभिः।।[8]

अन्यत् साध्यमदृष्टैव यागादीननुतिष्ठतः।

धार्मिकत्वसमाख्यां तद्योगादिति गम्यते।।[9] इति श्लोकवार्तिकम् अभिलपति।

धर्माद्यतीन्द्रियार्थस्यावबोधनसामर्थ्यं विधिवाक्यात्मिकायां चोदनायामेव शब्दप्रमाणे विद्यते न तु प्रत्यक्षादिप्रमाणान्तरेषु। शवरस्वामी भाष्ये स्फुटं भाषते- 'चोदना हि भूतं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवं जाती कमर्थं शक्नोत्यवगमयितुं नान्यत् किञ्चनेन्द्रियम्' इत्यादि।

प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते।

एनं विदन्ति वेदेन तस्मात् वेदस्य वेदता।।

इति कृष्णयजुर्वेद-भाष्य-भूमिकायां सायणाचार्यः समर्थयति परिपुष्णाति च भाष्यकृतम्। तस्मात् विधिवाक्यमेव धर्मस्य ज्ञापकतया प्रमाणं भवति लौकिकमन्यत् प्रमाणजातं नात्र प्रभवति।

तस्माद् द्वितीयं सूत्रं धर्मस्वरूपं तत्प्रामाण्यं स्फुटमभिदधातीति सिद्धम्। द्वयमेकेन सूत्रेण श्रुत्यर्थाभ्यां निरूप्यते।

"स्वरूपेऽपि च तस्योक्ते प्रमाणं कथ्यतेऽर्थतः"[10] इति श्लोकवार्त्तिकम् अभिधया धर्मस्वरूपमर्थस्याक्षेपेण तत्प्रमाणं परिज्ञायते द्वितीयसूत्रतः।

विधिः

यतोहि वैदिकानि यागहोमदानादिकर्माणि विधिवाक्यानुसारेणैवानुष्ठीयन्ते। अतः विधेः साङ्गोपाङ्ग परिचयोऽपेक्ष्यते। लौकिक-प्रमाणैः पूर्वत अज्ञातं श्रेयः साधनस्य बोधकं वेदवाक्यं विधिर्भवति। लिङ्, लेट्, लोट् त्वायानीयादिप्रत्ययेभ्योऽस्य विधेर्विधानं दृश्यते। फलतः प्रवर्तनयाऽर्थात् अयमत्र प्रवर्ततामिति बुद्ध्या वेदेष्वभिहितं वाक्यजात विधिर्भवति। यथा लोके-गामानय, इति लौकिकवाक्यं श्रुत्वा श्रोता गामानेतुं प्रवर्तते एवं गां नय इति श्रुत्वा श्रोता ततः गामपसारयति इति। यथा-

लिङ्घटितवाक्याद् ज्ञायते तथैव 'अग्निहोत्रं जुहूयात्' इति वेदवाक्यात् अग्निहोत्रयागे लोकस्यार्थात् यजमानस्य प्रवृत्तिर्भवति। लोके प्रवर्तनापरपर्याया भावनाऽर्थात् क्रिया वक्तृनिष्ठा भवति। वेदस्यापौरुषेयत्वेन सा प्रवर्तना वक्तृपुरुषनिष्ठा भवितुं नार्हति। अतः लिङ्-प्रत्यय-घटितपद एव सा प्रवर्तना भावना स्वीक्रियते। भवितुर्भवनानुकूलः भावकस्य कर्तुः प्रयोजकस्य वा व्यापारविशेषः भावनापदेन बोध्यते। तस्याः द्वौ प्रकारौ विद्येते शाब्दी आर्थी चेति। यजेत इत्यत्रांशद्वयं विद्यते यजधातुः त-प्रत्ययश्च। पुनः प्रत्ययेऽप्यंशद्वयम् लिङ्त्वमाख्याततत्वं च। सत्यप्यत्र ज्ञानं भवति। लिङ् स्थाने आदिष्टेनैव ज्ञायते अपितु धर्मस्तस्य ज्ञानं भवति। लिङः स्थाने आदिष्टे त-प्रत्यये स्थानिगतो धर्मः लिङ्त्वमनुवर्तते आख्याततत्वधर्मस्तु स्वगत एव विद्यते। फलतः 'यजेत' पदेन धात्वर्थस्य यागक्रियायाः बोधो भवति। यागस्तु विहितदेवताविशेषमुद्दिश्य विहित-द्रव्यस्य त्यागात्मको भवति। अत्र त-प्रत्ययार्थः भावना भवति सा च व्यापारात्मिका। वैयाकरणभूषणसारे अभिहितम्।

'व्यापारो भावना सैवोत्पादना सैव च क्रिया' इति। पूर्वमुक्तमिहास्याः द्वैविध्यम्। साक्षाद्व्यापारः प्रयत्नात्मकः। यथा यागसामग्र्याः संग्रहः ऋत्विग्वरणादिश्च यजमानः स्वयं सम्पादयति। येन व्यापारेण पुरुषस्यार्थाद् यजमानस्य फलमुपपद्यते स्वर्गाद्यपूर्वद्वारेण। तस्मादार्थी भावनेयम्। अर्थ्यते इष्यते पुरुषेणेति अर्थः फलं प्रयोजनम्। तत्प्रयोजकत्वादियमार्थीभावना।

पारम्परिकव्यापारत्वं शाब्दीभावनायां विद्यते। शाब्दीभावना यजमानं प्रेरयति भागं विधातुम्। एवं कर्तव्यम् एवं करणेन स्वर्गादीप्सितं फलं लब्धुं शक्यते। अपौरुषेयं वेदपदमेवात्र प्रवर्तकं भवति। अतः वैदिकशब्दनिष्ठा भावना शाब्दीभावनारूपेणाभिधीयते।

उभयत्र भावनायामंशत्रयं विद्यते साध्यं साधनमितिकर्तव्यता च। विधिवाक्यश्रवणानन्तरमेव जिज्ञासा जायते किं भावयेत् केन भावयेत् कथं भावयेदिति। शाब्दीभावना तु पुरुषप्रयत्नरूपामार्थीभावना-मुत्पाद्य कृतार्थो भवति। तया साध्याकांक्षा किं भावयेदितिरूपा निवर्तते। कथं भावयेदिति रूपेतिकर्तव्यताकांक्षा तु अर्थवादवाक्यबोध्य प्राशस्त्यादिना निवर्तते इत्यर्थसंग्रहे लौगाक्षिभास्करः, आर्थीभावनया इतिकर्तव्यता चाङ्गं प्रयोजनादिं प्रधानभागस्य दर्शपौर्णमासादेः अनुष्ठायां पूर्णाङ्गिं भूत्वा संपद्यते।

विधिरयं स्थूलदृष्ट्या चतुर्धा विभज्यते उत्पत्तिविधिः, विनियोगविधिः, अधिकारविधिः प्रयोगविधिश्चेति।

उत्पत्तिविधेः पुनरवान्तरविभागः पञ्च प्रकारैः सम्पद्यते। कर्मोत्पत्तिवाक्यम्, गुणवाक्यम्, फलवाक्यम्, फलगुणवाक्यम् सगुणकर्मोत्पत्तिवाक्यम्। येन वाक्येन कर्म विधीयते तदाद्यम्। यथा अग्निहोत्रं जुहुयात् इति वाक्येन कर्मणः विधानम्। येन वाक्ये द्रव्यं विधीयते तद्गुणवाक्यम् यथा 'दध्ना जुहोति'। कर्मफलं यत्र स्फुटं निर्दिष्टं तत् तृतीयं फलवाक्यम्।

यथा 'स्वर्गकामोऽग्निहोत्रं जुहुयात्'। स्वर्गरूपफलस्य निर्देशोऽत्र स्फुटमेव विद्यते। विशेषफलावाप्तये विशेषद्रव्ये होमस्य विधानम् फलगुणवाक्यं भवति 'दध्नेन्द्रियकामो जुहुयादिति वाक्यम्। सहायकद्रव्येण सह कर्मणो विधानम् सगुणोत्पत्तिवाक्ये भवति। सोमेन यजेतेति अस्मिन् वाक्ये सहायकद्रव्येण सोमेन भागस्य ।विधानं दृश्यते।

उत्पत्तिविधिभ्यो भिन्नेषु विधिवाक्येषु अङ्गप्रधानाभाव विवेचकं विनियोगविधितयाभिप्रेतम् फलतः विधिवाक्येषु अङ्गत्वबोधनं विनियोगविधिः। 'अग्निहोत्रं जुहोतीति वाक्यं प्रधानं कर्म प्रागेवाग्निहोत्रभागं निर्दिशति। अत्र दध्ना जुहोति इति वाक्यं दध्नि होमस्याङ्गतामुपदिशति। अतः दध्ना जुहोतीति वाक्यं विनियोगविधिः। तृतीयाध्याये विचारोऽस्य सविशदं विहितः सूत्रभाष्यतद्व्याख्यातृभिः। प्रथमाध्याये धर्मविचारः द्वितीयाध्याये उत्पत्तिविधिविचारस्तु प्रागेव समजायत।

प्रयोगविधौ प्रधानभागस्यानुष्ठानकाले संबद्धाङ्गकर्मणां यथास्थानं यथाकालमनुष्ठानमपेक्षितं भवति। एतदर्थमङ्गकर्मबोधकविधिवाक्यैः सह प्रधानविधिवाक्यस्यैकवाक्यताऽपेक्ष्यते। एवंरीत्याऽङ्गप्रधानविधिवाक्यानां समष्ट्यात्मकमहावाक्यतोऽवधारितार्थनामनुष्ठेय-कर्मणां बोध अदनुष्ठानं च प्रयोगविधिः पञ्चमाध्याये वैशद्येनोपपादितमस्ति। अर्थसंग्रहेऽभिहितं प्रयोगप्राशुभावबोधको विधिः प्रयोग विधिरिति। प्राशुभावेन शीघ्रताऽभिप्रेता। अविलम्वेनाङ्गप्रधानकर्मणोरनुष्ठानेन सहभावरूपं साहित्यमुपद्यते। अन्यथा साहित्यस्यानुपपत्तिः स्यात्। नियतक्रमेण विना अविलम्बोऽनुष्ठानेनैव संभवति। अतः प्रयोगविधिः स्वोपयोगितासिद्ध्यै विधेयपदार्थानां विशेषणरूपेण क्रमस्यापि विधानं विदधाति तच्च पौर्वापर्यात्मकमानन्तर्यरूपं वा।

अनुष्ठेय-कर्मणां साङ्गोपाङ्गं विचारानन्तरमनुष्ठानस्याधिकारिणां जिज्ञासा स्वाभाविकी। एतस्याः शान्ति षष्ठाध्याये सूत्रकृता तद् भाष्यकृता व्याख्यातृभिश्च विहिता। कर्मजन्यफलस्याथवा तथाविधकर्मप्रयोजकीभूताया फलेच्छाया अन्यतरस्यावस्थितौ अनुष्ठानकर्तृत्वमधिकारविधिः। यस्मिन् यजमाने पुरुषे वा फलेन फलेच्छया वा सह भागकर्तृत्वं सामानाधिकरण्येन वर्तते स भवति भागस्याधिकारी। एतस्याधिकरास्य बोधको विधिर्भवति अधिकारविधिः। 'अग्निहोत्रं जुहुयात् स्वर्गकामः' अधिकारविधे रुदाहरणम्। स्वर्गकामिनि पुरुषे यजमाने स्वर्गरूप-फलस्य स्वामित्वं भाग-कर्तृत्वं च विद्येते।

इदमत्रावधेयम् केवलं फलस्य फलेच्छायाः वा विद्यमानतायां नाधिकारी भवति भागस्य। अपितु वेदाध्ययने भागविषयकं समग्रं ज्ञानमाधानसिद्धस्याग्नेः विद्यमानत्वमनुष्ठानसम्पादिका शक्तिश्चापेक्ष्यन्ते। विनैभिः भागैः कदापि न संपद्येत। अतएवाधानसिद्धाऽग्नेर्विद्यमानतायां वेदाध्ययनजन्येवेदार्थविषयकज्ञाने चाधिकारत्वस्य प्रयोजकत्वं स्वीकर्तव्यम्। एवमनुष्ठानसामर्थ्यमपि भवति तत्प्रयोजकम्। अन्यथा विकलाङ्गः भागाधिकारी नैव भवितुमर्हति। अन्धः आज्योवेक्षणे मूकः मन्त्रोच्चारणे बधिरः मन्त्रश्रवणे पङ्गुः विष्णुप्रक्रमणे असमर्थः स्यादेव। अल्पधनः भागसामग्रीसंग्रहेऽसमर्थः स्यात्।

पुनश्च विधेस्त्रैविध्यं दृष्ट्यन्तरेण स्वीकृतं शास्त्रकृता। अपूर्वविधिः नियमविधिः परिसंख्याविधिश्चेति। तन्त्रवार्तिके पद्यं विद्यते -

विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति।
तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते।।''

प्रमाणान्तरैरज्ञातं वेदेनैव ज्ञातं वाक्यम् अपूर्वविधिः। यथा अग्निहोत्रं जुहोति व्रीहीन् प्रोक्षतीत्यादि

वाक्यम्।

एकस्मिन् पक्षे अप्राप्तस्यार्थस्य प्रापको विधिर्नियमविधिः। पुरोडाशनिष्पत्ते उपदिष्टः वैदिकविधिस्तावदनुपपन्नष्तिष्ठेत् यावद् ब्रीहिभ्यस्तण्डुलस्य निष्पत्तिर्न स्यात्। ब्रीहिभ्यस्तण्डु ल-निष्पत्तिसाधनान्यनेकानि सन्ति। अवघातः नखविदलनमश्मकुट्टनं च। उलूखलमुसलाभ्यामवहन्ति इति वाक्यम् पूर्वमुक्तमस्ति। ब्रीहीनवहन्ति इति वाक्यमिहोक्तम्। अतः उलूखले मुसलावघातः तण्डुलनिष्पत्तौ प्राप्तः, तदानीमेव नखविदलनमश्मकुट्टनमपि प्राप्तम् तत्र। यतो हि ब्रीहीनवहन्ति इति वाक्यमत्रोपलभ्यते। अतः उलूखलमुसलाभ्यामेवावघातेन तण्डुलनिष्पत्तिर्भवति न तु नख-विदलनादिना। तयोर्बाधो भवत्यत्र। एकस्मिन् काले नखविदलनादि-पक्षोऽप्राप्तस्यावघातस्य नियमविधिना विधानं भवत्यत्र।

परिसमोपसर्गाभ्यां युक्तस्य वर्जनार्थकस्य चक्षिङ्धातोः परिसंख्या-पदं निष्पद्यते। तस्यार्थः वर्जनं भवति। रामायणे बालिः रामचन्द्रमभिलपति-

पञ्च पञ्चनखा भक्ष्या ब्रह्मक्षत्रेण राघव।

शल्लकः श्वाविधो गोधा शशः कूर्मश्च पञ्चमः।।[12] इति।।

अत्र पञ्चनखा पशवः भक्ष्या इति न विधीयते। राग एव तस्य प्राप्तत्वात्। पञ्चनखानां तद्भिन्नानां प्राणिनां भक्षणप्राप्त्यवसरे पञ्चभ्यः पञ्चनखेभ्यः भिन्नप्राणिना-मभक्षणं विधीयते। अयमभिप्रायः साधारणतः पञ्चनखयुक्तानां पञ्चानां प्राणिनां भक्षणस्य विधानं श्लोकेन ज्ञायते किन्तु तद्विधानं न सम्भवति, रागत एव तस्य प्राप्तत्वात्। पक्षान्तराप्राप्तौ नियमविधिरपि नात्र प्रभवति। अत एव वाक्यं व्यर्थं भवेत्। किञ्च वक्तुस्तात्पर्यं परिगणितपञ्चनखप्राणिभिन्नपञ्चनखानां प्राणिनामभक्षणे विद्यते।

तत्तापर्यं श्लोकार्थेन नावगम्यते। अतस्तात्पर्यानुपपत्त्या अत्र पञ्चनखपदस्य परिगणितपञ्चनखप्राणिभिन्न पञ्चनखप्राणिष्वर्थेषु भक्ष्यस्याभक्ष्यार्थे च लक्षणा स्वीक्रियते। तस्मात् परिगतिणतपञ्चनखभिन्न-पञ्चनखप्राणिनामभक्ष्यत्वं वक्तुस्तात्पर्यमुपपद्यते। तस्मादस्य वाक्यस्य वैयर्थ्यमपि परिहृतं भवति।

परिसंख्यायामस्यां दोषत्रयं सन्तिष्ठते। तथा चायमभियुक्तोक्ति-

श्रुतार्थस्य परित्यागादश्रुतार्थप्रकल्पनम्।

प्राप्तस्य बाधादित्येवं परिसंख्या त्रिदूषणा।। इति।

प्रकृते श्रुतार्थः पञ्चनखप्राणिभक्षणं त्यज्यते। अश्रुतार्थः परिगणित पञ्चनखभिन्नप्राणिनामभक्षणं परिकल्प्यते। रागतः प्राप्तस्य परिकल्प्यते। रागतः प्राप्तस्य परिगणितपञ्चनखप्राणिभिन्नपञ्चनख-प्राणिनां भक्षणस्य बाधः निवृत्तिश्च भवतीति। आर्थी परिसंख्याया उदाहरणमयं श्लोक उपर्युक्तः।

श्रुतेरर्थात् साक्षात् श्रुतिवाक्यात् प्रतिपादिता परिसंख्या श्रौती भवति। 'अत्र ह्येवावयन्ति' इति वाक्यमस्योदाहरणम्। अत्र एवशब्देन पवमानस्तोत्रतो भिन्नस्य स्तोत्रस्य व्यावृत्तिर्भवति यद्यपि

अवोपसर्गविशिष्टस्येण्-धातोरर्थः ज्ञानं भवति तथाप्यत्र गायेनऽर्थे प्रयुक्तमवयन्तिपदम्। तस्मात् श्रौती आर्थी भेदेन प्रकारद्वयं परिसंख्याया एवमुदाहरणाभ्यामवसितं भवति।

अतिदेशः

प्रधानेऽर्थात् प्रकृते यागे उपदिष्टस्य प्रतिपदोक्तस्य कर्मणोऽन्यत्र अप्रधानेऽर्थात् विकृति -भागे उपयोगाय एवमेतत् तद्वत् कुर्यादिति भवत्यतिदेशः। इदमित्थं कुर्यादिति भवत्युपदेशः सच विधिवाक्ये दृष्ट एव। लौकिकमुदाहरणं यथा सव्यञ्जनं सघृतं सद्धिमिष्टान्नं परिवेष्य देवदत्तस्य सूपौदनं भोजनं देयम् इत्युपदेशः। अत्रैव एवमेव यज्ञदत्त-भवदत्तप्रभृतयोऽतिथयः भोजयितव्या इत्यतिदेशः भवति।

अस्यातिदेशस्य त्रिप्रकारत्वमभिहितम्। वचनातिदेशः नामातिदेशः लिङ्गवचनातिदेशश्च। पुनः वचनातिदेशस्य द्वाववान्तरभेदौ प्रत्यक्ष-वचनातिदेशोऽनुमितवचनातिदेशश्च। प्रकारणं सबन्धाभ्यामस्यातिदेशस्य नियमनं भवति। अत एव कस्यापि प्रकृतियागकर्मणोऽतिदेशः असंबद्ध अप्रकरणिके विकृतियागे नैव भवितुमर्हति तस्मान्नानवस्थया भेतव्यम्। उदाहरणं यथा- अभिचाराय श्येनयाग इषुयागश्च विहितोऽस्ति। श्येनयागः प्रकृतिः इषुयागश्च विकृतिः। इषुयागस्य कानिचनानुष्ठेय कर्माण्यभिधायान्यानि कर्माणि श्येनयागवत् करणीयानीत्यतिदेशः-प्रत्यक्षवचनातिदेशः।

'सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः' इति वाक्येन सौर्ययागो विधीयते। अस्य यागस्य दर्शपौर्णमासयागेन घनिष्ठोऽस्ति संबन्धः। अतस्तस्मादिहाङ्गकर्मणामतिदेशः अनुमानवचनातिदेशो भवति। यतो हि विनाङ्गकर्मभिः यागस्य पूर्णाङ्गता न भवति किन्तु नास्त्यत्र अङ्गकर्मणां साक्षात् परम्परया वा निर्देशः। सप्तमाध्यायस्य चतुर्थपादेऽस्य वैशद्येन दृश्यते विचारः।

मासमग्हिोत्रं जुहोतीत्यादिवाक्यं दृश्यते। तस्मात् परिज्ञायते मासाग्निहोत्रयागः। किन्त्वस्य विधिविधानं साक्षान्नोक्तमस्ति। तस्मात् प्रकृतियागस्याग्निहोत्रस्य कर्माणि नाम्न आधारेणात्रातिदिष्टानि भवन्ति। अग्निहोत्रं मासाग्निहोत्रं च परस्परं भिन्नमिति प्रतिपादितं द्वितीयाध्यायस्य तृतीयपादे।

सौर्ययागे आग्नेययागस्य निर्वापः, एकदेवताकत्वमौषधिद्रव्याणि च लिङ्गानि समानतयोपलभ्यन्ते। अतः सौर्ययागे आग्नेययागकर्मणामतिदेशबोधकवाक्यानि लिङ्गवचनातिदेशतया व्यवहृतानि भवन्ति।

ऊहः

प्रकृतयागोपयोगिपदार्थजस्य यत्रातिदेशेन विकृतियागे व्यवहारः तत्र कार्यस्यान्यथाकरणमूहः। अस्य त्रैविध्यम् मन्त्रोहः, सामोहः संस्कारोहश्च। यथा देवस्य त्वा सवितुः' इत्यारभ्य अग्नये त्वा जुष्टं निर्वपामीति पर्यन्तं मन्त्राः दर्शपौर्णमासयाग-सम्पाद्ये आग्नेययागे विनियुक्ताः सन्ति। यदा सौर्यबागे तन्मन्त्राणामतिदेशो भवति तदा अग्नये पदस्थाने सूर्याय पदमूहानुसारं पठ्यते। यतोहि सूर्यदवेतामुद्दिश्य यागस्यास्ति विधानमिति मन्त्रोहस्योदाहरणम्।

वैश्यस्तोमयागे काण्वरथन्तरसाम्नो विधानमस्ति। किन्तु ब्राह्मणद्वाराऽनुष्ठेये प्रकृतियागे बृहद्रथन्तरसाम्नोर्विधानं विद्यते। अतः संशयो भवति किं विकृतियागे सामद्वयस्य गानं विधेयमेकस्य

साम्नो वेति। एकस्य बृहतः उच्चस्वरेणापरस्य रथन्तरस्य मन्दस्वरेण भवति गायनम्। अत्रोहेन उभय उभयोः साम्नोः उच्चमन्दस्वराभ्यां गायनं विकृतियागेऽपि विधेयमिति संशयापनोदः। अत्र शवरस्वामि-कुमारिलयोः नास्ति मतैक्यम्। कुमारिलदृष्ट्या कस्याप्येकस्य स्वरेण उभयोः साम्नोः गानमिति।

प्रधाने प्रकृतियागे ब्रीहिसंस्काराभिधानम् विद्यते किन्तु विकृतियागे ब्रीहिस्थानापन्नस्य नीवारस्य संस्कार अभिहितः। अनेन पुरोडाशः निष्पद्यते। अत्र ब्रीहिसंस्कार इव नीवारस्य संस्कारोऽपेक्ष्यत इति संस्कारोहस्योदाहरणम्। संस्कारश्चात्र प्रोक्षणं वितुषीकरणादिरिति। नवमेऽध्यायेऽस्योहपदार्थस्य वैशद्येन विचार उपलभ्यते। वैदिकवाक्यस्यानपूर्व्यां मन्त्रत्वं विद्यते तत्रोहेन परिवर्तने सति मन्त्रत्वं व्याहन्यते। आनुपूर्वी तु अपरिवर्तनीया भवतीति विदुषं धारणा। किन्त्वेवं सति सौर्यादि-विकृतियागस्य गतिरवरूद्ध्येत इत्यपि विचारणीयम्।

प्रकृतस्थानपतितपदार्थान्तरकार्यतः।

ऊहः प्रयोगो विकृत ऊहामानतयोदितः।। इत्यत्र जैमिनिन्यायमाला।

बाधः

बाधो निवृत्तिः कर्मणः। प्रकृतियागतो विकृतियागेऽतिदिष्टानां येषामङ्गकर्मणामनुष्ठानं प्राप्तम् तेषु प्रतिबन्धकवशाद् यदि कस्याप्यनुष्ठानं न भवति तर्हि अनुष्ठाननिवृत्तिरियं बाधपदेनोच्यते। अर्थलोपादर्थात् प्रयोजनाभावात् प्रत्याम्नायस्य विरोधिश्रुतिवाक्यस्योपलब्धेः निषेधतश्च प्रवर्तते बाधः इति।

यथा प्राजापत्ये घृते निर्वपेच्छतकृष्णलमायुष्कामः इति वाक्यात् आयुष्कामेष्टिनामक-विकृतयागे कृष्णलस्यार्थात् विशेषपरिमाणात्मकसुवर्णस्य ब्रीहिस्थानापन्नत्वम्। अतः ब्रीहिधान्यस्य कृते विहितस्यावघातस्वरूपस्याङ्गकर्मणोऽनुष्ठानं प्राप्तम् किन्तु वितुषीभावार्थं ब्रीहेरवघातस्यावश्यकत्वेऽपि कृष्णलस्य कृते नावश्यकं तदिति प्रयोजनाभावात् कृष्णले अवघातरूपाङ्गानुष्ठानस्य निवृत्तिरर्थात् बाधो भवति।

चरुनिर्माणार्थं ब्रीहिस्थाने नीवारस्य यागे विधानं यत्र तत्र नैवारश्चरुर्भवतीति वाक्यम् ब्रीहेः कृते प्रत्याम्नायवाक्यम् अतः ब्रीहिनिवृत्तिस्तत्र प्रत्याम्नायतोऽर्थात् विरोधिश्रुतिवाक्योपलब्धेः भवति।

नार्षेयं वृणीते न होतारमिति प्रतिषेधवचनोपलब्धोः चातुर्मास्य यागान्तर्गतेऽनुष्ठेयं महापितृयज्ञे ऋषिसंबन्ध होतुर्वरणं विहाय सर्वमङ्गजातं कर्मानुष्ठेयमिति निषेधवचनतः ज्ञायते।

अस्य च बाधस्य प्राप्ताप्राप्तभेदेन द्वैविध्यम्। उपरिनिर्दिष्टं प्राप्तबाधोदाहरणम्। अप्राप्तबाधस्य पुनः द्वैविध्यम् बलाबलाधिकरणद्वारा पूर्वप्रमाणेन परप्रमाणस्य बाधोऽस्याप्राप्तबाधस्यैक मुदाहरणम्। श्रुति लिङ्गवाक्य प्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रतिषेधात्[13]। एभिः प्रमाणैः पूर्वाभिहितेन पराभिहितस्य बाधो भवतीति सूत्रकृतोपपादितिम्।

प्रतिपदोक्तबाधस्योदाहरणम् विशेषशास्त्रेण सामान्यशास्त्रस्य बाधो भवति एवमग्निषोमीयं पशुमालभतैति विशेषविधिः मा हिंस्यात् सर्वा भूतानीति सामान्यनिषेधं बाधते।

समुच्चयः

बाधे क्रिया निवर्तते समुच्चये कस्याश्चित् क्रियायाः योगो भवति। अतः समुच्चयविचारोऽत्रैव सङ्गतिमेति। भाष्यं समुच्चयमभिदधत् कथयति यदिदमिह भवतीति विज्ञातेऽपरमपि भवतीति विज्ञानं समुच्चयः। प्राकृते वैकृते वा यागे कस्याप्यङ्गस्य यत्र बोधककारणमुपस्थितं न भवति तत्र समुच्चयोऽभ्युपगम्यते। बाधे क्रियायाः निवृत्तिः समुच्चये क्रियायाः वृद्धिर्भवतीति।

प्रकृतियागस्य नक्षत्रेष्टिनाम्नोऽनुष्ठानानन्तरं नारिष्टहोमस्य विधानमस्ति। नारिष्टान् होमान् जुहोति। दश ते तनुवो यज्ञयज्ञिया आदिः मन्त्रोऽस्योपलभ्यते। अत्र केचिदुपहोमाः सन्ति निर्दिष्टाः। अग्निं कृत्तिकामम्वां दुलाञ्चोद्दिश्य क्रियन्ते। उत्कृष्टतार्थमस्यानुष्ठानस्यात्र समुच्चयो भवति। यद्यपीह नास्त्यनुष्ठानकारणाभिधानम् किन्तु निवर्तकमपि वाक्यं नोपलभ्यते। दशमाध्यायस्य चतुर्थे पादे साधारण्येनाथ च षष्ठसप्तमचरणयोः विस्तरेण विशदविचारोऽस्य सामपशुयाग-सम्बन्धिश्चाधिकृत्य दृश्यते।

तन्त्रावापौ

एकवारमनुष्ठितः सन् यः बहून् उपकरोति स तन्त्रपदवाच्यो भवति। तन्यते विस्तार्यते बहूनामुपकारो येन सकृत् प्रवर्तितेन तदिदं तन्त्रम् इति तद् व्युत्पत्तिः। अनेकेषां ब्राह्मणानां मध्ये प्रज्वलितम् एकः प्रदीपः प्रत्येकं प्रकाशं प्रदायोपकरोति। आवापस्तु वारं वारमनुष्ठितः सन् समूहमुपकरोतीति। यथा बहूनां ब्राह्मणानां ललाटेषु पृथक् पृथगनुष्ठितमनुलेपनं भोजनादिर्वा। शाबरभाष्येऽभिहितं यत्र यत् सकृत् कृतं बहूनुपकरोति तन्तन्त्रम्। यथा बहूनां ब्राह्मणानां मध्ये कृतः प्रदीपः। यस्त्वावृत्त्या उपकरोति स आवापः। यथा तेषामेव ब्राह्मणानामनुलेपनम्। अस्य विचारः एकादशाध्याये विकृतः वैशद्येन।

यत्र प्रधानयागे परस्परं विशेषो गृह्यते तत्रावापः, यत्र च न गृह्यते विशेषस्तत्र तन्त्रमिति।

प्रसङ्गः

केषुचिद् यागेषु तन्त्राभिप्रायस्य विस्तारो दृश्यते यः प्रसङ्गाभिधानेनोक्तो भवति। कस्मिंश्चित् निर्दिष्टे प्रधानयागेऽपेक्षितं विहितञ्चाङ्गकर्म वारमेकमनुष्ठितं सन् तस्मिन्नेव काले तस्मिन्नेव स्थाने तेनैव कर्त्राऽनुष्ठेयेऽन्यप्रधानयागे स्वीक्रियते चेत् तत्कर्म प्रसङ्गपदवीं भजति। यथा गृहस्य प्रकाशाय प्रज्वलितः प्रदीपः यदि निकटस्थं राजमार्गं प्रकाशयति इति प्रसङ्गस्य लौकिकमुदाहरणम्। अन्यस्मै कृतमनुष्ठानं यद्यन्यमुपकरोति तर्हि प्रसङ्गो भवति।

अग्निषोमीयपशुयागे प्रयाजाद्यङ्गकर्मानुष्ठितं सत् पशुपुरोडाशयागमुपकरोति। अग्निसोमदेवते समुद्दिश्य पशुयागविधानमभिहितम् मध्ये पशुपुरोडाशयागो विहितः। अयमपि पशुपुरोडाशयागः स्वतन्त्रः प्रधानश्च। अतोऽत्र पूर्वतोऽनुष्ठितैः प्रयाजाद्यङ्गकर्मभिरत्र प्रसङ्गेनाङ्गकर्मत्वं सम्पन्नं भवति।

फलतः पार्थक्येनेह नाङ्गं कर्मानुष्ठीयते। अस्य विचारः द्वादशाध्याये सविशदं कृतः।

उपसंहारे वक्तुं शक्यं यद् मीमांसाशास्त्रमाहात्म्यं तत्र प्रतिपाद्यानां पदार्थानां यथामति सोदाहरणं परिचयश्चात्र संक्षेपेण प्रदर्शितः। नात्र विचारस्य सूक्ष्मतापरिणाहः शास्त्रार्थो वा विहितः। उत्तरे भारते मीमांसाशास्त्रं विदुषामपि अपरिचितमिव विद्यते। यस्य नाम्ना विद्यापीठमिदं विराजते स च महात्मा अस्यैव शास्त्रस्य विशेषज्ञ आसीत् रुचिकरत्वात्। अत एवात्मनः बुद्धिशुद्ध्यै विषयममुमासाद्य किमप्यभिलपितं मयाऽपि।

सन्दर्भाः

1. तात्पर्यटीका 1..1.1
2. तैत्तिरियाण्यके, 2.8.1
3. छान्दोग्योपनिषदि,5.11.1
4. बृहती 1.1.1
5. श्लोकवार्तिकम् 5.11
6. तत्रैव,2.168
7. तत्रैव,2.195
8. तत्रैव,1.196
9. तत्रैव,2.192
10. तत्रैव,2.121
11. तन्त्रवार्तिके, 1.2.5
12. रामायणे, 4.17.39
13. मीमांसासूत्रम् 3.3.14

□□□

संस्कृतवाङ्मय में लोकमङ्गल

रहसविहारी द्विवेदी

(The paper deals with the feelings of purposes of human welfare (लोकमङ्गल) as depicted in Sanskrit literature (i.e. Vedic, Upaniṣadic, Śāstric along with classical as well as modern Sanskrit literature). The author of this paper has collected examples from *Ṛgveda*, *Atarvaveda*, *Gītā*, *Manusmṛti*, Raguvaṁśa, अभिज्ञान शाकुन्तलम्, मालतीमाधव and the works of modern Sanskrit poets like Shrinivas Rath, Revaprasad Dvivedi, Ramakishor Malaviya and others to establish his views. With the application of these fellings in our day- to-day life, human social welfare can be established.)

संस्कृतवाङ्मय समय और भाषा की दृष्टि से द्विधा विभक्त है - वैदिक और लौकिक। आचार्य राजशेखर वाङ्मय के मुख्य दो भेद करते हैं - शास्त्र और काव्य। *'इह हि वाङ्मयमुभयथा शास्त्रं काव्यञ्च। शास्त्रपूर्वकत्वात्काव्यानां पूर्वं शास्त्रेष्वभिनिविशेत। नह्यप्रवर्त्तितप्रदीपास्ते तत्त्वार्थसार्थमध्यक्षयन्ति।* तच्च द्विधा-अपौरुषेयं पौरुषेयं च। अपौरुषेयं श्रुतिः, सा च मन्त्रब्राह्मणे, *'पौरुषेयं पुराणम्, आन्वीक्षिकी, मीमांसा, स्मृतितन्त्रमिति चत्वारि शास्त्राणि।'* पुराण का प्रभेद इतिहास को मानकर राजशेखर उसके दो भेद करते हैं- परक्रिया और पुराकल्प। परक्रिया-रामायण को और पुराकल्प-महाभारत को कहते हैं। इस प्रकार रामायण और महाभारत को राजशेखर इतिहास के साथ शास्त्र भी कहते हैं। चतुर्दश विद्याओं को ही प्रायः शास्त्र कहा जाता है जिसका प्रसिद्ध श्लोक है-

अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरः।

धर्मशास्त्रं पुराणं च विद्या ह्येता चतुर्दश।।

यहाँ 'विस्तर' के उल्लेख से पूर्वमीमांसा, उत्तरमीमांसा (वेदान्त), न्याय, वैशिषिक और साङ्ख्ययोग भी संकेतित हैं। 'अङ्गानि' से निरुक्त, छन्दोविचिति, ज्योतिष, व्याकरण, शिक्षा तथा कल्प इन छह शास्त्रों का सङ्केत किया गया है। 'वेदाश्चत्वारः' से ऋक्, यजुष्, साम और अथर्ववेद का बोध होता है। 'पुराण' से अष्टादश पुराणों का परिगणन है। इसी में उपवेद (गन्धर्व, आयुर्वेद, नाट्यवेद, धनुर्वेद आदि) तथा उपपुराण भी सम्मिलित हैं। इस प्रकार इस श्लोक में सारा शास्त्रीय वाङ्मय प्रतिपादित है। काव्यसाहित्य में सभी दृश्य (रूपक) और श्रव्य (महाकाव्य, खण्डकाव्य तथा मिश्रविधा चम्पू आदि) और गद्यविधा (कथा, आख्यायिका आदि) हैं । उक्त शास्त्रों में जो

सिद्धान्तरूप में प्रतिपादित है उसको पात्र के परिपल्लवन में प्रायोगिक रूप से काव्यादि में प्रस्तुत किया जाता है, जिससे सरस रूप में अल्पगति पाठक भी शास्त्रों के अनुशासन को ज्ञात कर लेते हैं।

यहाँ ध्यातव्य है कि सभी शास्त्र और काव्यसाहित्य वेद पर आधारित हैं। जैस- मनुस्मृति में धर्म (कर्तव्य) का आधार चार को बताकर पुनः मानवधर्म (मानवीय कर्तव्य घटकों) का प्रातिपादन किया गया है

'श्रुतिः स्मृतिःसदाचारः स्वस्य च प्रियमात्मनः। एतच्चतुर्विधः प्राहुः साक्षाद् धर्मस्य लक्षणम्।।''

धर्म का प्रथम आधार वेद को बताकर द्वितीय में स्मृति का उल्लेख है। मनुस्मृति स्वयं स्मृतिग्रन्थ है। तब वह उसी का आधार कैसे है? वस्तुतः 'संस्कार-जन्यं ज्ञानं स्मृतिरनुभवः- यह भी स्मृति का व्युत्पत्तिलभ्य अर्थ है। अतः ऋषियों और मनीषियों के अनुभव भी धर्म के आधार हैं। स्मृति भी श्रुति पर आधृत है। कालिदास कहते हैं- 'श्रुतोरिवार्थं स्मृतिरन्वगच्छत्' (रघुवंश 2)। इस प्रकार स्मृति वेद पर आधृत है और सदाचार स्मृति के विधानों पर। 'स्वस्य' और आत्मनः एकार्थी से प्रतीत होते हैं, अतः पुनरुक्ति लगती है किन्तु स्वस्य से स्मृतिकार अपने से सम्बद्ध परिवार, समाज और राष्ट्रादि की ओर संकेत करते हैं, अतः इनका प्रिय और अपना स्वयं का व्यक्तिगत प्रिय (हित) करना धर्म का एक आधार है। इन चारों धर्म के आधारों का मूलाधार वैदिक वाङ्मय है। इसलिए *'वेदोऽखिलो धर्ममूलम्'* ऐसी अभ्युक्ति प्रसिद्ध है। तैत्तरीय संहिताभाष्य भूमिका में कहा गया है- *'प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते। एवं विदन्ति वेदेन तस्माद्वेदस्य वेदता।।'*

मनु ने वेदों की मान्यता के अनुसार मानवधर्म (मनुष्य के कर्तव्य घटकों) का निर्धारण किया है-

धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् [1]

1. धृति (धैर्यधारण करना), 2. क्षमा (किसी को माफ करने की भावना), 3. दम (सुख और दुःख में समान स्थिति /सहन शक्ति), 4. अस्तेय (चोरी न करना), 5. शौच (आभ्यन्तरिक और बाह्य की पवित्रता, पर्यावरण चाहे प्राकृतिक हो या आन्तरिक दोनों की शुचिता का ध्यान रखना), 6. इन्द्रियसंयम (इन्द्रियों पर नियन्त्रण रखना-काम, क्रोध, लोभ, मोह, विलासभावना का परित्याग), 7. धी (धीर्धारणवती मेधा,मतिरागाभिगोचरा, बुद्धिस्तात्कालिकी प्रोक्ता, प्रज्ञा त्रैकालिकी मता। अर्थात् भूत, भविष्य और वर्तमान के प्रति सजग रहना), 8. विद्या (जीवनयापन के लिए कुछ सीखना कोई योग्यता प्राप्त करना), 9. सत्य (सत्य भाषण, छलरहित व्यवहार, इमानदारी), तथा 10. अक्रोध (क्रोध न करना)। मनु द्वारा प्रतिपादित इन दश धर्म (कर्तव्य) घटकों का आधार वैदिक वाङ्मय ही है-

'सहृदयं संवदध्वं साम्मनस्यमविद्वेषं कृणोमि वः।

अन्यो अन्यमभि इर्यत वत्सं जातमिवाध्न्या।।'[2]

इस अथर्ववेदीय मन्त्र में जैसे गाय नवजात वत्स के प्रति स्नेह से युक्त होती है, उसी प्रकार हम सभी एक दूसरे के प्रति स्नेहयुक्त रहें- यह प्रार्थना की गई है। ऋग्वेद के अन्तिम सूक्त में कहा गया है-

'सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम्।
देवा भागं यथा पूर्वे संजानाना उपासते।।
समानी व आकूतिः समाना हृदयानि वः।
समानमस्तु वो मनो यथा वः सुसहासति।।'[3]

इसी प्रकार यजुर्वेद का शिवशङ्कल्प सूक्त मानव की दिव्य मानसिक स्थिति को आरेखित करता है-

'यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवेति।
दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु।।'

दुर्गुणों के व्यपगत करने तथा सद्गुणों के आधान की प्रार्थना करता हुआ ऋषि कहता है-

'विश्वानि देव सवितर्दुरितानि परा सुव।
यद् भद्रं तन्न आ सुव।।'[5]

ब्राह्मण, आरण्यक और उपनिषद्-वाङ्मय में भी व्यक्ति और समाज की दिव्यता की भावना पदे-पदे निहित है-

ऊँ असतो मा सद्गमय, तमसो मा ज्योतिर्गमय, मृत्योर्माऽऽमृतं गमय।[6]

जिस प्रकार मेरा मन मेरी बुद्धि शुद्ध हो उसी प्रकार मेरी वाणी भी पवित्र और मधुर हो-

'निर्दुरर्मण्य ऊर्जा मधुमती वाक् ' मधुमती वाचमुदेयम्'[7]

'गावों के लोग स्वस्थ और पुष्ट हो' ऐसी कामना वेद में की गई है-

'विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम्।'[8]

वर्षा का जल हितकारी हो -

'शिवा नः सन्तु वार्षिकी।'[9]

राष्ट्र का कल्याण होने पर ही वहाँ के युवक विश्वकल्याण की अर्हता प्राप्त करेंगे-

'आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायताम् राष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्ध्रिर्योषा जिष्णरथेष्ठाः सभेयो युवाऽस्य यजमानस्य वीरो जायतां निकामे-निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम्।'[10]

इस मन्त्र में कामना की गई है कि हमारे राष्ट्र के ज्ञानी और रक्षक दिव्य अर्हता के साथ अपने कर्तव्य का पालन करें, गाएँ प्रभूत दूध देने वाली हों, बैल शक्तिशाली हों, घोड़ें तेज दौड़ने में समर्थ हों।

यथासमय जलवृष्टि में शस्यश्यामला धरती हो, यह फल देने वाले वृक्षवनस्पतियों से पूर्ण हो। वैदिक युग में राष्ट्र भले ही राज्यों में विभक्त था किन्तु धरती की दृष्टि से वह अखण्ड था। भूभाग भाषा और संस्कृति की एकता पर वैदिक वाङ्मय बल देता है-

सरस्वती साधयन्ती धियं न इडादेवी भारतीविश्वमूर्तिः।

तिस्रोदेवी स्वधया बर्हिदेदमच्छिद्रं पान्तु शरणं निषद्य।।[11]

जहाँ ब्रह्मशक्ति (ज्ञानी) और क्षत्रशक्ति (प्रशासकों) का ताल-मेल नहीं होता वह राष्ट्र विकास नहीं कर पाता-

उग्रो राजा मन्यमानो ब्राह्मणं यो जिघत्सति।

परा तत् सिच्यते राष्ट्रं ब्राह्मणो यत्र जीर्यते।।[12]

जहाँ दोनों में पारस्परिक सौहार्द्र होता है वह राष्ट्र विकास करता है-

यत्र ब्रह्म च क्षत्रं च सम्यंचौचरतः सह।

तं लोकं पुण्यं प्रज्ञेयं यत्र देवाः महाग्निना।[13]

राज्-दीप्तौ धातु में ष्ट्रन् प्रत्यय करने पर राष्ट्र शब्द बनता है। वेदों में राष्ट्र का अनेकधा प्रयोग हुआ है। यद्यपि राष्ट्र शब्द से अपने राष्ट्र का सामन्यतया बोध होता है। अंग्रेजी में राष्ट्र को नेशन (Nation) कहा जाता है। जिसका अर्थ है- एक प्रकार के प्रशासन में रहने वाली जनता- PEOPLE LIVING UNDER ONE GOVERNMENT। यह परिभाषा भी वैदिक राष्ट्र वर्णन में अन्वित है, तथापि वैदिक राष्ट्र की परिकल्पना व्यापक और वैश्विक है तथा विश्वकल्याणोन्मुखी है। मनुस्मृति में राज्य के मुख्य घटकों की परिकल्पना में सात तत्त्वों का उल्लेख किया गया है।

'स्वाम्यमात्यौ पुरं राष्ट्रं कोषदण्डौ सुहृत्तथा।

सप्तप्रकृतयो ह्येता सप्ताङ्गराज्यमुच्यते।।'[14]

कौटिल्य के अनुसार ये सातों अंग अपने कर्तव्यों का ईमानदारी और निष्ठा से अपनी क्षमता के अनुसार निर्वहण करें, तब राष्ट्र सुखशान्ति से युक्त और समृद्ध होता है-

'अरिवर्ज्याः प्रकृतयः सप्तैता स्वगुणोदयाः।

उक्ताः प्रत्यङ्गभूतास्ताः प्रकृता राजसम्पदः।।'[15]

धर्म के दश कर्तव्य घटक सभी मनुष्यों के लिए मनु ने अनिवार्य बताएं हैं - जैसा कि पहले बताया जा चुका है-

'धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।

धीर्विद्यासत्यमक्रोधो दशकं धर्मलक्षणम्।।'[16]

इन दश कर्तव्यों का पालन न करने वाले मनुष्य के नीतिशतककार भर्तृहरि ने मनुष्य के रूप में होने पर भी पशु कहा है-

'आहारनिद्राभयमैथुनं च सामान्यमेतत्पशुभिर्नराणाम्।

धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिःसमानाः।।'

सम्प्रति राज्य के चार तत्त्व प्रमुख माने गए है-

1. जनसंख्या, 2. निश्चित भूभाग, 3. शासन तथा 4. सम्प्रभुता।

जो अपने प्रति, परिवार के प्रति, समाज के प्रति और अपने राष्ट्र के प्रति आस्थावान् है, व्यक्तिगत पारिवारिक सामाजिक और राष्ट्रिय विकास के प्रति सजग है, वहीं सारे विश्व का उपकारक और सहयोगी हो सकता है। स्वयं असमर्थ रह कर विश्वहित में कोई कभी समर्थ नहीं हो सकता। उसके लिए भी वैदिक साहित्य में चार तत्त्व आवश्यक माने गए हैं-

1. जिस राष्ट्र में जन्म हुआ है और जहाँ निवास कर रहा है उस पर वह गौरव का अनुभव कर अपने को दिव्यभावना से युक्त बनाए-

'अहं राष्ट्रस्याभिवर्गेनिजीभूयास उत्तमः।'[17]

2. जिस राष्ट्र में उत्पन्न हुआ है उस पर गर्व का अनुभव करे-

'प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्ति वृद्धिं ददातु मे।'[18]

3. अपनी राष्ट्रभूमि के प्रति मातृत्व की भावना-

'माता भूमिः पुत्रोऽहं पृथिव्याः।'[19]

'सा नो भूमिः प्राणमायुर्दधातु।'

4. सत्यादि का पालन और आत्मसमर्पण की भावना-

सत्यं बृहदृतमुग्रदीक्षा तपोब्रह्म यज्ञः पृथिवीं धारयन्ति।

सानो भूतस्य भव्यस्य पत्न्युरुं लोकं पृथिवी नः कृणोतु।।[20]

ये सभी सत्य, बृहद् ऋत्, तेजस्विता, दीक्षा, तप, ब्रह्मयज्ञ पृथिवी को धारण करते हैं। समत्व और एकता के लिए वेदों में अनेकधा प्रतिपादन है-

असम्बाधं मध्यतो मानवानां यस्या उद्वतः प्रवतः समं बहु।

नानावीर्या ओषधीर्या बिभर्ति पृथिवी नः प्रथ्यतां राध्यतां नः।।[21]

यहाँ विविध भाषा और विविध धर्म के होने पर भी एक घर में रहने वाले परिवार की तरह मिलजुल कर रहने की प्रेरणा दी गई है-

जलं बिभ्रती बहुधा विवाचसं नानाधर्माणं पृथिवी यथौकसाम्।

सहस्रं धारा द्रविणस्य मेद्रुहां ध्रुवेण धेनुरनुपस्फुरन्ती।।[22]

सभी छोटे-बड़े परस्पर मिलजुल कर रहें, कोई किसी को तुच्छ न माने-

ते अज्येष्ठा अकनिष्ठा स उद्भिदोऽमध्यासो सहसा विवावृधुः।

सुजातासोजनुषा पृश्निमातरोदिवो मर्त्या आ नो अच्छा जिगातम्।।[23]

संहिताओं के साथ ब्राह्मण, आरण्यक और उपनिषद् ग्रन्थों धार्मिक और आध्यात्मिक विधानों में एक परम सत्ता पर विश्वास व्यक्त किया गया है। ध्यातव्य है कि संस्कृत-वाङ्मय में मानवीय

कर्तव्य पर बल है मानवाधिकार पर नहीं। अधिकार की माँग और उसके लिए आन्दोलन विकास का बाधक अभिकल्प है। सभी को समान मानने की बात मानवाधिकार में कही गई है। उपनिषद् साहित्य में यह तथ्य अनकेधा आरेखित है-

यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति।

सर्वभूतेषु चात्मानं ततो न विजुगुप्सते।।[24]

इसके आगे वाले मन्त्र में भी सर्वात्मभाव का उल्लेख किया गया है-

यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः।

तत्र को मोहः कः य शोक एकत्वमनुपश्यतः। (वहीं,7)

मनुस्मृति में भी यही अवधारणा व्यक्त की गई है-

सर्वभूतेषुचात्मानं सर्वभूतानि चात्मनि।

समं पश्यन्नात्मयाजी स्वाराज्यमधिगच्छति।।[25]

श्रीमद्भागवतगीता में भी कहा गया है-

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि।

ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः।।[26]

वही आत्मतत्त्व ईश्वर के रूप में प्रतिपादित है। गीता में भगवान् कृष्ण अर्जुन से कहते हैं-

यो मां पश्यति सर्वत्र सर्वञ्च मयि पश्यति।

तस्याहंन प्रणश्यामि सच मे न प्रणश्यति।।[27]

भारतीय अध्यात्म का वैशिष्ट्य यह है कि वह सर्वत्र ईश्वर का वास मानता है। अतः आध्यात्मिक व्यक्ति किसी से घृणा नहीं कर सकता। ईश्वर श्रद्धेय है जब वह जड़-चेतन सभी में व्याप्त है, तब किसी से घृणा करने का प्रश्न ही नहीं उठता। अतः इस भारतीय अवधारणा वाला व्यक्ति सबके प्रति संवेदनशील रहता है।

सर्वत्र ईश्वर का वास और त्यागपूर्वक सुखोपभोग ही संस्कृतवाङ्मय में प्रतिपादित है। ईशावास्योपनिषद् का प्रथम मन्त्र इस अवधारणा को आलोकित करता है –

'ऊँ ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।

तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद् धनम्।।'

संस्कृत का इतिहास और पुराण-साहित्य भी वैदिक-वाङ्मय से ही अनुप्राणित है, जैसा कि महाभारत के आदि पर्व में कहा गया है-

इतिहास-पुराणाभ्यां वेदं समुपवृंहयेत्।

विभेत्यल्पश्रुताद् वेदो मामयं प्रहरिष्यति।।[28]

इतिहास और पुराण को वेदों का पञ्चम वेद कहा गया है।

इतिहास पुराणं पञ्चमं वेदानां वेदम्।[29]

मन्त्र और ब्राह्मण का साक्षात्कार करने वाले ऋषियों से इतिहास-पुराण-धर्मशास्त्र आदि अभ्युपकल्पित हैं-

य एव मन्त्रब्राह्मणस्य द्रष्टारः प्रवक्तारश्च ते।

खल्वितिहासपुराणस्य धर्मशास्त्रस्य चेति।।[30]

महाभारत के सन्दर्भ में कहा गया है-

'धर्मे ह्यर्थे च कामे च मोक्षे च भरतवर्षभ!

यदीहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्।।'

महाभारत रचनाफलक की दृष्टि एक लाख श्लोकों वाला विशालकाय ग्रन्थ है, अतः पात्रों के माध्यम से सत् और असत् प्रवृत्ति को रूपायित करते हुए पुरुषार्थ चतुष्टय (धर्म, अर्थ,काम और मोक्ष) की जीवन्त झांकी प्रस्तुत की गई है। यहाँ अनेक आख्यानों और उपाख्यानों के माध्यम से भारतीय संस्कृति और इतिहास आरेखित है। आध्यात्मिकता भारतराष्ट्र का वैशिष्ट्य है, वह यहाँ भी अनेकधा कथनोपकथनों से निरूपित है। आध्यात्मिक जीवनशैली के विकास के लिए चार चरण हैं - 1. आस्तिकता 2. नैतिकता 3. धार्मिकता और 4. आध्यात्मिकता।

संस्कृत के काव्य-साहित्य में वाल्मीकि - विरचित रामायण प्रथम है। इसे आदिकाव्य कहा जाता है। शास्त्रों के सिद्धान्तों की अन्विति या उसका प्रायोगिक रूप पात्रों के चरितविन्यास में प्रस्तुत किया जाता है। सुकुमारमति पाठक जो शास्त्र नहीं जानते वे रामायणादि से शास्त्रविहित आचरण की प्रेरणा लोकोत्तराह्लाद के साथ प्राप्त करते हैं। इसीलिए रामायण का नवाह्न, मासिक और अखण्ड पाठ किया जाता हैं जिससे जनता उदात्त जीवन मूल्यों को अपने मे अन्वित कर सके। काव्यों का प्रयोजन आनन्द प्रदान करने के साथ जीवन मूल्यों की प्रेरणा देना है।

आदिकाव्य वाल्मीकि रामायण के प्रारम्भ के चार श्लोकों में भारतीय कवियों का उद्देश्य सुस्पष्ट है। प्रथम श्लोक में कवि का मार्गदर्शक कैसा हो इसका निरूपण है तथा अग्रिम तीन पद्यों में कवि के अभीप्सित चरित-नायक का स्वरूप प्रतिपादित है-

'तपःस्वाध्यायनिरतं तपस्वी वाग्विदां वरम्।

नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम्।।'

को न्वस्मिन् साम्प्रतं लोके गुणवान् कश्च वीर्यवान्।

धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः।।

चारित्रेण च को युक्तः सर्वभूतेषु कोरतः।

विद्वान् कः कः समर्थश्च कश्चैकप्रियदर्शनः।।

आत्मवान् को जितक्रोधो द्युतिमान् कोऽनसूयकः।

कस्य विभ्यति देवाश्च जातरोषस्य संयुगे।।

भारतीय कवि किस प्रकार के विशेषज्ञ से मार्गदर्शन प्राप्त करता था और उसका चरितनायक कैसा हो, यह तथ्य उक्त चार श्लोकों में संकेतित है। ऐसी ही रचना कालजयिनी होती है। मनुष्य या यों कहें कि एक पुरुषोत्तम के आदर्शों को प्रस्ताव के रूप में वाल्मीकि नारद के समक्ष प्रस्तुत करते हैं और वैसे ही महापुरुष को बताने को कहते हैं। तब नारद उन्हें 'इक्ष्वाकु-वंशप्रभवो रामो नाम जनैः श्रुतः', इत्यादि रूप में वाल्मीकि को उपयुक्त नायक बताते हैं।

भारतीय आध्यात्मिक और धार्मिक मानस बनाने के लिए

'विना वेदं विना गीतां विना रामायणीं कथां विना कविं कालिदासं कीदृशी भारतीयता'

यज्ञानामग्नेश्च पारस्परिकः सम्बन्धः प्राचीनकालादेव प्रसिद्धः। विराटसंज्ञकेन पुरुषेण सृष्ट्यादौ प्राणाग्नौ स्वाहुतिं विधाय जगतः कल्याणम् कृतमिति वेदनिर्देशेन विज्ञायते। सृष्टिप्रारम्भादेव यज्ञस्याग्नेश्च परस्परं घनिष्ठः सम्बन्धोऽस्ति। अग्नेः प्रभावादेव पृथिव्यां शस्यफलादीनां परिपाको भवति। एवञ्च ऋग्वेदस्य प्रथमो मन्त्रोऽग्निसमर्पितोऽस्ति तेन वैदिकवाङ्मये यज्ञस्याग्नेश्च माहात्म्यं स्पष्टं परिचीयते-

'अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्।।'[5]

अग्नेरिव वायोरपि प्राणिनां जीवनाधायकत्वं मन्यते। सामान्यतया मरुद्गणैः स्वशक्तिः विनाशकर्मणि प्रयुज्यते परं यथोचितरूपेण स्मृता दयालव एते लोकोपकारित्वं भजन्ते। इमे मरुद्गणाः संसारस्य एकस्यां दिशि स्थिता वेगेनान्यस्यां दिशि प्रवहन्ति। अयं प्रवाहो वायुं शोधयति वर्षणं च विदधातीति स्वीक्रियते।

पर्यावरणं परिष्कर्तुं मानवो यज्ञादिकर्मसु साहाय्यं कुर्यादिति नितान्तमावश्यकम्। कथमपि यज्ञेषु विघ्नो नोपस्थानीयः। ये खलु यज्ञेषु बाधां समुपस्थापयन्ति ते वेदवचनानुसारं राक्षसा भवन्ति-

'देवा ह वै यज्ञेन यजमानस्तानसुरक्षसानिररक्षुर्न यज्ञध्वमिति। तद्यदरक्षंस्तस्माद्रक्षसि।।'[6]

महाभारतेऽप्येतादृशां वर्णनं प्राप्यते यद् युधिष्ठिरस्य राजसूययज्ञे शिशुपालो यदा बाधामुपस्थापितवांस्तदा भगवान् श्रीकृष्णः स्वसुदर्शनचक्रेण तस्य शिरश्चिच्छेद। एतेन विज्ञायते यत् पर्यावरणोपयोगिनो यज्ञस्य विनाशो भारतीय-संस्कृतौ विशिष्टदण्डनीयापराधो मत इति।

पर्यावरणे तरुमहत्त्वम्

मनुष्यस्य प्रकृतेश्च सम्बन्धः संस्कृतसाहित्ये सविशेषं प्रस्तुतः। वैदिकमहर्षिभिः वनस्पतिषु जन्तुषु च देवत्वं प्रकाशितम्। वनेषु स्थलेषु जलेषु च स्वतः प्रादुर्भूताभिर्वनस्पतिभिर्मानवजीवनोपयोगिनां भोजनवस्त्रचिकित्साप्रधानालङ्करणादीनां सिद्धिर्भवति। प्राचीनकाले भारतीया विविधान् जन्तून् पालितवन्तः, पालितानां तेषां जन्तूनां साहाय्येन स्वपरिश्रमेण च ते क्षेत्रेषु वनस्पतीनां समृद्धिं कृतवन्तः। तैर्वनस्पतिषु देवत्वमनुभूतम्। फलतः वनस्पतिपूजनपरम्परा प्रवर्तितेति मन्ये। एतदेव प्रमुखं कारणमासीद् येन हि भारतीयेषु धर्मग्रन्थेषु तरुगुल्मादीनामपि श्रद्धाऽऽस्थापरिपूर्णः पूजनविधिः प्राप्यते। वनस्पतिपूजाप्रकाशकैर्वैदिकसूक्तैः सह संस्कृतवाङ्मये सहृदयश्लाघ्या बह्व्यः कविता विराजन्ते।

तत्र ऋग्वेदे सोमलताया निरुपमं महत्त्वं विगीतम्। यदा सोमलताभ्यो रसो निस्सार्यते तदा विशिष्टानां मन्त्राणां गानं विधीयते स्म। तत्र वेदे सोमरसः स्फूर्तिदायकोऽमृतत्वसम्पादकश्च स्वीकृतः। उक्तमपि-

'इन्द्रस्ते सोमसुतस्य पेयाः कृत्वे दक्षाय विशे च देवाः।'

गीतायां भगवान् श्रीकृष्णः 'अश्वत्थः सर्ववृक्षाणाम्' इति कथयन् अश्वत्थनामकस्य वृक्षस्य भगवत्सारूप्य-प्रकाशनेन वृक्षाणां महत्त्वमपि प्रतिष्ठापयति स्म। एवमेव भारतीयायां परम्परायां वटवृक्षस्य बिल्ववृक्षस्य आम्र-निम्ब-पिपल-शाल्मलीप्रभृतीनां वृक्षाणां छेदनं पर्यावरणसंरक्षणदृष्ट्या सर्वथा निषिद्धं विद्यते। वृक्षा वायुप्रदूषणं समाप्य वायुमण्डलं शोधयन्तीति मनीषिणां वैज्ञानिकं ज्ञानमासीदिति विवरणेनानेन सुसिद्धं भवति। यथा अश्वत्थवृक्ष आराध्यः श्रद्धेयश्च तथैव तुलसीनामकस्य लघुपादपस्यापि भारतीयायां संस्कृतौ सविशेषमाराध्यत्वं श्रद्धेयत्वञ्च प्रसिद्धम्। तुलस्यां मूलादारभ्याग्रभागं यावत् सर्वत्र देवानां निवासः स्वीक्रियते भारतीयमनीषिभिः। किं बहुना तुलसीच्छायाऽपि देवतीर्थसमाश्रितेति मन्यते। तुलसीगन्धसुवासितो वायुः प्रदूषणरहितः सर्वा दिशः पुनातीति वैज्ञानिकसमाजे प्रसिद्धमेव।

भारतस्य प्रायः सर्वेषु ग्रामेषु पिपलनामकस्य पवित्रस्य वृक्षस्य स्थितिरवश्यं भवति। यतो हि भारतीयैर्मन्यते यत् पिपलवृक्षे देवा निवसन्ति। ये मानवा वृक्षस्यास्य अर्चां कुर्वन्ति तेषां मनोकामनापूर्तिर्भवतीति लोकविश्वासः। सामान्यतः पिपलवृक्षे ब्रह्मदेवस्य वसतिरभ्युपगम्यते। तत्र यजुर्वेदे प्रकाशितम् -

'वनस्पतिः शमिता' एतेन विज्ञायते यत्खलु वृक्षाः पर्यावरणदोषशमनं विदधतीति।

तत्र अथर्ववेदे वनस्पति-पशु-पक्षिसम्बद्धानां मन्त्राणां बाहुल्यं विद्यते, एतेषां मन्त्राणां विविधरोगोपचारविधौ महानुपयोगो विद्यते। प्रायः सर्वाभिर्वनस्पतिभिर्विविधा ओषधयो निर्मीयन्ते। ऋग्वेदे ओषधिसूक्ते आरोग्यकारकाणां पादपानां वर्णनं बहुत्र समुपलभ्यते यथा हि -

'शत वो अम्ब धामानि सहस्रमुत वो रुहः।
अधा शतक्रमो यूयमिमं मे अगदं कृत।।
ओषधीः प्रति मोदध्वं पुष्पवतीः प्रसूवरीः।

अश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः।।[7]

अथर्ववेदे नैकाः कायशल्यक्रियोपयोगिन्यो वनस्पतयो वर्णिताः। तासु वनस्पतिषु 'रोहिणी' नामधेया वनस्पतिः भग्नामस्थिं संयोजयति। 'अजन' नाम्नी च वनस्पतिः पाण्डुरोगं निवारयति। वनस्पतिजन्यं 'दशमूल'-नामकमौषधं सन्धिपीडां दूरीकरोति। 'रजनि' नामधेया वनस्पतिः कुष्ठरोगगपहरति। एता वनस्पतिजन्या ओषधयो मातृवदेव मानवानां भरणं पोषणं रक्षणं च कुर्वन्तीति ऋग्वेदमन्त्रेऽस्मिन् प्रतिपादितं -

'औषधीरिति मातस्तद् वो देवीरुपब्रुवे'।[8]

निम्नलिखिते मन्त्रे वर्णिता श्रेष्ठस्य गृहस्य निर्मितिः पर्यावरणदृशा वनस्पतीनां सविशेषं महत्त्वं निर्दिशति -

'आयने ते परायणे दूर्वा रोहन्तु पुष्पिणीः।
उत्सवो वा तत्र जायतां ह्रदो वा पुण्डरीकवात्।।1।।
अपामिदं न्ययनं समुद्रस्य निवेशनम्।
मध्ये ह्रदस्य नो गृहाः पराचीना मुखा कृधि।।2।।
हिमस्य त्वा जरायुणा शाले परि व्ययामसि।
शीतह्रदा हि वो भुवोग्निष्कृणोतु भेषजम्।।3।।'

अत्र वर्णितमस्ति यत्खलु गृहस्य समक्षं पृष्ठभागे च दूर्वाया उद्यानं भवेत्। अत्रोद्याने विविधानि पुष्पाणि भवेयुः। अत्रैव कमलैः सुशोभितः तडागोऽपि भवेदिति। अतो हि प्रथममन्त्रस्य तात्पर्यं पर्यावरणरक्षणमेव भाति।

गृहस्य परितो जलप्रवाहो भवेत् गृहस्थानं समुद्रतटे तडागमध्ये वा स्यात्। गृहद्वाराणि गवाक्षसम्मुखं भवेयुः इति समुपदेशप्रकाशस्य द्वितीयमन्त्रस्यापि तात्पर्यं पर्यावरणरक्षणमेव। शीतलजलयुतानां तडागानां बाहुल्येन अग्निशैत्यादि-निवारणं सुकरं भवति तेन हेतुना गृहनिर्माणप्रसङ्गे तडागस्थापनं समुपदिष्टम्। तेन मानवः स्वीयं पर्यावरणं प्रदुषणविमुक्तं कर्तुं प्रभवतीति स्पष्टं परिचीयते।

पर्यावरणे नदीनां महिमा

प्राचीनकालादेव नदीतडागादिरूपेण भूमण्डले विद्यमानो जलराशिर्भारतीयैः पूज्यो मन्यते। यथा पर्यावरणसम्बद्धानां तरुगुल्मादीनां तथा च विभिन्नानां जीव-जन्तूनां रक्षणं मानवेन विधेयं तथैव नद्यादीनां जलस्रोतसामपि रक्षणं प्रदूषणनिवारणविधिना मानवेन करणीयमिति निर्विवादम्। सन्दर्भेऽस्मिन् संस्कृतसाहित्यप्रस्तुतो गङ्गानदीमहिमा सविशेषं प्रशस्तः। गङ्गायाः पवित्रतां गंभीरतां प्रवहमानतां च संरक्षितुं मानवजात्या ये उपाया अनुष्ठितास्ते अस्माभिः सर्वैरपि ज्ञायन्ते। गङ्गानद्या भारतीयानां जीवने-निरतिशयम् महत्त्वं वर्तते। भारतीयसंस्कृतौ पतितपावनीयं गङ्गा मातृवत् पूज्याऽभिमता। गङ्गालहर्यां पण्डितराजेन जगन्नाथेन स्पष्टमुदीरितम् -

'समृद्धं सौभाग्यं सकलवसुधायाः किमपि तन्
महैश्वर्यं लीलाजनितजगतः खण्डपरशोः।
श्रुतीनां सर्वस्वं सुकृतमयमूर्तं सुमनसां

सुधासौन्दर्यं ते सलिलमशिवं नः शमेयतु।।'

आचार्या, मनुर्नदी-तडाग-वापी-कूपादीनां निर्माणकार्यं स्वग्रन्थे मानवकर्त्तव्यत्वेन निर्धारयति स्म। एतेषां जलस्त्रोतसां संरक्षणं प्रति मानवं प्रेरयन् मनीषिवरो मनुः जलस्त्रोतस्संरक्षणं मानव-वैभवस्य प्रसन्नतायाश्च साधकमिति निरदिशत् जलप्रदूषण-निवारणस्य विशिष्टविधेयत्वं निरूपयन् मनुः जलसंरक्षणकार्यं धर्मजनकमिति प्रकाशितवान्।

महर्षिणा वाल्मीकिनापि स्वरचिते रामाणाख्ये महाकाव्ये नदीनां सागराणां च रमणीयं वर्णनं कृतम्। पञ्चमवेदरूपेण प्रसिद्धे महाभारतेऽपि गङ्गा-यमुना-गोदावरी- नर्मदादीनां पवित्राणां नदीनां सुन्दरं चित्रणं प्राप्यते। सरस्वतीनद्या जलमप्यत्यन्तं पवित्रं विद्यते। अस्यां स्नानेन पापानां क्षयो भवतीति मन्यते।

जलममृतमेवं इदमौषधिवदेव जीवनाधायकमित्यपि मनीषिभिः स्वीक्रियते। वर्षाजलं पर्यावरणदूषणनिवारकमित्यपि शास्त्रकाराणां मतम्। किं बहुना वैदिकसाहित्ये जीवनजलयोः पर्यायत्वं स्वीक्रियते। मानवस्य प्रकृतेश्च जीवनं प्राणतत्त्वसमाश्रितमिति वैदिक-साहित्ये बहुत्र चर्चितम्। तेन हेतुनान्तरिक्षे पृथिव्यादिषु च देवत्वं मानवसत्कल्पनया प्रतिष्ठिम्। एतत्तत्त्वसम्बद्धाभिः स्तुतिभिरेकतस्तु प्रकृतेः प्रत्यक्षावबोधः यत्र सूर्यचन्द्रतारकाणां मेघ-पवन-समुद्र-सरिद्-विद्युद्-वन-वृक्षाग्नि-वर्षादीनां पशुपक्षीणां च स्पष्टपरिचयो भवतीति स्पष्टमेव। अन्यतस्तावदेतेषु प्राकृतिकेषु तत्त्वेषु व्याप्तानामिन्द्र-वरुण-उषा- पवन-पृथिव्यग्न्यादि-देवानां सत्तावबोधो भवति। एतेषां तत्त्वानां माध्यमेन वैदिकतत्त्वद्रष्टारः सत्यशक्तिप्रकाश-उर्जा-स्फूर्त्यविगादीनां प्रत्ययानामाह्वानमपि कृतवन्तस्तथा च तान् देवान् सुभिक्ष-सम्पादिकां वर्षां सम्पादयितुं प्रार्थितवन्तः। एवं नद्यादिरूपेण भूमण्डले व्यापकस्य जलतत्त्वस्य संरक्षणं विधेयमिति समुपदिष्टं मन्त्रदर्शिभिस्तेषां जलस्त्रोतसां देवत्वं स्थापितम्।

ज्योतिषशास्त्रस्य पर्यावरणदृशा महत्त्वम्

प्राचीनभारतीय-ज्योतिषशास्त्रे सूर्यचन्द्रादीनां ग्रहाणां पूज्यत्वेन स्वीकारः प्राचीनानां भारतीयानां पर्यावरणविषयकं चिन्तनं प्रस्तौति। शास्त्रेऽस्मिन्तेषां ग्रहाणां देवत्त्वमपि प्रतिष्ठापितम्। इमे ग्रहाः पृथिव्यां विद्यमानानां वन्यप्राणिनां जीवनं साक्षात् प्रभावयन्ति। इमे ग्रहाः खगोले विशिष्टगतिवशात् समग्रमपि पर्यावरणं सन्तुलयन्ति। एतत् सर्वविदितं तथ्यं यत् पूर्णिमायां रात्रिसमये चन्द्रेणाकृष्टस्य समुद्रस्य जलमुत्थानं प्राप्नोति तथा च कृष्णपक्षे यथायथं चन्द्रकलानाम् ह्रासः भवति शुक्लपक्षे च यथायथं वृद्धिर्भवति तथा तथा सम्पूर्णेऽपि पर्यावरणे कश्चन विशिष्टः प्रभावो दरीदृष्यते। एवमेव सूर्यग्रहो भूमौ उर्वरतां सम्पादयति, मानवहितसाधकानां मेघानाञ्च सम्पादनं करोतीति सर्वापरोक्षम्। अन्येऽपि ग्रहाः पर्यावरणं बहुधा प्रभावयन्ति। तत्र ज्योतिषशास्त्रे एतेषां ग्रहाणां विवेचनेन सुस्पष्टं यदस्माकं महर्षयः स्वच्छ-पर्यावरणं प्रति कथं दत्तावधाना आसन्निति। मनुष्यस्य स्वास्थ्यं शुद्धेन पर्यावरणेन सम्भाव्यते। शुद्धं वातावरणं स्वस्थं च जीवनं सर्वविधस्य विकासस्य साधकं भवतीति विचिन्त्यैव संस्कृतसुकविभिर्वातावरणशुद्धिर्बहुधा वर्णिता तेन हि तेषां मनीषिणां पर्यावरणं प्रति जागरुकत्वं स्पष्टं परिलक्ष्यते। मातृवत् पृथिव्यां श्रद्धाभावो वेदेषु बहुधा प्रकाशितः -

'माता भूमिः पुत्रोऽहं पृथिव्याः'।

एवम्विधेषु मन्त्रेषु भूमण्डलेन मानवजातेः स्नेहमयः सम्बन्धः प्रदर्शितः।

पर्यावरणं संरक्षितुं चिन्तनपरायणैर्महर्षिभिः प्राकृतिकसम्पदाया विध्वंसकानां दण्डनीयत्वं बहुत्र समुपदिष्टम्। तत्र मनुस्मृतौ मनुना निर्दिष्टमस्ति यद् वनस्पत्यादिछेदनाज्जना नरकं यान्ति, यद्यनवधानतावशाद् वनस्पतीनां नाशोऽनिच्छया भवति तदा प्रायश्चित्तानुष्ठानमावश्यकमिति धर्मग्रन्थेषु प्रकाशितम्। सन्दर्भेऽस्मिन् मनुः स्पष्टमेवं निर्दिष्टवान् -

फलदानां तु वृक्षाणां छेदने जप्यमृक्शतम्।
गुल्मवल्लीलतानां च पुष्पितानां च वीरुधाम्।।
अन्नाद्यजानां सत्त्वानां रसजानां च सर्वशः।
फलपुष्पोद्भवानां च घृतप्राशो विशोधनम्।।

वैदिकमहर्षिभिर्या जागरूकता पर्यावरणसुरक्षामधिकृत्य समाजे प्रतिष्ठापिता तां संस्कृत-सुकवयः सुनियोजितरूपेणाग्रेसारितवन्तः। इमे कवयः महर्षिभ्यः समासादितां पर्यावरणसंरक्षणविषयकज्ञानस्य धारां स्वप्रज्ञाबलेन परिष्कृतवन्तः। परिष्कृत्य चास्या ज्ञानधारायाः समाजे प्रचारं नूतनया सरण्याऽनुष्ठितवन्तः। महर्षिवाल्मीकिव्यासादयश्च एतादृशाः संस्कृतसुकवयः सन्ति, येषां वासोऽरण्यस्थितेषु पर्णकुटीरेष्वासीत्। इमे कवयो निर्झराणां कलकलनिनादं श्रुतवन्तः। कुड्मलानां सुगन्धो गन्धवाहस्य सुखजनकः स्पर्शश्चैतैरनुभूत एवमेतेषां कवीनां प्रकृतेर्नैसर्गिकसुषमां प्रति सहजाकर्षणं सुस्पष्टम्। स्थितावस्यां प्रकतिं प्रत्यनुरागः कविषु स्वाभाविक एव। अस्याः परम्पराया निर्वाहः कालिदास-बाणभट्ट-भवभूति-प्रभृतिभिः परवर्तिभिः कविभिरपि सम्यक्तया कृतः। अत एवैतेषां साहित्ये मनोरमं प्रकृतिवर्णनं प्राप्यते। यस्यां प्रकृतौ महर्षिभिर्देवत्वं पुरा साक्षात्कृतं तस्या मनोरमं रूपं कविर्वाल्मीकिर्निरीक्ष्याह्लादितो भवति। इयमेव प्रकृतिः कालिदासस्य काव्येषु संश्लिष्टसौन्दर्यमुपस्थापयति। कविकुलगुरुः कालिदासः प्रकृतेः सूक्ष्मातिसूक्ष्ममपि पक्षं स्वसाहित्ये प्रकाशयति स्म। ऋतुसंहारे मेघदूते चात्यन्तं मनोरमं प्रकृतिवर्णनं कविवरेण कालिदासेन प्रस्तुतमिति साहित्यमर्मज्ञा जानन्त्येव। कालिदासस्य प्रकृतिवर्णनं तरुगुल्मादिष्वपि जीवनाधानं करोति। कालिदासस्य पार्वती शकुन्तला च निसर्गकन्ये आस्तामिति वर्णयता कालिदासेनानयोर्निर्माणं प्रकृतौ विद्यमानैः सौन्दर्यतत्त्वैः सञ्जातमिति कल्पितम्।

तत्र अभिज्ञानशाकुन्तलस्य चतुर्थाङ्के कालिदासेन कृतम् प्रकृतिवर्णनं सविशेषं हृदयतलस्पर्शि विद्यते। कण्वाश्रमे भारतीयचिन्तनानुरूपं प्रकृतेर्मानवजीवनस्य च सामरस्यं दृश्यते। शकुन्तलायाः पतिसदनगमनकाले तपोवने कण्वमाध्यमेन मानवीयाया भावनाया मधुराभिव्यक्तिर्यथा कालिदासेन कारिता तस्या वर्णनमपि दुःशकम्। प्रकृति- साहचर्यभावस्य सुकुमारतया तादात्म्यं कालिदासकाव्ये यथा- स्थापितन्न तथान्यत्र दृश्यते। प्रकृतिसन्दर्भे कण्वमहर्षेरिदं कथनं प्रकृतिं प्रति कालिदासानुरागमेव प्रमाणयति -

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनाऽपि भवतां स्नेहेन या पल्लवम्।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्।।[8]

रघुवंश महाकाव्ये न केवलं इक्ष्वाकूनां कथा किन्तु अत्र पर्यावरणचित्रणं न केवलं उत्तरभारत-पर्यन्तं एव सीमितमपितु सम्पूर्ण-भारतीय-पर्यावरणस्य समावेशः अत्र कृतः कविना। पर्यावरणचित्रणसन्दर्भे दिलीपस्य वशिष्ठाश्रमगमनम्, रघोः दिग्विजययात्रा इन्दुमतीस्वयंवरे राज्ञां वर्णनम्, अजस्य साकेततः विदर्भयात्रा, दशरथस्य वनविहारः, रामस्य लंकातः अयोध्यायां पुष्पकविमानद्वारा यात्रा, कुशेन कृतः अयोध्यायाः ज़ीर्णोद्धारः इत्यादिषु पर्यावरणीय-दृष्ट्या उन्नत-वृक्षाणां पंक्तयः, सुखदवायूनामनुभवः, मयूर-मृग-सारसादीनामुपस्थितिः, कीचकनादश्च वनप्रान्तेषु पूर्णपर्यावरण-समुपस्थितिं उद्घोषयन्ति। अनातपत्रं राजनमातपक्लान्तं विलोक्य शीतलः पवनः तं शिशेवे। गोचारणविधौ शस्यानां गिरिगह्वरस्य देवदारुवृक्षस्य वनजगात् रक्षणविधिः वानस्पतिकं वैशिष्ट्यं सूचयन्ति।

मेघदूते मेघमाध्यमेन महाकविः वर्षाकालिक-भारतीय-पर्यावरणस्य समग्रं चित्रणं मानसूनप्रवाहमार्गजलवायुविज्ञानं च चित्रयति। पर्यावरणस्य अक्षयो भण्डारः मेघः। मानवानां वर्षायाः सौन्दर्यं प्रति अदम्यः आकर्षणभावः जीवने तस्याः अनिवार्यतां संसूचयति। मेघदूते मेघस्य अपूर्वं वर्णनं प्राप्यते। मेघं प्रति कालिदासस्य भावात्मकः सम्बन्धः पर्यावरणदृष्ट्या सार्थपूर्णम्। मेघस्य दौत्यकर्मणि नियोजनं पर्यावरणीय-सार्थकतां प्रकटयति।

वन्यप्राणिनः प्रति पर्यावरणं प्रति च मानवानां स्नेहो यदि कालिदासदर्शित-दिशा भवेत्तदाधुनाऽपि संसारे पर्यावरणं सर्वथा प्रदूषणरहितं सम्भाव्यते।

भारतीयसंस्कृतवाङ्मये पर्यावरणस्य विविधानां पक्षाणां विलक्षणं समन्वयः प्रतिपदं दृश्यते। मन्त्रेऽस्मिन् पर्यावरणसम्बद्धानां तत्त्वानां समन्वयस्य प्रकारो विलोकनीयः -

द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वं शान्तिः शान्तिरेव शान्तिः, सा मा शान्तिरेधि।।

सम्प्रति समस्तेऽपि विश्वे पर्यावरणसुरक्षायाः प्रश्नो विचारकाणां चेतांसि चिन्तया समाकुलयति। वस्तुतो विषयेऽस्मिन् पुनः संस्कृतसाहित्यानुशीलनं विशिष्टं महत्त्वं भजते। अद्य प्राचीनानां परम्पराणां पुनरुज्जीवनस्य कालः सम्प्राप्तोऽस्ति। पर्यावरणतत्त्वानामनुदिनं प्रवर्धमान उपेक्षाभावस्तदैव निरुद्धो भविष्यति, यदा प्राचीन-महर्षिणां चिन्तनं प्रति पुनः जगतीतले श्रद्धाविष्कारः स्यात्।

वैज्ञानिकेऽस्मिन् युगेऽनुदिनं नूतना आविष्कारा मानवसमाजमुन्नेतुं जायन्ते। परमिमे वैज्ञानिका आविष्काराः प्रकृतिं भृशं प्रदूषयन्ति। सम्प्रति प्रदूषणेनानेन मानवजीवनमेव संकटाकुलं दृश्यते। अस्माकं महर्षयो दिव्यज्ञानसम्पन्ना आपात-रमणीयेषु तथा च परिणामे दुःखदायकेषु एतादृशेष्वाविष्कारेषूदासीना आसन्। इदमौदासीन्यं पर्यावरणप्रदूषणभियासीदिति सुनिश्चितं तथ्यम्।

पुनः समस्तेऽपि विश्वे यदि प्रकृतिं प्रति देवत्वभावः प्रादुर्भविष्यति तर्हि समस्तेषु जीवेष्वनुरागः प्रतिष्ठतो भविष्यति, तथा चास्माकं पर्यावरणं सर्वथा प्रदूषणमुक्तं भविष्यतीति शम्।

सन्दर्भाः

1. श्रीमद्भगवद्गीता 3-14
2. विष्णुपुराणम् 1-6-8
3. यजुर्वेदः 2-21

4. यजुर्वेदः 3-1
5. ऋग्वेदः 1-1
6. शतपथब्राह्मणः
7. ऋग्वेदः 10-97-2
8. ऋग्वेदः 10-97-4
9. अभिज्ञानशाकुन्तलम् 4-8

□□□

अथर्ववेद में औषधीय तत्त्व और आज के युग में उसकी प्रासंगिकता

जय प्रकाश वर्मा

(*Atharvadeda* (*AV*) is rightly recognised by the scholars as लोकवेद. Each and every aspet of life has been depicted into *mantras* of AV. The medicines and medicinal elements are not exceptions to it. The author has tried to establisth that the *aṣṭāṅgas* of *Āyurveda* are found in a developed form in the *mantras* of AV.)

वेद मानव-संस्कृति, सभ्यता, धर्म एवं ज्ञान-विज्ञान की दृढ़ आधारशिला है। इन्हें सर्वज्ञानमय एवं सभी धर्मों का मूलग्रन्थ माना गया है मनुस्मृति का कथन उचित एवं प्रासङ्गिक-
'सर्वज्ञानमयो हि सः'[1], *'वेदोऽखिलो धर्ममूलम्'*[2]।

मानव धर्मों का पालन स्वस्थ शरीर द्वारा ही सम्भव है। अतः कालिदास ने ठीक ही कहा गया है- *'शरीरमाद्यं खलु धर्मसाधनम्'*[3]। चरकसंहिता में धर्म, अर्थ, काम और मोक्ष की प्राप्ति का मूलभूत साधन उत्तम स्वास्थ्य को बतलाया गया है।[4] सामान्यतः चारों वैदिक संहिताओं में मानव स्वास्थ्यपरक विचार सहज-प्राप्त है तथापि अथर्ववेद में चिकित्सा एवं औषधि तत्त्वों का विशद उल्लेख प्राप्त है। अथर्ववेद में दृष्ट सूक्त का अधोलिखित मन्त्र अनुध्यातव्य है-

आथर्वणीराङ्गिरसीर्दैवीर्मनुष्यजा उत।
औषधयः प्रजायन्ते यदा एवं प्राण जिन्वसि।।[5]

इस मन्त्र के अनुसार अथर्वणी, आङ्गिरसी, दैवी एवं मनुष्यजा ये वैदिक काल की बीज-रूप चार चिकित्सा-पद्धतियां प्रचलित थीं।

अथर्वणी चिकित्सा-पद्धति में अथर्ववेदोक्त मन्त्रों के प्रयोग से ही रोगों का शमन किया जाता है। इसके अन्तर्गत मानस-चिकित्साविधि (Psycho Thearpy) तथा स्वसंकल्पविधिः (Auto Suggestion) आते है।

आङ्गिरसी चिकित्सा में वनस्पतियों एवं प्राणियों से प्राप्त पोषक तत्त्वों को रोगी के शरीर में पहुँचाकर चिकित्सा की जाती है जो आधुनिक एलोपैथिक (Allopathic) चिकित्साविधि से समतुल्य ही है।

दैवी । चिकित्सा का अभिप्राय वैदिक ग्रन्थों में प्राप्त तैंतीस प्राकृतिक देवों से है। जिनके माध्यम से चिकित्सा का विधान किया गया है। आधुनिक विज्ञान के अनुसार इसे प्राकृतिक चिकित्सा (Naturopathy) कहा जा सकता है।

मनुष्यजा या मानवी चिकित्सा के अन्तर्गत मनुष्यों द्वारा तैयार की गयी औषधियों से रोगों का उपशमन किया जाता है। यह आधुनिक औषधि-चिकित्सा विधि (Medicine) के समतुल्य है।

अथर्ववेद में वर्णित चिकित्सासम्बन्धी मन्त्र एक स्थान पर क्रम से प्राप्त न होकर यत्र-तत्र बिखरे पड़े हैं, जिनका विभागशः वर्गीकरण करना दुरूह दृष्टिगत होता है तथापि परवर्ती भैषज्य-विज्ञानियों-चरक, सुश्रुत, वाणभट्ट आदि के परिष्कृत ग्रन्थों की सहायता से सम्पूर्ण आयुर्वेद को आठ भागों में विभक्त किया गया है-जिसे अष्टांग चिकित्सा कहते हैं।

1. शल्यचिकित्सा- इसके अन्तर्गत तीक्ष्ण मन्त्रों द्वारा शरीर के दूषित तत्त्वों को बाहर निकाला जाता है। यह आधुनिक शल्यविज्ञान (Surgery) है। अथर्ववेद के इस मन्त्र में इस प्रसङ्ग को देखा जा सकता है -

अमूर्या यन्तियोषितो हिरा लोहिवाससः।

अभ्रातर इव जामयस्तिष्ठन्तु हतवर्चसः।।[6]

इस मन्त्र के माध्यम से नाड़ीछेदन का विधान किया गया है एवं उस समय बहने वाले रक्त को रोकने का ज्ञान प्राप्त होता है। अथर्ववेद के एक सूक्त[7] के द्वारा शरीर की अलग-अलग अस्थियों को भद्रा एवं रोहिणी औषधियों द्वारा जोड़ने का उल्लेख प्राप्त होता है।[8] शरीर में किसी भी प्रकार के विषैले अस्त्र-शस्त्रादि के विष-प्रभाव को नष्ट करने के लिए भी मन्त्र विहित है-

वषट् ते पूषनस्मिन्त्सूतावर्यमा होता कृणोतु वेधाः।

सिस्रतां नार्यतप्रजाता वि पर्वाणि जिह्नतां सूतवा उ।।[9]

जिससे शल्य-चिकित्सा के उत्कर्ष का ज्ञान प्राप्त होता है।

2. शालाक्य-चिकित्सा - इसके अन्तर्गत गले के ऊपर के सभी अङ्गों की चिकित्सा का विधान है इसलिए इसे ऊर्ध्वांग चिकित्सा कहते हैं। अथर्ववेद में शीर्षक्ति, शीर्षामय तथा शीर्ष एवं शिर के इन तीनों रोगी की चर्चा की गयी है-

शीर्षक्तिं शीर्षामयं कर्णशूलं विलोहितम्।

सर्व शीर्षण्यं ते रोगं बहिर्निर्मन्त्रयामहे।।[10]

उदित होते हुए सूर्य की किरणें समस्त शिरोरोगों के लिए उत्तम औषधि मानी गयी है-

उद्यन् आदित्यरश्मिभिः रोगमनीनशः।[11]

खाँसी की बीमारी के लिए तो सूर्य की किरणें रामबाण बतायी गयी हैं।[12]
सूर्य को ही नेत्रों की ज्योति बढ़ाने वाला बताया गया है-

सूर्यश्चक्षुषामधिपतिः स मावतु।[13]

कुष्ठ नामक औषधि को अथर्ववेद में शीर्षामय तथा नेत्ररोग का नाशक कहा गया है-

शीर्षामयमुपहस्त्वायामक्ष्योस्तन्वो रपः।

कुण्ठस्तत् सर्व निष्करद् ....।।[14]

इसके अतिरिक्त नेत्र-रोगों के निवारण के लिए आङ्गिडमणि एवं दिव्य सुपर्ण औषधि का भी उल्लेख किया गया है। बालों को काला करने, सुन्दर रखने तथा गंजेपन के निवारणार्थ औषधियों का नामनिर्देश किया गया है।[15]

3. कायचिकित्सा- इसके तहत मानव एवं पशुओं के उदर एवं शरीर से सम्बद्ध वात-कफ-पित्त, जलोदर, ज्वर, यक्ष्मा तथा अनेकविध रोगों की चिकित्सा की जाती है। अथर्ववेद में कायचिकित्सा की पर्याप्त सामग्री प्राप्त होती है- कर्णशूल, विसर्प, यक्ष्मा, अङ्गभेदम्, ज्वर, बलास रोग, काहा (खांसी), गुदा, कफ, फेफड़ा, आँतों, नाड़ियों, वातीकार (गठिया), मेरूरज्जु आदि नख से शिख तक प्रत्येक अंगों की चिकित्सा का विधान किया गया है।[16]

4. भूतविद्या- इसे ग्रहचिकित्सा भी कहा जाता है, क्योंकि इसके अन्तर्गत दैवी विपत्तियों एवं ग्रहों आदि के कुप्रभाव को शान्त करने का विधान किया गया है। गन्धर्व, राक्षस, यक्ष, पिशाच, ग्रह आदि के प्रकोप से दूषित शरीर एवं मन वाले व्यक्तियों की चिकित्सा दान, पूजा-होमादि के माध्यम से की जाती है।[17] अथर्ववेद के अनुसार भूतोन्माद का उपचार अजशृङ्गी, पिप्पली, जटामांसी, अतिबला जैसी औषधियों के होम, रसपान, चूर्ण, गोली आदि के सेवन से किया जाता है।

5. कौमार-भृत्य- इसमें बालकों के भरण-पोषण, रोगों की चिकित्सा तथा धायी की परीक्षा का विधान किया गया है। इसे बालचिकित्सा भी कहा गया है। अथर्ववेद के अधोलिखित मन्त्र में कहा गया है -

पर्वताद् दिवो योनेरङ्गात् समाभृताम्।

शेषो गर्भस्य रेतोधाः सरौ पर्णनिवादधत्।।[18]

में जहां गर्भाधान की बात कही गयी है वहीं गर्भ की रक्षा का विचार भी स्पष्ट दृष्ट है।[19] सुखपूर्वक प्रसव[20] तथा जन्मकालिक शुभाशुभ क्षणों पर विचार करके हानिकारक प्रभाव[21] को दूर करने का भी विधान किया गया है।

6. आगदतन्त्र- इसके अन्तर्गत विभिन्न प्रकार के विषैले जीवों से रक्षा एवं विषों के प्रतिकार की चिकित्सा की जाती है। इसीलिए इसे विषचिकित्सा, द्रष्ट्रा-चिकित्सा, विषगर-वैरोधिक-प्रशमन भी कहते हैं। अथर्ववेद में सर्पविष, वृश्चिक-विष, विषाक्त कीटाणु, विषाक्त बाण एवं इसकी चिकित्सा का उल्लेख किया गया है-

सूपर्णस्त्वा गरुत्मान् विष प्रथममावयत्।

नामीमदो नारुरुप उतास्मा अभवः पितुः।।[22]

इसके अलावा अन्य मन्त्रों में भी ऐसा विधान प्राप्त होता है।[23] सर्पविषनाशन के लिए वाद्ययन्त्र के तीव्रस्वर- (उग्रेण ते वचसा बाद्य आदुते)[24] कटुतुम्बी या तावुव (तावुवेनारसं विषम)[25] तस्तुव या कड़वी तोरई (तस्तुवेनारसं विषम्)[26] दर्भ, तरुणक, अश्ववार (कासतृण) परुषवार या मूज (दर्भः शोचिस्तरुणकम् अश्वस्यवारः परुस्यवारः)[27], तौदी, घृताची (तौदीय नामासि कन्या घृताची ना वा आसि)[28] अपराजिता तथा ज्येष्ठीमधु[29] के प्रयोग का वर्णन भी प्राप्त होता है।

7. रसायन-तन्त्र- इसके अन्तर्गत औषधियों तथा उपचार के द्वारा सभी रोगों को शान्त किया जाता है। यह पद्धति स्वास्थ-लाभ के साथ ही साथ आयुवर्द्धक भी होती है। इसे जराचिकित्सा भी कहते हैं। अथर्ववेदस्थ अनेक मन्त्रों में जल को रसायन मानते हुए इसके गुणों की प्रशंसा की गयी है-

आप इद वा भेषजीरापो अमीवचातनीः।

आपो विश्वस्य भेषजीस्तास्त्वा मुञ्चन्तु क्षेत्रियात्।।[30]

जल को रसायन बनाते हुए अथर्ववेद के अधोलिखित मन्त्र द्वारा चिकित्साविधान प्राप्त होता है-

हिमवतः प्रस्रवन्ति सिन्धौ समहसङ्गमः।

अपो ह मह्यं तद् देवीददन् हृद्द्योतभेषजम्।।[31]

इसके अतिरिक्त अथर्ववेद में धातुओं के निर्माण और उपयोग की प्रक्रिया का संकेत मिलता है। ऐसा उल्लेख प्राप्त होता है कि हिरण्यमणि धारण करने से आयुष्य एवं वर्चस्व की वृद्धि होती है।[32] अथर्ववेदीय मन्त्र के अनुसार लौह, चांदी एवं सुवर्ण के सम्मिश्रण से निर्मित नवशलाका मणि के धारण से प्राणशक्ति की वृद्धि होती है।

नव प्राणान्नवभिः संमिमीते दीर्घायुत्वाय शतशारदाय।

हरिते त्रीणि रजते त्रीण्ययसि त्रीणि तपसाविष्ठितानि।।[33]

8. वाजीकरण- वाजीकरण चिकित्सा के अन्तर्गत वीर्य एवं शक्ति प्राप्त करने का विधान किया गया है, इसे वृष-चिकित्सा भी कहते हैं। धातुगत दोष, वीर्यक्षय और शक्तिहीनता के कारण मनुष्य सन्तानोत्पत्ति में असमर्थ हो जाता है उसकी शक्ति को बढ़ाकर उसे सन्तानोत्पत्तियोग्य बनाने के लिए वृषा (कपिकच्छू)[34], अर्क (आक, मदार)[35], कल्याणी (वन उड़द)[36], कुष्ठ (कूठ) आदि को अनेक मन्त्रो में उपयोगी बताया गया है। इसी प्रकार स्त्रीजनित बन्ध्यात्व-रोगचिकित्सा का भी विधान किया गया है।

इस प्रकार चिकित्सा की दृष्टि से अवलोकन करने से ज्ञात होता है कि अथर्ववेदस्थ मन्त्रों में चिकित्सकीय तत्त्व बीज रूप में उपलब्ध होते हैं। जो विकासवादी आधुनिक युग में भी उपादेय

है। प्रत्यक्ष एवं अप्रत्यक्ष रूपेण आज भी उन्हीं औषधियों का प्रयोग किया जा रहा है। आज जंब लोग धीरे-धीरे एलोपैथिक चिकित्सा से ऊब रहे हैं उन्हें मूल प्राकृतिक औषधियों की आवश्यकता महसूस हो रही है। अतः अथर्ववेदस्थ चिकित्सा-तत्त्व आज भी प्रासंगिक एवं उपादेय है- ऐसा प्रतीत होता है। आवश्यकता है कि आधुनिक चिकित्सक अब संस्कृतज्ञों की सहायता से इस विधा को उपयोगिता में लाने का प्रयास करें।

सन्दर्भ

1. मनुस्मृति, 2/7
2. वहीं, 2/6
3. कुमारसम्भवम्,5/35
4. चरक संहिता, 1/15
5. अथर्ववेद, 11.4.16
6. वहीं, 1.7.1
7. वहीं,11.4.9 एवं 11.6109
8. वहीं,11/4/17
9. वहीं, 1/11/1
10. वहीं, 9/8/1
11. वहीं, 9/8/22
12. वहीं, 6/90/1-2,13-5/24/9
13. वहीं,5/24/9
14. वहीं,5/4/10
15. वहीं,6/21/3,6/136/1-2
16. वहीं,9/8
17. वहीं,4/37
18. वहीं,5/25/1
19. वहीं,6/17/1-4
20. वहीं,1/11/1-6
21. वहीं,6/110/1-3
22. वहीं,4/6/3
23. वहीं,4/6/1-8
24. वहीं,5/13/3
25. वहीं,5/13/10

26. वहीं,5/13/17
27. वहीं,10/4/2
28. वहीं,10/4/24
29. वहीं,10/4/15
30. वहीं,3/7/5
31. वहीं,6/24/1
32. वहीं,19/26/3
33. वहीं,5/28/1
34. वहीं
35. वहीं,6/72/1
36. वहीं,4/1/1

Contribution of Vasiṣṭha Gaṇapati Muni to the concept of lord Indra

Savitri Panda

(इन्द्रो वैदिकदेवता-रूपेण प्रसिद्धः। पुराणेष्वपि इन्द्रतत्त्वस्य महती भूमिका द्रष्टुं शक्यते। सः कदाचिन्मित्ररूपेण कदाचिच्च शत्रुरूपेण वर्णितोऽस्ति। प्रस्तुते शोधपत्रे लेखिकया काव्यकण्ठस्य गणपतिमुनेः इन्द्रतत्त्वमधिकृत्य ये विचारास्तस्य काव्येषु प्रतिफलिताः दृश्यन्ते तेषां विवरणं शोधात्मकशैल्या प्रस्तुतम्। गणपतिमुनिना इन्द्रसहस्रनाम इत्याख्यं यत् स्तोत्रराज्यं प्रणीतं तत्र इन्द्रस्य ऋग्वेदाधृतानि सहस्रनामानि परिगणितानि सन्ति। एतदतिरिक्तं तेनान्यान्यपि दश काव्यानि इन्द्रतत्त्वमधिकृत्य विरचितानि। यथा-इन्द्रसहस्रे प्रथमं शतकम्, इन्द्रविंशतिः, इन्द्रसप्तकम्, इन्द्रेश्वराभेददसूत्रम्, चतुर्व्यूहसूत्रम् तथा इन्द्रनामनिर्वचनादीनि।)

Indra in Vedic and Post-Vedic Literary Heritage : Lord Indra is identified as one of the important God in Vedic mythology. While reading the Vedas one can see that Lord Indra is hymned there with a unique position among all other Vedic deities. He is addressed in 250 hymns or almost a quarter of the whole accumulation. In about 50 more hymns, he is praised along with other deities. He has been praised by the Ṛṣis, as he is the lord of people,[1] he is unrivalled suzerain of the whole universe,[2] pours down life-giving heavenly waters, he makes the sun mount high in the heaven of our mentality,[3] and the great drinker of soma juice, known as Somapā.[4] But Indra has been relegated in his status and importance in the later Vedic and Purāṇic texts. In *Purāṇas* he is portrayed as a *Lokapāla*, is described as flashing with luster and endowed with great valor.[5] Apart from *Rāmāyaṇa, Mahābhārata, Devībhāgavata, Agnipurāṇa, Viṣṇu-purāṇa, Brahmāṇḍa-purāṇa, Skanda-purāṇa*, we do not find sufficient resources for Indra. No single *Purāṇa* solely dedicated to Indra. In classical period too, except few passing references, no such independent treatise is available on Indra. Similarly, invocations in praise of Indra are rarely found in the entire devotional literature. The worship of Indra came to an end even before the time of Lord Krishna as is evidenced by the Govardhana episode in the life of Krishna. There stands no temple or

monument consecrated to him now-a-days except at *Suchidram* on the southernmost tip of Indian peninsula near Kanya Kumari.[6] In this process, one can notice the origin and evolution of the mythological aspects of lord Indra as very rare and the later Post-Vedic, Purāṇic and Classical literatures have not provided us sufficient resources for Lord Indra.

Kāvyakaṇṭha Vaśiṣṭha Gaṇapati Muni on Lord Indra -

At this stage of decline of the importance of Indra, the poet and a sagely scholar Kāvyakaṇṭha Vaśiṣṭha Gaṇapati Muni (1878-1936), the chief disciple of Bhagavan Ramana Maharshi has attempted to compose some hymns in many forms, which depicts the importance of Indra. To Gaṇapati Muni, however, Indra is a living God. He dedicated his life for him. All his study and research all his activities spiritual and secular were directed towards Indra. He found single line *indra Gāyatri mantra* in the *Ṛg-Veda* "*indro viśvasya rājati*"[7] and gave currency to it among his disciples. While he was at Madras, he founded an organization called *Indra-Sabhā*, the members of which offered *homas* to Indra in their daily worship. He wrote a number of hymns in many forms to explain the true nature of Indra. Such as, *Indrasahasranāmastotram, Indrasahasre prathamam śatakam, Indrasahasre kaṭākṣastavakaḥ,* Indraviṁśatiḥ, *Indrasaptakam, indrāṇīsaptaśatī, Indragītam, i ndreśvarāhedasūtram, caturvyūhasūtram, aindrasahasranāmabhāṣyam, Indragāyatrībhāṣya.*

The detailed description of the above texts as follows :

1. Indrasahasranāmastotram : *Indrasahasranāmastotram,* is a very scared and chanted *stotra*, composed by Vasiṣṭha Gaṇapati Muni. Here, Muni has selected all the thousand names of Indra from *Ṛg-Veda* and prepared it in a stupendous *stotra*. In the treatise, Muni has given ten sections, each containing hundred names followed with a veriety of styles of descriptions. Many of them are self explanatory and easily comprehensible. Written in *anuṣṭubh* meter, the whole *stotra* nicely highlighted all the attributes of Lord Indra. Each and every name has its own significance. For example,

इन्द्रो देवतमोऽनीलः सुपर्णः पूर्णबन्धुरः। विश्वस्य दमिता विश्वस्येशानः विश्वचर्षणिः।

निदरख देवातामखङनरूहाह्न पह्मरनाबानदहुराह्न

वम्निवासया दामतिब्र वम्निवासयेम्नब्रनख वम्निवाचारश्वान्वह्नि[8] ।।

In this *mantra* we can find out seven auspicious names called out from *Ṛgveda,* of Indra, which are explaining different attributes of Him.

इन्द्रः - lord of divine mind.

देवतमः - most divine.

अनीलः सुपर्णः - a purple colored bird.

पूर्णबन्धुरः - fully loaded car, that car of Indra is laden with all the spiritual Light, Might and other felicities to be given to the devotee .

विश्वस्य दमिता - educator and controller of all beings of the world.

विश्वस्येशानः - the lord of all beings of the world.

विश्वचर्षणिः - all-seers.

2. Indrasahasre prathamaṁ śatakam- *Indrasahasre prathama śatakam* is a composition of one hundred verses, Muni has written them in honor of lord Indra. It is believed that he had a mind to complete the thousand verses, but he could not do so in his life time, and these hundred verses are collected and put under the tittle indrasahasre prathamaṁ śatakam. The śataka has four sections, named as *Stabakas*. Each *Stabaka* having twenty five verses composed in a particular meter. From all the verses, written by Muni one can get the proper understanding of the concept of Indra. These verses enlighten more about Vedic vision of Indra. For example,

मघवते शचीहृदयहारिणे। भगवते नमरु कुलिशधारिणे।।

माहावाते म्नाचरुहन्भदायाहब्ररान्वै। वहागावाते नामाह्न कुलम्निदहब्ररान्वे।।[9]

I salute, the Lord, possessor of wealth, conqueror of heart of śacī and the holder of thunderbolt.

वज्रप्रहरणं विश्वस्य शरणम्। गायामि सगणं तदूह्म सगुणम्।।[10]

I sing the nature of that *Brahman*, who is the refuse of the world and who strikes with thunderbolt accompanied by god of winds.

3. Indrasahasre kaṭākṣastavakaḥ : A work of Muni, based on recitation of the elegant glimpse of Indra for his devotees. This *stabaka* comprises twenty-four verses. Each verse invoke the blessed glance of lord Indra. For example:

तं दशशताक्षं शीतलकटाक्षम्। नौमि धुतपाशं वज्रधरमीशम्।।[11]

यत्र तव पूर्णा दृष्टिरतिभद्रा। भेदशतबुद्धिस्तस्य न दरिद्रा।।[12]

As your auspicious glance follows fully on the invoker, then his hundred thoughts (all) are demolished and he is no poorer.

4. Indraviṁśatiḥ *: Indraviṁśatiḥ* is a collection of twenty verses, divided in to four sections having 25 verses each. Here Indra is mentioned as

the master of the whole animate world. In a verse, Muni prays him to uplift the world from the state of mortality to immortality by removing all fears and sufferings:

अखिलनायकं मखभुजां वरम्। अरिविदारणं हरिहयं भजे।।

(akhilanāyakaṁ makhabhujāṁ varam

arividāraṇaṁ harihayaṁ bhaje.)[13]

I salute to the Hari, who is the leader of all, and whose arms move to destroy the enemies.

5. Indrasaptakam : *Indrasaptakam*, consists of seven verses, written for attainment of grace of lord Indra. All the verses are composed in *mañjubhāṣiṇī* meter. Here the Muni extols the grace of Indra in these seven stanzas. For example,

यदि निर्विबन्धपदवी महागुहा यदि तत्र मूलशुचिशक्तिनिर्झरी।

यदि देवराजकरुणोन्मुखं मनो न किमप्यसाध्यमिह देहधारिणाम्।।

(yadi nirvibandhapadavī mahāguhā

yadi tatra mūlaśuciśaktinirjharī

yadi devarājakaruṇonmukhaṁ mano

na kimapyasādhyamiha dehadhāriṇām.)[14]

If the heart is, free from all obstacles, if there is purity in the flow of energy, if the mind has turned in its aspiration to receive the compassion of the God of the gods, then nothing for the man on this earth is impossible to achieve.

6.Indra gītam : In this work Muni praises lord Indra in many ways in forty two verses composed in *tanumadhyā* meter

7.Indrāṇī saptaśati: It is a poem containing seven hundred verses in the praise of Indraṇī, the consort of the paramount Lord Indra of the Vedas. There are groups of a hundred *ślokas*. In every hundred *ślokas*, there are four groups of 25 ślokas each. In every 25 ślokas, the second and twenty fourth ślokas are of patriotic nature. The ślokas of the 1st hundred have 12 letters to each line and the second hundred have 14 and thus go on in arithmetical progression and end up with 24 letters in the last hundred ślokas. Another 600 *ślokas* were added to 'Umā-Sahasram' to complete it.[15]

Thus, humbly offering his prayer he started to compose *ślokas* on Indrāṇī. Every day after he composed and read out the *ślokas* there would be a small cloud in the sky and a ray of lightning would appear as if Mother has smiled.

Thus Muni composed many *ślokas*. Usually composition of this type would have the flavor of *Bhakti*. But Muni's *ślokas* contained also the present inglorious condition of the country, the causes and the remedy of it.[16]

रक्षितुं भरतविषयं शक्तमिन्द्रहृदयसखी। चन्दबिबरुचिरमुखी सा क्रियात् भुवि गणपतिम् ।।

(rakṣituṁ bharataviṣayaṁ śaktamindrahṛdayasakhī

candrabimbaruciramukhī sā kriyāt bhuvi gaṇapatim)

May the moon-faced consort of Indrāṇi make Gaṇapati able to save mother land.

8. Indreśvarābheda sūtram : In this work Muni proclaims the non-differentiation between Indra and Iśvarā. It states in the beginning that Indra and Iśvara have the same meaning. As Indra's supremacy is denoted by the word Devarāja, the king of the Gods, so the Mahādeva expresses the superiority of Lord Śiva. The muni has tried to explain the oneness of Indra and Iśvara by dealing with all subtle aspects of both the gods. Finally the Muni asserts the Rudra and his śakti. Rudrāṇi are the objects of meditation for the Yogis attempting to attain the spiritual heights. Similarly, Indra and his consort Indrāṇi, are adored by the Vaidikas through self-contemplation or by bringing their self in contact with the Vedas.[17]

9. Caturvyūha Sūtram : This work of Muni is in seven parts containing hundred and sixty-two sūtras, deals with the fourfold glories of Lord Indra. The Muni makes it clear from the very beginning that *ākāśa* or space, *kāla* or time, sūrya or sun and, *vaidyutāgni* or fire in the form of lightening or the electrical force, are four forms of Lord Indra.[18] In these aphorisms, he not only summaries the views of the earlier Ṛṣis but also tries to remove contradictions if any in those views and gives his own verdict too.[19]

10. Indranāmanirvacanam :Here Muni has commented upon the name Indra. He takes into consideration all the fifteen etymologies given by Yāska in the *Nirukta* and then continues explaining the greatness of Indra by quoting extensive from various Vedic texts.

From this work of Muni it appears that perhaps the Muni had planned to write serially about many Vedic Godheads, but he couldn't finish it.[20]

11. Aindrasahasranāmabhāṣyam : Through this work the Muni wanted to explain in detail all the thousand names of Indra appearing in his *indrasahasranāmastotram*. All these thousand names are culled from the Vedas and arranged by the Muni in this *stotra* in order to fit them into the eight syllable *anuṣṭup* metre. In this bhāṣya the Muni has explained only eleven out

of the thousand names of Indra. But this incomplete text of the Muni provides a clear guideline for pursuing further research on his *indrasahasranāmastotram*.[21]

12. Indragāyatrībhāṣyam : Another work of Muni is a commentary on *Indragāyatrī* of the *Ṛg-Veda* 1.3.4. Hereafter explaining the meaning of the *Mantra* Muni notes all the etymological details of the word Indra as given in the *Nirukta* the of Yāskācārya. Then out of fifteen different etymologies mentioned in the *Nirukta* the Muni comments upon five leaving the first seven and last three.[22]

Apart from that, his most important and ambitious work, which is not yet published is *aindriya brahma saṁhitā*. It is, work of a thousand *Mantra stomas* in honor of Indra, the ultimate Reality. He prepared also a shorter version of it called *'laghvi catussaṁhitā aindriya brahma saṁhitā'*. Dr. G. Sriramamurti in his article "The contribution of Gaṇapati Muni to Vedic studies" explain the introduction part of this *saṁhitā* that, in this *saṁhitā*, there are three parts *(kāṇḍa)— Mahābhāṣya kāṇḍa, Apādāna kāṇḍa, Prārthanā kāṇḍa.* In each *stoma*, as the *Mantras* relate to different topics, others are entered depending on their importance. In the *stomas mantras* are not giving importance as the *saṁhitā* is meant for Pārāyaṇa (recitation). If they contribute to the *stuti*, they are retained. Here *Manas* is Soma and Ātmā is Indra. Merging Manas in Ātmā is *Homa*. In each *stoma*, there are anuvākās, each *anuvākas* containing not less than twenty *stomas*. In a kāṇḍa, no Ṛṣi occurs at more than one place. Throughout the *saṁhitā*, the presiding deity is Indra. The Ṛṣis are mentioned at the beginning of each kāṇḍa. If no Ṛṣi is mentioned, it means the previous Ṛṣi continues. *Mantra* may be known by the number of syllables in each line.[23]

Conclusion : In this way, the Muni has brought out the importance of lord Indra in meaningful composition. From this, we can assess that how the Muni had immense love for Lord Indra.

References

1. Ṛg-veda 4.17.13, 8.64.3
2. Ṛg-veda 6.36.4
3. Ṛg-veda 3.49.4
4. Ṛg-veda 1.4.2
5. Matsya Purāṇa, 266.19
6. Jayanti, Kāvyakaṇṭha Gaṇapati Muni Centenary Commemoration Volume, 978, p- 32

7. Mahātapaswi. P- 115
8. Collected works of Vasiṣṭha Gaṇapati *Muni* Vol.3, p.33.
9. Ibid, p.58.
10. Ibid, p.65.
11. Ibid, p74
12. Ibid, p.75.
13. Ibid, p.77
14. Ibid, p.80
15. Mahātapasvī, p- 236
16. Ibid, p-234
17. Collected Works Vasiṣtha Gaṇapati *Muni*, V-5, p-XXV
18. Ibid, p-XXV
19. Jayanti, Kāvyakaṇṭha Gaṇapati *Muni* Centenary Commemoration Volume, 1978, p - 32
20. Collected Works Vasiṣṭha Gaṇapati Muni, V-7, p-XXiV
21. Ibid, p-XXiV
22. Ibid, p-XXiii
23. Jayanti, Kāvyakaṇṭha Gaṇapati *Muni* Centenary Commemoration Volume, 1978, p- 33-34.

BIBLIOGRAPHY

1. Indra and Varuṇa in Indian Mythology, Usha Choudhury, Delhi, 1982.
2. The Worship of the sky God, E.O. James, University of London, 1963.
3. Jayanti, Kāvyakaṇṭha Gaṇapati *Muni*, Centenary Commemoration Volume, Karnataka, 1978.
4. Indra: Lord Of Divine Mind, R.L. Kashyap, Sri Aurobindo Kapali Shastri institute of Vedic culture, Banglore, 1999 .
5. Nayana: Biography of Vasiṣṭha Gaṇapati Muni, Gunturu Lakshmikantam, Tr. (G.Krishan), Hyderabad, 1978.
6. Glory of Vasiṣṭha Gaṇapati , S.R. Leela, Sri Aurobindo Kapali Sastri institute of Vedic culture, Banglore, 1999.
7. A Vedic Reader For Student, Arthur Anthony Macdonell, Oxford University Press, London, 1965
8. The God of India: their History, Character, and Worship, Rev.E.Osbern Martin, Indological Book House, Varanasi, Delhi, 1940.
9. The Vedic Experience: *Mantramañjari*, Raimundo Panikar, M.L.B.D, Delhi, 2002.
10. Mahātapaswi, Tr (Smt.Sonti Anasuyamma), A.V. Ramana, Mumbai.
11. Guru And The Disciple: Bhagavan Ramana and Gaṇapati Muni, S. Ramaswamy,

Tr. (A.R.Natarajan), M.L.B.D, Delhi, 1998.

12. Ṛgveda men Indra, Sudha Rostogi, Varanasi, 1981.

13. Bhagavan and Nayana, S. Sankaranarayana, Sri Ramanasraman, Tiruvannamali, 1997.

14. The Secret of the Veda, Sri Aurobindo, Sri Aurobindo Ashram Trust, Puducherry.

15. Hymns to the Mystic Fire, Sri Aurobindo, Sri Aurobindo Ashram Trust, Puducherry

16. Hindu Mythology Vedic and Puranic, W.J. Wlikins, Indological Book House, Varanasi, Delhi, 1973

17. Selected Works of M. P. Pandit, Vol. 4, 5 and 6, Dipti Trust, Puducherry

18. Indra, Critical study of, and Varuṇa in the *Vedas, Mahābhārata* and principal Purāṇas. Arya, Usha Delhi, 1966, Ph.D.

19. Indra, Critical study of the vicissitudes in the mythological life of, in Vedic and Sanskrit literature. Saxena, Manju Allahabad, 1969 Ph.D.

20. Indra-devatā, Vaidika tathā Saṁskṛta sāhitya men, (H). Shefali Lucknow, 1994, Ph.D.

21. Indra in Ṛgveda. Upreti, Jai Datt Garhwal, 1980, Ph.D.

22. Indra in the light of Vedic and post-Vedic literature. (H). Sharma, L.K. Raipur, 1973, Ph.D.

23. Indra in the post-Ṛgvedic literature: An examination of the source of Indra's degradation as it appears in the Purāṇas. Godbole, Ganesh Hari Bombay, 1954, Ph.D.

24. The new vedic selection part II by dr. Braja Bihari Chaubey, published by Bharatiya Vidya Prakashan, kachaurigali, Varanasi, 1965-1973

□□□

यजुर्वेदे सङ्गीततत्त्वम्

मञ्जुश्री त्रिपाठी

(*Vedas* are the sources of all sorts of knowledge present in this world. The musical elements are not exception to it. Though the सामवेद is famous for music still one can find such elements in all the three *Vedas*. The paper is an attempt to trace and analyse the musical evidences available in *Yajurveda*. The musical instruments such as तन्तुवाद्य, वीणावाद्य and अनबन्ध्यवाद्य etc. are discussed in this paper followed by उपगान, उपवादन, नृत्य etc. The importance of songs is another point of discussion which has been underlined in this paper.)

'सम्' - उपसर्गेण 'गै-गाने' धातोः 'क्त'-प्रत्ययान्तोऽयं सङ्गीतशब्दः। सम्यक् प्रकारेण गीयते इति सङ्गीतम्। अतः सङ्गीतलक्षणनिरूपणप्रसङ्गे सङ्गीतरत्नाकरे लिखितं यत् - 'गीतं वाद्यं तथा नृत्यं त्रयं सङ्गीतमुच्यते'[1]। अतः गीतवाद्यनृत्यानां समन्वयो हि 'सङ्गीतम्'।

यज्ञमूलकः यजुर्वेदः। अतः यागान्ते देवप्रसादनम् अभिप्रेतम्। देवप्रसादनार्थं, प्रकृष्टसाधनं सङ्गीतम्। पुनर्यागकर्मणि ऋग्यजुःसाम्नां समूहसहयोगः काम्यते। यज्ञकर्मणि यजुषा सह ऋक्साम्नोः विनियोगः सङ्गीतैरेव क्रियते इत्यस्य सूचना यजुर्वेदमन्त्राणां याज्ञिकप्रयोगावसरे ह्युपलभ्यते। यज्ञकार्यस्य सुष्ठुसम्पादनार्थं होता अध्वर्युः उद्गाता ब्रह्मा - इत्येतेषां चतुर्णां सहयोगः अनस्वीकार्यः। अत एव सायणेनोक्तम्-

ऋग्भिः यजुभिः सामभिर्यदेनं ऋग्भिः शंसन्ति यजुभिर्यजन्ति सामभिः स्तुवन्ति (सायणभाष्यम्)। यजुः-संहितायाम् 'अनियताक्षरावसानो यजुः', गद्यात्मको यजुः इति प्रसिद्धवचनयोः यज्ञकर्मणि विनियोज्याः गद्यमन्त्राः उपांशुस्वरैः अगीयन्त। तैत्तिरीयेब्राह्मणे[2] अध्वर्युकृतं सामगानमिति विषयः स्पष्टीकृतः। उद्गातृकृतः शान्तिविधिः यदि न विहितः तर्हि अध्वर्युणा तत् करणीयमिति तैत्तिरीयारण्यकं[3] स्पष्टीकरोति।

यजुर्वेदीयानां सामगानविषयः सायणेनापि समर्थितम्। यथा - 'पादश्च गीतिः।..... हाउ इत्यादिकं साम यजुर्वेदे गीतम्।......पादेनार्धर्चेनोपेता वृत्तबद्धा मन्त्राः ऋचः। गीतरूपामन्त्राः सामानि[4]। यजुर्वेदीयकर्मकाण्डेऽपि सामगानं प्रयुक्तमिति सायणवाक्यादनुमीयते। यथा - एतत् साम गायन्नास्ते इति प्रतिज्ञाय किञ्चित् साम यजुर्वेदे गीतम्[5]। रथन्तर - वैराज - वैखानस - वामदेव्य - शाक्वर - रैवत - अभीवर्त इत्येते सामशैलीविशेषाः यजुर्वेदेऽपि प्रयुक्ताः लक्ष्यन्ते। किं नाम साम, कस्मिन् काले

गेयम्? कस्मिन् साम्नि कति संख्यकाः स्तोमाः*1 इति विषयद्वयमत्यन्तं महत्त्वपूर्णम् । दिङ्मात्रम् उदाह्रियते -

क) रथन्तरं साम त्रिवृत्स्तोमो वसन्तऋतुः।

ख) वृहत्साम पञ्चदशस्तोमो ग्रीष्मऋतुः।

ग) वैरूपं साम सप्तदशस्तोमो वर्षाऋतुः।

घ) शाक्वररैवते सामनी हेमन्तऋतुः[6]।

सोमयागानुष्ठाने यजुर्वेदे सामगायनपरम्परा सर्वातिशायिनीति लक्षिता। अग्न्याधानादिकर्मविशेषेषु उद्गातृगानेन सह अन्येषां प्रस्तोता प्रतिहर्त्ता उपगाता इत्येतेषां सहयोगिनां गानं विधीयते स्म[7]। कुत्रचित् सोमयागेषु उद्गातुः प्रस्तोतुर्वा एकक-गानं (solo song), क्वचित् समेषां समूहगानं (Chorus), कुत्रचिदपि वृन्दगानं (Orchestra) प्रयुज्यन्ते स्म[8]।

पञ्चविधानां साम्नाम् उपयोगः अपि प्रणिधेयः। प्रस्ताव-उद्गीथ-प्रतिहार-उपद्रव-निधन इत्येतानि पञ्चविधानि सामानि प्रसिद्धानि।

1. **प्रस्तावः** - साम्नः प्रारम्भभागः प्रस्तावः, यं प्रस्तोता एव विदधाति। 'हुम्' इति उच्चारणात् यः 'हिंकारः', तस्मादेव आरभ्यते प्रस्तावः। यदा प्रस्तोता 'हुमिति' उच्चरति तदा साक्षात्सर्वे ऋत्विजः तमनुसृत्य समवेतस्वरेण हिंकारम् उच्चरन्ति। हिंकारप्रशस्तिः ताण्ड्यब्राह्मणे यथा - 'एष वै साम्नां रसो यद्धिंकारो यद्धिंकृत्य प्रस्तौति रसेनैवेत्ता (ता.ब्रा. 6-8-7)'। व्यवस्थितस्वरयुक्तो हिंकारः रसः-ओजः-गीतिः-इत्यादिभिः महिमान्वितः, साम्नः प्रस्तावखण्डं श्लाघनीयं विदधाति।

2. **उद्गीथः** - ॐकारसमुच्चारपूर्वकं समारब्धम् इममुद्गीथं क्वचिद् ऋत्विक् क्वचित् उद्गाता वा प्रयुङ्क्ते[10]।

3. **प्रतिहारः** - आलोचयिष्यमाणयोः सामविभागयोः उपद्रव-निधनयोः समाहारात्मकः अयं 'प्रतिहारः'। यद्यपि स्वातन्त्र्येण उपद्रवनिधने सामविभागरूपेण अन्तर्भजतः, तथापि प्रतिहारभागे एतयोर्मिश्रणं जातम्। प्रतिहारस्य गाता 'प्रतिहर्ता' इत्युच्यते।

4. **उपद्रवः** - साम्नः चतुर्थोऽयं विभागः, पुनरपि प्रतिहार-विभागस्य उपविभागरूपेण गृह्यते। यदा प्रतिहर्ता मुख्यं प्रतिहारं गायति तदा उद्गाता पुनः तस्य खण्डशः गानं करोति। उद्गात्रा यदिदं खण्डशः गानं तदेव 'उपद्रवमिति' समाख्यायते।

5. **निधनम्** - 'निधनमिति' स्वातन्त्र्येण परिचितं साम्नः पञ्चमविभागरूपेण। पुनरपि प्रतिहारस्य द्वितीयः उपविभागः अयं प्रतिहारः। प्रतिहर्ता प्रतिहारं गायति। अस्य शेषांशम् ॐकारेण सह योजयित्वा अन्ये पुनर्गायन्ति। एतद् अन्तिमं गानं यत् प्रस्तोता - उद्गाता -प्रतिहर्ता च मिलित्वा ॐकार-समन्वितं कृत्वा गायन्ति तद् निधनमिति। निधनं साम्नः अन्तिमो भागः। पुनर्निधनमिदं शब्दालापानुसारं द्विविधं निर्द्धारितम्। यथा 1. अन्तर्निधनं, 2. बहिर्निधनञ्च। अन्तर्निधने 'इह -

इडा - अथ - होवी' इत्यादि शब्दालापाः विराजन्ते । पुनरपि बहिर्निधने आलापसूचकाः स्तोभाः*2 (सामविकाराः) प्रयुज्यन्ते।

आलोचितानां पञ्चविधानां साम्नां प्रयोगावसरे ऋत्विग्भिः सह स्वरभरणार्थम् उपगातृणां योगदानमपि कदाचिद् अपेक्ष्यते। आपस्तम्ब-श्रौतसूत्रानुसारं उद्गाता-प्रस्तोता इति एताभ्यां रथन्तरसाम्नः युगलगानं (duet) महत्त्वपूर्णमासीत्[11]। स्थलविशेषे यदि उद्गातापुरुषः साम न गायेत् तर्हि अध्वर्युः एव भू-र्भुवः-स्वरिति उच्चारणपूर्वकं साम्नोद्गायेत्[12] इति प्रथा प्रचलिता।

सङ्गीतसहयोगिनः –शुक्लयजुर्वेद - वाजसनेयीसंहितायाः त्रिंशदध्याये 'पुरुषमेध'-वर्णनप्रसङ्गे देवप्रीत्यर्थं गानसहयोगिनां काचित् सूचना लभ्यते। तत्र सूत-शैलुष-नर्त्तक-गायक-वीणावादक-वंशीवादक-शङ्खध्म-काहलवादक-दुन्दुभिवादकादीनामुल्लेखः प्राप्यते[13]। अतः यागनिष्ठे यजुर्वेदीयसमाजे सङ्गीतवृत्तेः अनुजीविनां (Professional Musicians) आभासः अनुमीयते। ते यथा - 'नृत्ताय सूतं। गीताय शैलुषम्[14]। महसे वीणावादम्।क्रोशाय तुणवद्धमम्। अवरस्वराय शंखध्मम्। आनन्दाय तलवम्[15]।

तैत्तिरीयब्राह्मणे तालधारिणां 'गणक' इति नाम्ना ख्यातानाम् उल्लेखः दृश्यते। यथा - 'वीणावादकं गणकं गीतायं'[16] यजुर्वेदीयसमाजे वीणावादक-नृत्यकारयोः यथा नियुक्तिः तथैवासीत् तालधारिणाम्। वाजसनेयीसंहितायां 'वंशनर्तिन' इति शब्दस्योल्लेखः प्राप्यते यस्मात् लक्षितो भवति यद् तदा वंशोपरि नृत्यरतानां शिल्पीनां स्थितिरासीत्[17]। नटः (dancer) 'शैलुषः' इत्याख्यातः। सूताः शैलुषाश्च गायकवर्गे (singers) अन्तर्भजन्ते स्म[18]।

वाद्यवर्गः - यजुर्वेदसंहितायां वीणा-वाण-तूणव-दुन्दुभि-भूमिदुन्दुभि-शङ्ख-तलव-वाद्यानां सूचना प्राप्यते[19]। अश्वमेधादिषु यज्ञेषु मनोरञ्जनाय गाथागानस्य वीणावादनस्य प्रचलनमासीत्[20]। पुनश्चापि वाजपेययज्ञावसरे महावेद्याः चतुर्षु कोणेषु सप्तदशदुन्दुभीनां स्थापनं सञ्जातम्[21]। सार्द्धं वीणावादनेन दुन्दुभीनां घोषः अभवदिति सूचनाम् आपस्तम्बः ददाति[22]। पुनः वीणा-तुणव-दुन्दुभीनाञ्च विषये तैत्रिरीय-संहितयाम् आख्यानं प्राप्यते*3।

तन्तुवाद्यम् - शततन्त्रीवाणवाद्यविषये तैत्तिरीयसंहितायाम् उक्तम् - वाणः शततन्तुर्भवति शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रतितिष्ठन्ति[23]। इदं वाद्यं शतसंख्यकैर्मौञ्जीभिर्निर्मीयते। पुनरपि वेतैषिकाभिः वाद्यते। इदानीं एतद् वाद्यं 'सन्तुरिति' प्रसिद्धिं भजते। वाद्यमेतत् कात्यायनश्रौतसूत्रानुसारमत्र उद्धीयते - "पृष्ठयस्योपाकरणं वाणेन शततन्तुना। मौञ्ज्यास्तन्तवः। वेतसंवादनम्[24]। तथैव औदुम्वरासनोपरि उपविष्टस्य उद्गातृऋत्विजः वाणवाद्यवादनस्योल्लेखः वौधायनसूत्रेऽपि[25] प्राप्यते। तथैव वाणीवाद्यस्य निर्माणकौशलविषये आपस्तम्बसूत्रे*4 प्राप्यते । अस्य वादनं त्रिपर्वोत्कटशलाकया वेणुकाण्डेन वेतसकाण्डेन वा क्रियते[26]। वीणावादनसमये उच्चासनासीनमुद्गातरं सर्वे उपगातारः अध्वर्यवः यजमान-स्त्रियः दर्भासनासीनाः भूत्वा सहयोजयन्ति[27]।

वीणावाद्यम् - बहुविधाः वीणाः यथा - आप्पाटी, प्पाटलिका, अपप्पाटलिका, काण्डवीणा, पिच्छोला, स्तम्बलवीणा, तालुकवीणा, गोधावीणा, अलावुः, कपिशीर्ष्णी, कर्करी, कर्करीका इति एतासां वीणानां प्रचलनमासीत्[28]। वीणा 'श्रीस्वरूपा'[29] 'तथा समृद्धेः प्रतीकः इति हेतोः अश्वमेधयागे

वीणां वादयते स्म यस्योल्लेखः तैत्तिरीये ब्राह्मणे प्राप्यते[30]। यथा - 'दिवा ब्राह्मणो गायेत्। नक्तं राजन्यः। ब्राह्मणो वै रूपमहः। क्षत्रस्य रात्रिः। तथा हास्य-ब्रह्मणा च क्षत्रेण चोभयतो राष्ट्रं परिगृहीतं भवति[31]'।

अनबद्ध-वाद्यम् - अनबद्धवाद्येषु दुन्दुभिभूमिदुन्दुभीनामुल्लेखः प्राप्यते। नमो दुन्दुभ्याय चाहन्याय चेति[32] स्तुतिविशेषं दुन्दुभिमभिलक्ष्य प्राप्यते। पुनः दुन्दुभिवाद्यस्य धीरगम्भीरध्वनिविषये तैत्तिरीयसंहितायामुपलभ्यते यथा - दुन्दुभिन्समाध्नन्ति परमा या एषा वाग्या दुन्दुभौ परमामेव वाचमवरुध्नते[33]। काष्ठकुहरस्योपरि चर्माच्छादनेन दुन्दुभिवाद्यस्य निर्माणं भवति। भूमिदुन्दुभिवाद्यस्य निर्माणं भूगर्भस्य मुखं चर्मणाऽच्छादनेन सम्भवतीति[*5] भाष्यकारेण भट्टभास्करेणाभिमतम्। भूमिदुन्दुभिवाद्यप्रसङ्गे वाग्देवतायाः विषये तैत्तिरीयसंहितायामारव्यानं प्राप्यते[*6]। अपि आहनन-वाद्यदण्डेन एतस्य वादनं क्रियते[34]। वौधायनश्रौतसूत्रे अस्य वाद्यस्य निर्माणविषये उल्लेखः प्राप्यते[*7]।

गानस्य महत्त्वं प्रकारञ्च : गानविषयमधिकृत्य यजुर्वेदे भूरिचर्चा प्राप्यते[35]। सामगानं गाथागानञ्चेति गानद्वयस्य प्रसार आसीत्। सामगाने मन्त्राः गीयन्ते परन्तु लौकिकगीतानि गाथासु प्राप्यन्ते। सामगाने देवस्तुतयः प्राप्यन्ते, परन्तु गाथागानेषु देवताविशषैः सह वीरपुरुषाणां वीरगाथाः संकीर्त्यन्ते। सामगानमुद्गात्रा पुरुषेण प्रस्तावोद्गीथप्रतिहारोपद्रवनिधनेषु पञ्चभक्तीषु[36] तथा विकारविश्लेषणविकर्षणाभ्यासविरामेषु सामविकारेषु[*8] 'प्रदर्श्यते[37]। परन्तु लौकिकसङ्गीते गाथागानं[ङ8] तज्ज्ञैः कलाकारैः अनुष्ठीयते। सङ्गीतशास्त्रे परवर्तिनि समये एतौ "मार्गेदिशीनाम्नोः"[38] ख्यातावास्ताम्। योग्यतानुसारं गायकानां कलाकाराणां वा पारिश्रमिकव्यवस्थाऽपि प्रचलिता आसीत्, यस्योल्लेखः कात्यायनश्रौतसूत्रे प्राप्यते। यथा - 'वीणागाथिन्यां पृथक् ददाति'[39] इति। अश्वमेधयज्ञावसरे सावित्रीइष्टौ प्रयाजदेवताप्रीतये यज्ञसम्पादिते समये दक्षिणस्यां दिशि उपविष्टः ब्राह्मणः यजमानस्य दानयज्ञयोः प्रशस्तिवाचनार्थं स्वरचितं गाथत्रयं गायति स्म यस्याः प्रारम्भः वीणायाम् उत्तरमन्द्राद्देव कृत आसीत्।। अस्मिन् प्रसङ्गे कात्यायनश्रौतसूत्रे स्पष्टीकरणं प्राप्यते यथा-

प्रयाजेषु दक्षिणतो ब्राह्मणो यजमानस्य यज्ञदानयुक्ताः स्वयंकृतास्तिस्रो गाथा गायत्युत्तरमन्द्रायाम्[40]। राजन्य-धृतिषु युद्धजययुक्ताः[41]। 'उत्तरमन्द्रा' वीणावाद्यस्य अवरोहस्वरक्रमान् सूचयति । परवर्तिनि समये भरतमुनेः मूर्च्छनातत्त्वमस्यामुपरि आधारितम्। ब्राह्मणक्षत्रिययोः कृते गायनकला निर्द्धारिता आसीत्। गायनवादनाभ्यां सह प्रबन्धरचना अपि अभिप्रेता आसीत्। गाथायाः भेदरूपेण 'नाराशंसी' प्राप्यते[42], वेदात् जातः मलिनभागः नाराशंसीगाथेति अभिहितः। निम्नकोटिकगानेषु नाराशंसी-गाथा' आगच्छति।

सङ्गीतकलाकुशलान् पुरुषान् प्रति नार्यः आकृष्टाः स्युरिति शतपथब्राह्मणे उक्तमासीत्[43]। पुनः 'महाव्रत' इति सोमयागेषु उद्गातृवर्गाणां सामगानैः सह नारीणां प्रजाबृद्ध्यर्थम् उपगानविषयं तैत्तिरीयसंहितायामुल्लिखितमासीत्[44]। उपगानैः सह यजमानपत्न्याः 'उपवादनविषयोऽपि' उल्लेखनीयः। ते यथा - आघाटीभिः पिच्छोलाभिः कर्करीकाभिरित्युद्गातारं पत्नयः पर्युपविशन्ति (वौधा.सू.16.21)। पुनः - उपगायन्ति ध्यन्योऽपाप्पाटलिका स्तालुकवीणाः काण्डवीणाः पिच्छोला अलावु कापिशीर्ष्णीति

In ancient days some devotees used to throw themselves beneath the wheels of the chariot of lord जगन्नाथ in the belief that dying under the chariot's wheels will earn lord's blessings by leading them to heaven. In fact, the people of Odisha accept Lord जगन्नाथ as their leader . उत्कलमणि गोपवन्धुदाश says : उत्कले नेतार नाहिँ प्रयोजन/उत्कलर नेता स्वयं नारायण// (No leader is required to lead Orissa, as नारायण/ i.e. जगन्नाथ himself is the leader of the state). Elsewhere also it is said : उत्कलर राजा स्वयं जगन्नाथ/ गजपति राजा ताहाङ्क राउत// (जगन्नाथ himself is the king of Odisha and गजपति राजा i.e. the king of Puri is only his servant).

The people of Odisha consider lord जगन्नाथ both as man (नर) and god (नारायण). They believe that he will help them in distress. Out of deep devotion they consider him as a common man. Therefore, the lord suffers from fever after taking bath in स्नानपूर्णिमा and he stays in अणसर-गृह . Then he goes to the house of his mother's sister (गुण्डिचाघर) to get rid of ill-health with his elder brother बलभद्र and sister सुभद्रा. Since he has not taken his wife लक्ष्मी to his maternal aunt's house, she quarrels with जगन्नाथ on his return. Besides the Odia texts we come across with some references to it in गङ्गवंशानुचरित of वासुदेवसोमयाजिन् also :

अथ मुरहरभृत्यै वातकृत्यै विनत्या / विरचितबहुदैन्यं याच्यमाने प्रवेशे।

सपदि जलधिपुत्री प्रेमनिक्षेपगात्री / प्रणयकपटरीत्या काचिदित्याचचक्षे।।[10]

मुरहरपरिवारा केन रे दुर्निवारा / विघटयत कवाटं घट्टितं नः प्रयत्नात्।

चलत मिलत सद्यो गुण्डिचामण्डपं वः / कथयत किमिह स्त्रीमन्दिरे कृत्यमस्ति।।[11]

जगन्नाथ's reply to above mentioned accusing of Lakshmi is also interesting as he makes an apology :

किमिति निरपराधे दोषमारोपयन्ती / रचयसि मयि रोषं कोपेन कोऽपराधः।

विमृश मनसि विज्ञे ! तूर्णमाज्ञापयैनं / तव चरणसरोजे किङ्करः किङ्करोतु।।[12]

Some are of the opinion that the रथयात्रा symbolizes कृष्ण's departure to मथुरा from Gokul, whereas according to some, it is to mark an incident when कृष्ण goes to कुरुक्षेत्र from द्वारका to meet the inhabitants of वृन्दावन after a long gap.

9. The concept of दशावतार and lord जगन्नाथ : The Indian tradition accepts ten incarnations of भगवान् विष्णु. They are मीन, कूर्म, वराह, नृसिंह, वामन, परशुराम, राम, बलराम, बुद्ध and कल्की. These ten incarnations are described not only in गीतगोविन्द but in श्रीमद्भागवत also. In श्रीमद्भागवत these ten principal incarnations are described along with fourteen subordinate incarnations, namely, सनत्कुमार, नारद, नरनारायण, कपिल, दत्तात्रेय, यज्ञ, ऋषभदेव, आदिराजपृथु, धन्वन्तरी, मोहिनी, हयग्रीव, श्रीहरि, व्यास and हंस. Among these ten principal incarnations बुद्धावतार stands for श्रीजगन्नाथ.

Though controversial this fact has been supported by इतिहास as well as पुराण-s. However, the sayings like कृष्णस्तु भगवान् स्वयम् etc. differenciate श्रीकृष्ण from other principal incarnations

Interestingly, there is a saying in Odia literature proving Lord जगन्नाथ as full incarnation (पूर्णावतार) and कृष्ण as half : जगन्नाथ जे पूर्ण कला/ तहिंर अधा नन्दबला//

However, the Odia poet कार्तिकदास (16th century) holds altogether a different of opinion in this regard. He puts totally an opposite view by saying that it is जगन्नाथ who assumed the form of कृष्ण :

जगन्नाथ होइलाक देवकीर बाल/[13] (जगन्नाथ became the child i.e. son of देवकी).

Odishan Poet Jayadeva (12th century) in the दशावतारस्तोत्र of his गीतगोविन्द also accepts श्रीजगन्नाथ as कृष्ण's incarnation (अवतार) :

वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते / दैत्यं दारयते बलिं छलयते क्षत्रक्षयं कुर्वते//

पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते /म्लेच्छान्मूर्च्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः//[14]

Jayadeva's कृष्ण does not belong to any particular school or tradition. He has altogether an independent existence in गीतगोविन्द . In addition to the ten names mentioned in दशावतार, we find many other epithets of कृष्ण used in गीतगोविन्द, namely, माधव (I.i, III.2, IV.i, IV.2, IV.7, V.7, VII.12, VII.39, VIII.2, IX.2, XI.14), मधुसूदन (I.25, I.40, II.17, VII.9), मधुरिपु (II.9, II.18, VI.5, VII.29, XII.9), मधुमथन (XI.2), मधुकर (I.27, VIII.25), मधुप (I.36, V.4, XI.4), मधुव्रत (II.1), वासुदेव (I.2), हरि (I.4, I.5, I.17, I.27, I.34, I.38, I.39, I.43, I.46, II1, II.2, IV.9, IV.17, V.14, V.15, VI.2, VI.6, VI.7, VII.3, VII.7, VII.10, VII.14, V.II.29, V.II.38, IX.1, IX.2, IX.4, IX.6, IX.8, IX.9, XI.6, XI.8, XI.9, XI 13,XI.24, XI.31, XII.1, XII.19), केशव (I.5, I.45, IV.2, VIII.2, XI.1), जगदीश (I.5), मुरारि (I.37. V.12, VII.21, VII.22, XI.21), पीतवसन (I.38, II.7), वनमालिन् (XI.38, V.2, V.8, VII.31), गोविन्द (II.19, V.17, VI.1), केशिमथन (II.2), कंसारि (III.1), उपेन्द्र (IV.20), जनार्दन (VII.12), नारायण (XII.2) and यदुनन्दन (XII.12, I2). जयदेव has taken these names of lord कृष्ण (and his counterpart lord जगन्नाथ) from earlier sources.

Being a great devotee of Lord कृष्ण, जयदेव was a worshipper of माधव. He purposefully brings the name of माधव in many of his songs like राधामाधवयोर्जयन्ति यमुनाकुले रहः केलयः (गीतगोविन्द I.1) and many such occurrings. In addition to famous माधवs[12], there are number of माधव - temples in Odisha in the bank of river प्राची, namely, निआलीमाधव, मुद्गलमाधव and नीलमाधव of Kantilo. Other माधव-s which shifted to the nearby temples because of the damage of the original temples are : माधव of निआली शोभनेश्वर temple, पितापडा माधव, प्राचीमाधव of अमरेश्वर, निराभरणमाधव, केन्दुविल्वमाधव, कृष्णप्रसादमाधव and लताहरणमाधव. दशावतार-s are generally the पार्श्वदेवता-s of माधव temples. Therefore, जयदेव has paid homage to दशावतार in the beginning of his गीतगोविन्द.

10. Lord जगन्नाथ as बौद्ध : Till 15th century जगन्नाथ is considered as बौद्ध in Odishan tradition. लोहिगीता composed by सिद्धाचार्य लोइपा has proved this fact as he says : वउद्धरूपे नीलगिरि रहि (you live in नीलगिरि as बौद्ध). In शून्यसंहिता अच्युतानन्ददास also supports this view and says : निज वंश घेनि वउद्धरूपरे नीलाचले अछ रहि (With own family you live in नीलाचल as बौद्ध). In सारलादास's महाभारत in Odia one can find similar view : संसार-जनङ्कु सेहु तारिवा निमन्ते / वउधरूपरे विजे अछि जगन्नाथे//[15] (जगन्नाथ takes the बौद्धरूप to resque the mankind of the world), वउधरुपरे कलियुगे अवतार / होइण पापी जनङ्कु करुछ उद्धार//[16] (In कलियुग you have taken the incarnation of बौद्ध and resque the sinners). In addition to that, the devotee poet जगन्नाथ दास says in his भागवत written in Odia :

प्रवुद्ध बुद्ध-अवतारे। ज्ञान विस्तारे ए संसारे। वेदर धर्म छडाइवे। निर्गुण धर्म प्रचारिवे।।[17]

(In the enlightened incarnation बौद्ध you do spread knowledge in the world. You will prompt people to leave the Vedic merit and to accept formless merit).

Some consider जगन्नाथ as जैन. In fact, the identicalness between जीन and बुद्ध has been established in texts. For example, इन्द्रभूति (717 A.D.), the follower of वज्रयान, says in his work :

प्रणिपत्य जगन्नाथं सर्वजिनवरार्चितम् / सर्वबुद्धमयं सिद्धिव्यापिनं गगनोपमम्//

अत एव जगन्नाथ बालानां प्रतिबोधने / निर्वाणं दर्शयन् त्वेव रूपस्यानित्यदर्शकाः//[18]

11. The new image Ceremony (नवकलेवर) of Lord जगन्नाथ : The images of the dieties are also disposed off at intervals of around eight to nineteen years when a particular year has two months of आषाढ called मलमास, depending on astrological calculations. At that time the old images are burnt in कोइलिवैकुण्ठ (the divine funeral site) and new images are made of Neem trees as directed by the lord to the main priest (वडपण्डा) in dreams. Then the deities are installed as prescribed in the religious texts. Such ritual is popularly known as नवकलेवर .

12. Lord जगन्नाथ as a god of love : *Bhakti* or devotion is the other name of love in parallel with *rati*. This love is found between the devotees and god. As the devotees love their god so also the god also loves his devotees. The lord जगन्नाथ has already proved his love towards his devotees in many occasions such as : दासिआ वाउरी, भक्त सालवेग, बलरामदास, करमाबाई, बन्धुमहान्ती and so on. Lord जगन्नाथ's love is described in महापुरुषविद्या as follows :

प्रीत्या यथा वशं याति नीलशैलशिरोमणिः। न तथार्चनदानादिकर्मभिः जगदीश्वरः।।[19]

13. Secularism and Globalization in जगन्नाथ cult : There is no caste distinction and all are welcome before the Lord जगन्नाथ. Before him there is no division either in the name of cast nor in the name of religion. Utkalamani Gopabandhu has rightly said: नाहिँ जातिभेद नाहिँ धर्मभेद/ साम्य मैत्री मन्त्र गाए यार वेद// (In

जगन्नाथ, there is neither the differentiation of जाति nor धर्म. वेद-s also recite its मन्त्र of साम्य and मैत्री).

However, non-hindus are not allowed inside the temple. They can have a nice view of the campus of the temple from the roof of the nearby Raghu Nandan library, opposite the main gate of the temple.

The शवरसंस्कृति is also mingled in the जगन्नाथ cult. The legends like विश्वावसु episode, the practice of दइतापति services do also symbolize this fact. The tribal race (शवर-dynasties) does also get a chance to serve Lord जगन्नाथ in the Puri temple. The जगन्नाथ-cult considers the entire mankind as a race and the humanity as a whole is the only religion.

जगन्नाथ is the physical form of universal brotherhood (विश्वबन्धुत्व). Ashokan Inscriptions keep a record about him that सर्वमनीषा मे प्रजा. That means, the mankind as a whole is his offspring. One can find an extraordinary combination of all the traditions such as आर्य, अनार्य, वैष्णव, शाक्त, सौर, गाणपत, बौद्ध, जैन, शिव, शवर etc. The devotees of different traditions worship him in different forms by different names:

यं शैवा समुपासते शिव इति ब्रह्मेति वेदान्तिनो /
बौद्धा बुद्ध इति प्रमाणपटवः कर्तेति नैयायिकाः//
अर्हन्नित्यथ जैनशासनरताः कर्मेति मीमांसकाः /
सोऽयं वो विदधातु बाञ्छितफलं त्रैलाक्यनाथो हरिः//[20]

Elsewhere जगन्नाथ is described as भैरव and विमला as भैरवी : विमला भैरवी यत्र जगन्नाथस्तु भैरवः. In देवीभागवत also this fact has been referred to : विमला च महादेवी जगन्नाथस्तु भैरवः (देवी भागवत).

14. The philosophical and Spiritual aspects of जगन्नाथ Cult : In मुकुन्दविलास, महापुरुषविद्या and मत्स्यपुराण etc. the philosophical as well as spiritual features of lord जगन्नाथ have been described. In मुकुन्दविलास one can find a reference to the fact that god विष्णु has manifested himself to many forms as if to signify the famous traditional sayings like एकं सद्विप्रा वहुधा वदन्ति. The text describes him as classified into प्रकृति and पुरुष. He has also three forms विधि or ब्रह्मा, विष्णु and शङ्कर. He is again found classified into four features present in the श्रीमन्दिर in पुरुषोत्तमक्षेत्र worshipped as जगन्नाथ, बलभद्र, सुभद्रा and सुदर्शन in Nilagiri. However, in वृन्दावन he appears as राधा and कृष्ण :

यो द्वेधा प्रकृतिः पुमानिति मतः स्त्रीपुंसदेहाश्रितः / यस्त्रेधा विधिविष्णुशङ्करवपुर्धारी दरीदृश्यते//
श्रीमन्नीलगिरौ च दारुतनुधृग् योऽसौ चतुर्धा स्थितो /राधाकृष्णतनूधरो विजयते वृन्दावने स प्रभुः//

महापुरुषविद्या describes Lord जगन्नाथ as अमेय, अक्षर, अज and सूक्ष्म just like ब्रह्मन् :

यः स्वात्मानममेयमक्षरमजं सूक्ष्मं मदाद्यैः सदा / दुर्ज्ञेयं कृपया चकार सुलभं चर्मिक्षणां चिन्मयम्//

यं दारुं भवदारणाच्च मुनयो भक्ताश्च संसारिणः / सर्वे हर्षयुता वदन्ति तमहं नित्यं शरण्यं भजे// [21]

In the same text again he is described as the heap of bare आनन्द and the ocean of compassion for his own people :

दिव्यालङ्कारयुक्तं भवभयनिकरोन्मूलनोपायमुख्यम् /

निजजनकरुणावारिधिं वारिजाक्षम्/

दृष्ट्वा जीवाः स्वदेहं सकलमिदमहङ्कारयुक्तं त्वनित्यम्/

विस्मृत्यानन्दसिन्धौ निपतितहृदयाः निश्चलाः सम्भवन्ति// [22]

मत्स्यपुराण says that by taking bath near lord जगन्नाथ at the time of solar eclips one may be freed from sins committed even in previous birth :

कोटिजन्मकृतं पापं पुरुषोत्तमसन्निधौ/ कृत्वा सूर्यग्रहस्नानं विमुञ्चति महदघम्// [23]

नीलाद्रौ दशवर्षाणि गुण्डिचामन्दिरे दिने/ दिवा तद्दर्शनं पुण्यं रात्रौ दशगुणं भवेत्//

दोले च दोलगोविन्दं चापे च मधुसूदनम् / रथे तु वामनं दृष्ट्वा पुनर्जन्म न विद्यते//

15. Conclusion: About the Jagannatha cult though much evidences are available in Odia literature still Sanskrit literature is not silent about it. Not only in Vedic, Upaniṣadic and purāṇic literature but in classical as well as modern Sanskrit literature also one can find plenty of references here and there. For example, पुरुषोत्तमक्षेत्र has been described in various Sanskrit works, specifically in पुराण-s like स्कन्दपुराण, मत्स्यपुराण, व्रह्मपुराण, नारदपुराण, गरुडपुराण, पद्मपुराण, वामदेवसंहिता, सुतसंहिता, कपिलसंहिता, वार्हस्पत्यसूत्र, तीर्थचिन्तामणि, नीलाद्रिमहोदय, पुरुषोत्तम-चन्द्रिका, पुरुषोत्तमतत्त्व, तन्त्रयामल, रुद्रयामल and सौभाग्यमञ्जुषा etc.Moreover, पुरुषोत्तमक्षेत्रमाहात्म्य of स्कन्दपुराण (उत्कलखण्ड) also depicts the glory of the पुरुषोत्तम धाम and its presiding deities जगन्नाथ, बलभद्र and सुभद्रा. Similarly अग्निपुराण also mentions about अक्षयतृतीया, the स्नानयात्रा as well as the रथयात्रा of lord जगन्नाथ along with and the religious rites on the auspicious days.

So far as its essence is concerned जगन्नाथ cult fully believes in the idea of worldly welfare. There cannot be a better philosophy of life than the feelings recorded in the following popular verse quite agreeable to जगन्नाथ cult :

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः/ सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्//

I hope and believe that everybody will agree with me that the जगन्नाथ-cult has absorbed many aspects of philosophical knowledge within itself.

References

1. वामदेवसंहिता 1.42-43
2. Ibid 1.25-27
3. महापुरुषविद्या - III. 147
4. Ibid IV . 26
5. ऋग्वेद-10.155.4

6. श्वेताश्वतरोपनिषद्-3.19
7. श्रीकृष्णयामलतन्त्र 1.36
8. महापुरुषविद्या
9. गङ्गवंशानुचरित 4.18
10. Ibid 5.57
11. Ibid 5. 58
12. Ibid 5.65
13. महानाटक (हनुमान्) - 1.16
14. गीतगोविन्द 1.1.12
15. ओडिआ महाभारत, सभापर्व - सारलादास
16. Ibid, विराटपर्व - सारलादास
17. ओडिआ भागवत - जगन्नाथदास
18. - 1
19. महापुरुषविद्या - V. 30
20. रुक्मिणी विभा -II. 28
21. महापुरुषविद्या -VIII . 74
22. Ibid -VIII . 150
23. मत्स्यपुराणम् – अध्याय 81

Bibliography

1. गङ्गवंशानुचरित of Vasudeva Somayajin, Edited by Anantlal Thakur, K.P.Jayasawal Research Institute, Patna, First Edition, 1982
2. निर्णयसिन्धुः, Kamalakar Bhaṭṭa, Nirnaya Sagar press, Mumbai, 1949
3. नीलाद्रिमहोदयः, Ed. by Shridhara Mahapatra Granthamandir, Cuttack, Odisha
4. मत्स्यपुराणम्, Nag Publishers, Delhi.
5. श्रीमद्भागवतमहापुराणम्, Gita press, Gorakhpur, 1955
6. कपिलसंहिता, Published by Ratnakar Gargabatu, Batta press, Cuttack, 1925
7. धर्मशास्त्र का इतिहास, Hindi Sahity Sammelan, Allahabad
8. उत्कलीय धर्मशास्त्र, by Bhagaban Panda Grantha Mandir, Cuttack, Odisha
9. ओडिशार सांस्कृतिक इतिहास, Grantha Prakashani, Sutahat, Cuttack, Odisha
10. गीतगोविन्द , Ed. Pramila Mishra, Directorate of Tourism, Sports & culture, Odisha, Bhubaneswar, 198.
11. The गीतगोविन्द of Jayadeva (Love Song of the Dark Lord), Editor and Translator : Barbara Stoler Miller, Motilal Banarsidass, New Delhi, First Edn. 1984.
12. A History of Sanskrit Literature by : A. B. Keith, Oxford University Press, London, 1966.
13. जयदेव ओ गीतगोविन्द, केदारनाथ महापात्र, Sharada Press, Bhubaneswar, 1973
14. गीतगोविन्द with पदभावार्थचन्द्रिका, Ed. R.C. Hota, Chinmay prakashan, Allahabad, 1997
15. Dr. H.K Mahtab, Chief Editor, The Orissa Special Volume, dedicated to K.N. Mohapatra,
16. Historical Research Journal, Bhubaneswar, 1982.
17. History of Sanskrit Literature, Winternitz, Vol I & Vol II.

18. History of Sanskrit Literature, . Dr S.N. Dasgupta & Dr S.K. De, Vol - I.
19. Contribution of Utkal to Sanskrit Literature, Dr K.B. Tripathy, (A general study published in Side lights on History and culture of Orissa, Ed by Dr M.N Das, Vidyapuri, Cuttack, 1977.
20. Sanskrit Scholars of Orissa, Jayanti Rath, Orissa Review, April 2006
21. दशोपनिषद्, Published by Gita Press, Gorakhpur
22. स्तोत्ररत्नावली, Published by Gita Press, Gorakhpur, 1970
23. Odisara Sanskrutika Itihasa : Odisha Cultural Forum, BBSR, Granthamandir, Cuttack, 1984.
24. Utkaliya Dharmaśāstra-Dr. B. Panda, BBSR, 1985.
25. Inscriptions of Odisha : S. N. Rajaguru, BBSR, Vol. I, Pt.-II. 1958, Vol. II, 1960, Vol. III-Pt. I, 1960,
26. The Prachi-Vol.II-pt-III-IV.1923. p.-97-121.
27. Bhaktibhāgavata-OSM-No.-L/96
28. Studies in Bhāgavata-ED. Dr. K. C. Misra, BBSR, 1988
29. Koṇārka-(Special Issue)-Ed. Dr. B. Mohanty, BBSR, 1971
30. History of Orissa, Dr. K. C. Panigrahi, Cuttack, 1981

□□□

व्याकरण-शास्त्रीयं मोक्ष-स्वरूपम्

रामसलाही द्विवेदी

(According to Indian tradition each and every *śāstra* ultimately leads to मोक्ष or liberation and the व्याकरण is not an exception to it. An attempt has been made in this paper to describe the forms and the nature of मोक्ष as explained in the *vyākaraṇaśāstra*. Patañjali and भर्तृहरि etc. have rightly diclared grammar as a part of philosophy as its knowledge also helps in achieving the four ultimate goals (पुरुषार्थ-s) including the supreme one i.e. the मोक्ष. References are made here from different Grammatical as well as upanishadic texts in suuport of the views expressed)

सर्वेषामपि शास्त्राणां चरमपुरुषार्थ एव तात्पर्यम्। तद्वदस्यापि वेदाङ्गभूतस्य व्याकरणस्य मोक्षोपायत्वेन नूनमेव भवितव्यम्। अन्यत्र शास्त्रोक्तस्य अविद्यात्वमुपकल्प्य समुच्चयेन मोक्षसाधकत्वमभिमतं परं भाष्ये 'इयञ्च नामोत्तरा विद्या' इत्यनेन साक्षादुपकारकत्वमस्याभिमतम्। अतः शब्दब्रह्मवादिनां मतेऽजस्रमेव मोक्षप्रक्रिया तत्स्वरूपञ्च विवेचनीयम्। तदेवेहाधिशास्त्रं यथामति विवेच्यते।

व्याक्रियन्तेऽनेनेति व्युत्पत्तिप्रदार्शनेन व्याकरणशब्दस्यान्वर्थत्वं स्वीकृतम्। प्रत्यासत्त्या च कस्मात् कस्य व्यावृत्तिरित्यपेक्षायाम् असाधुशब्दावधिकसाधुशब्दकर्मिकैव व्याकृतिरिति सूच्यते। इत्थं शब्दान्वाख्यायकत्वेन शब्दशास्त्रपदेन व्यवह्रियमाणमपि व्याकरणं दर्शनपदेनापि व्यवह्रियेतैतदर्थमत्र दर्शनशब्दप्रवृत्तिनिमित्तसमन्वय आवश्यकः। यद्यपि दर्शनशब्दप्रवृत्तिनिमित्तमधिकृत्य शास्त्रेषु न काऽपि विचारसरणी दृश्यते तथाप्यस्मदीयैः पूज्याचार्यचरणैर्दर्शनपदार्थसङ्गतं लक्षणमेकं प्रत्यपादि। तथा हि- "यत्र मोक्षस्वरूपम्, मोक्षोपायः, आत्मस्वरूपम् आत्मातिरिक्तस्य निखिलस्य जगतः स्वरूपम्, तत्साधकानि प्रामणानीत्याद्यध्यात्मविषयः, प्रसङ्गोपात्तलौकिकचर्चा च दृश्यते, तदेव दर्शनपदव्यवहार्यम्" इति।" एवं वक्तुं शक्यते- दृश्यते आत्मतत्त्वं साङ्गं येन तद् दर्शनम् अथवा अध्यात्मावेदकं शास्त्रं दर्शनम् इति। उक्तलक्षणानुसारं व्याकरणशास्त्रस्य-

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।

विवर्ततऽर्थभावेन प्रक्रिया जगतो यतः।।[1]

इत्यादिभर्तृहरिकारिकानुसारं स्फोटरूपशब्दब्रह्मनिरूपकत्वाद् यथा वेदान्तादीनां ब्रह्मपरतया दर्शनत्वन्तथैवास्य शास्त्रस्यापि दर्शनत्वं सिद्धयति। इत्थम् अक्षरब्रह्मणो निर्भ्रान्तप्रतिपत्तेरुपायत्वेन

प्रकल्पितस्यानुसङ्गतस्तु शब्दवाङ्मयस्य सकलस्यापि लघुना बोधायोपदधत्सामर्थ्यम्, साधुशब्दराशेर्याथार्थ्येनोपपादितसौकर्यञ्च शास्त्रमिदं व्याकरणम्। यद्यपि आत्मा वाऽरे द्रष्टव्यः, श्रोतव्यो मन्तव्यो निदिध्यासितव्यः (बृहदारण्यकोपनिषद्- 2/4/5), य आत्माऽपहतपाप्मा सोऽन्वेष्टव्यः स विजिज्ञासितव्यः (छान्दोग्योपनिषद्- 8/7/1), आत्मानमेव लोकमुपासीत (बृहदारण्यकोपनिषद्- 1/4/15) इत्यादिश्रुतिभिः प्रत्यगात्मसाक्षात्कारस्यैव परमपुरुषार्थमोक्षसाधनत्वं समर्थितन्तथापि व्याकरणशास्त्रस्याप्यस्य वर्तते पुरुषार्थचतुष्टयोपपादकत्वम्। यथोक्तम्-

एकः शब्दः सम्यज्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति[2] इत्यादि।

धमार्थकाममोक्षेषु समेषां पुरुषार्थानां स्वातन्त्र्येऽपि फलानुसन्धानान्मोक्षस्यैव प्राधान्यं सर्वत्र शास्त्रे प्रतिपादितम्। यतो नावर्तते .... इत्यादिना। तद्वदत्रपि व्याकरणमिदं शास्त्रं मोक्षायैव प्रकल्पितम्। तत्र व्याकरणशास्त्रे मोक्षस्य किं स्वरूपमित्यवश्यमेव विचारणीयम्, तत्स्वरूपम् अनुपदञ्च शास्त्रेषु निहितन्तस्मात् मोक्षप्रकरणमाश्रित्य कश्चित् स्वातन्त्र्येण प्रबन्धे न प्रकल्पितः, *स्वर्गे लोके च कामधुग् भवति* इत्यादिना तस्यैव सङ्केतितत्वात्। किं वा 'व्याकरणन्तपः' इत्युक्तम्। यथा-

आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः।

प्रथमं छन्दसामङ्गमाहुर्व्याकरणं बुधाः।।[3]

न केवलं तपोऽपितु तपसामुत्तमं तप इदम्। भगवता भाष्यकृताऽपि तस्यैव तपस्त्वमङ्गीकृतम्। यत्तापसं सेधयति, ज्ञानं प्रकाशयति तत्तप इति परिभाषितञ्च। यथोक्तं भाष्ये-

तपस्तापसं सेधयति, ज्ञानमस्य प्रकाशयतीति।[4]

किं वा व्याकरणशास्त्रमिदं विद्यापदेनोच्यते। तदेव महाभाष्यकृता प्रोक्तम्-

व्याकरणनामेयम् उत्तरा विद्येति।[5]

'या विद्या सा विमुक्तये' इति सिद्धन्तात् नूनमेवास्य विद्यात्वस्य मोक्षेष्वेव पर्यवसानं भवितुमर्हति। अत एव भर्तृहरिणोक्तम्-

तद् द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्।

पवित्रं सर्वविद्यानाम् अधिविद्यं प्रकाशते।।

यथार्थजातयः सर्वाः शब्दाकृतिनिबन्धनाः।

तथैवं लोके विद्यानामेषा विद्यापरायणम्।

इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।

इयं सा मोक्षमाणानाम् अजिह्मा राजपद्धतिः।।[6]

पदमञ्जर्यामपि-

उपासनीयं यत्नेन शास्त्रं व्याकरणं महत्।

प्रदीपभूतं विद्यानां सर्वासां यदवस्थितम्।[7]

किं वा-

यश्च व्याकुरुते वाचं यश्च मीमांसतेऽध्वरम्।

तावुभौ पुण्यकर्माणौ पङ्क्तिपावनपावनौ।

निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते।[8]

इत्यादिरूपेणास्य विद्यात्वं प्रकाममङ्गीकृतम्। अथ शब्दानुशासनम् इत्यस्य व्याख्यावसरे- इदं व्याकरणं परमपुरुषार्थसाधकम् इति रूपेणोरीकृतम्। उक्तञ्च तत्र- 'तदेवं साधूनां शब्दानां प्रकृत्यादिविभागेन ज्ञानमेव तावत् पुरुषार्थः' इति। अत एव ये व्याकरणं पठन्ति ते साक्षाद् देवा भवन्तीति कृत्वा तेषां महिमाऽपि प्रगीतः। यथोक्तं पदमञ्जर्याम्-

रूपान्तरेण ते देवा विचरन्ति महीतले।

ये व्याकरणसंस्कारपवित्रितमुखा नराः।[9]

किं वा-

सिद्धहेमशब्दबृहद्वृत्तिलघुन्यासेऽपि व्याकरणात् पदज्ञानम्, पदज्ञानादर्थनिर्णयो भवति। अर्थात्तत्त्वज्ञानम्, तत्त्वज्ञानात् परं श्रेय इत्युक्तम्।

एवम्प्रकारेण व्याकरणस्य श्रेयःसाधकत्वं बहुत्र न्शास्त्रेषु प्रतिपादितम्। अन्यच्च-

व्याकरणस्य तपस्त्वं वाक्यपदीये वृत्तिभागे बहुधा स्पष्टीकृतम्। तदेवोच्यते-

तपो हि दुःखात्मकम्, व्याकरणाध्ययनाच्च भूयिष्ठं दुःखम् इत्युत्तमं व्याकरणं दुःखहेतुत्वात् तपः। अस्येदं तात्पर्यं यल्लोके यानि कर्माणि प्रथमतः सुखं सुवन्ति तेषामत्यन्तं प्रकृष्टत्वं नाङ्गीकृतं परं यान्यध्ययनादीनि प्रथमतया कष्टसहनपूर्वकं पालितानि भवन्ति, तेषां पर्यवसानं सुखेषु भवति। अत एव तेषां सात्त्विकत्वम् उत्तमत्वञ्च स्वीक्रियते। तद्वदत्रापि तपसा समत्वेन प्रथमक्षणे कष्टोत्पादकत्वेऽपि चरमे तु सुखस्यैवाधायकत्वाद् अस्योत्तमतपस्त्वं निश्चप्रचमेव। तदेव धर्मशास्त्रानुरोधेनास्या एव कारिकाया व्याख्यायां वृत्तिकार एवम्प्रतिपादयति-

यानि लोके तपस्त्वेनाभिख्यातानि ब्रह्मचर्याधःशयनोद्वासचान्द्रायणादीनि ये च पवित्रतमाः स्वाध्यायास्तेषामिदं दृष्टादृष्टविशेषफलहेतुत्वाद् अभिख्याततमन्तप इति।[10]

अन्यच्च महाभाष्येऽपि-

निवर्तकमिदं शास्त्रम्।[11]

धर्मोपदेशनमिदं शास्त्रम्।[12]

इत्यादिरूपेणास्य शास्त्रस्य सर्वथैव विद्यात्वं तपस्त्वं पुरुषार्थसाधकत्वञ्च महता समारम्भेण आप्तेनाचार्येण असकृत् प्रतिपादितम्।

तत्र *'धर्माय नियमो धर्मनियमः, धर्मप्रयोजनो वा नियमो धर्मनियमः*[13]' इत्यत्रास्य शास्त्रस्य प्रयोजनस्याङ्गीकाराद् धर्माख्यः पुरुषार्थो नितान्तमुद्भूतोऽचक्षुषामपि ज्ञेय इति। तत्र व्युत्पत्तीनां त्रेधाऽङ्गीकारः - 'धर्माय नियमः' इत्यस्य 'धर्मस्य नियम' इत्यत्र तात्पर्यमवगन्तव्यम्। योगविभागस्य ('चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः' इति सूत्रस्य) भाष्ये क्वचिदप्यदर्शनात्। तेन धर्मसम्बद्धो नियम इत्यर्थोऽवबोद्धव्यः।

'धर्मार्थः' इत्यत्र चतुर्थ्यास्तादर्थ्यमुपगम्य व्याख्यानं करणीयम्। 'धर्मप्रयोजनम्' इत्यस्य व्याख्याने तु धर्मस्य फलस्थानीयत्वेन व्याख्यानं करणीयम्। तेनेदं शास्त्रं धर्मसम्बद्धम्, धर्मार्थम्, धर्मोत्पादकञ्च भवत्येव। अतः चतुर्षु पुरुषार्थेषु धर्माख्यः पुरुषार्थः सिद्धः, अर्थाख्यः पुरुषार्थस्तु 'लोके च कामधुग्भवति' इत्यादिना वेदेनैव सत्यापितः। किंवा अवधार्यताम्- व्याकरणज्ञानमन्तरा न हि कस्यचित् काव्यस्य न वा पुराणस्य न वा वेदस्य वैद्यकस्य वा ज्ञानं कर्तुं युज्यते। समेऽप्यर्थव्यापाराः निर्दिष्टशास्त्राधीना एव, अर्थश्च व्यापाराधिनः। तस्माद् व्यापारज्ञानद्वारा अस्यार्थसाधकत्वं सिद्ध्यति। सङ्केतितञ्च भाष्ये-

दधिभोजनम् अर्थसिद्धेरादिः दधिभोजनसमीपे।[14]

एतेनेदं सिद्ध्यति यत् सर्वोऽपि लोकोऽर्थाय यतते। तत्रार्थसिद्धेः सूचकं दधिभोजनमस्ति। तेन प्रतिबन्धकानामपाकरणेन साक्षादर्थसिद्धिरपि साधिता भाष्यकृता। लोकस्य स्वभावोऽपि वर्णितश्च-

इह हि सर्वेऽपि मनुष्या अल्पेन यत्नेन महतोऽर्थान् आकाङ्क्षन्ति, एकेन मासेन शतसहस्रम्, एकेन कुद्दालकेन खारीसहस्रम्।[15]

इदमत्रावधेयं यच्छास्त्राणां सङ्केतोऽर्थसिद्धौ तु भवत्येव परन्तत्र सम्भावितविघ्नानाम् अपहारकत्वेन साधुसौकर्यस्य साधनेन च तेषामत्यन्तं प्राशस्त्यमपि भवति। एतेनार्थपुरुषार्थोऽप्यस्य शास्त्रस्य।

एवमेव तृतीयः पुरुषार्थः कामरूपोऽपि अत्र शास्त्रे बहुधा प्रतिपादितः। तत्र काशिकाकृतोक्तम्-

कामक्रोधौ मनुष्याणां खादितारौ वृकाविव।[16]

अर्थाद्यथा वृकौ मनुष्यस्य मांसादिकं भक्षत एव तथैवेमौ कामक्रोधावपीत्यभिप्रायः। अत्र कामशब्दः कमुकान्तौ धातोर्घञि सिद्ध्यति। कामानामानन्त्यं परिगीतं भाष्यकृता। तत्र *एकः शब्दः सम्यज्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति* इत्यस्य व्याख्यावसरे- यद्येकः सम्यज्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति किमर्था द्वितीयस्तृतीयश्च प्रयुज्यते? इति प्रश्ने उक्तम्- 'न वै कामानां तृप्तिरस्ति।' एतेनेदं सिद्धमेव यत् कामानाम् आनन्त्यम् अन्यदर्शनवदत्राप्यवश्यमङ्गीकार्यम्।

प्रायशो लोके कामपरायणानां जनानाम् असंयमाद् अन्यथैव गतिरवलोक्यते। तत्रैव भाष्यकारस्तान् नियमयति- को धर्मनियमः, कोऽधर्मनियमः, गम्यायाम् अगम्यायां वा?

सङ्केतयति चात्र यदिदं कामसाधनं नितान्तं चिराय न भवति। एकमुदाहरणमपि भाष्यकृता

प्रस्तुतम्-

यस्मिन् दशसहस्राणि पुत्रे जाते गवां ददौ।

प्राणेभ्योऽपि प्रियाख्येभ्यः सोऽयमुञ्छेन जीवति।[17]

अत्र श्लोकस्य पूर्वार्धे इदानीम् उञ्छेन जीविकामाप्तमानस्य जनस्य पूर्वस्थितिं ज्ञापयति, सूचयति च- धनं हि नाम अत्यन्तम् अस्थिरं तत्त्वम्, अतस्तत्र गर्वो न करणीयः। सर्वोऽप्यर्थो लोकाय प्रवर्तते। व्यवहारस्य ज्ञानमपि लोकाधीनमेव भवति। तदुक्तं महाभाष्योद्योते-

लोक्यते येन शब्दार्थो लोकस्तेन सः कथ्यते।[18]

व्यवहारोऽथवा वृद्धव्यवहर्तृपरम्परा।।

अतो लोकेऽपि रागतः प्राप्तस्य कामस्य संयमनमेव कामत्वम्। तेन स्वतन्त्रचारस्त्यज्यते। अत एवाभ्युदयसिद्धिः।

तदनु मोक्षपदार्थो विचार्यते- तत्र व्याकरणशास्त्रे कोषे वा मोक्षशब्दस्य पर्यायवाचित्वेन निर्वाणशब्दः कैवल्यशब्दः सायुज्यशब्दो ज्ञानशब्दो मुक्तिशब्दश्चोपात्तः। तत्र निर्वाणशब्देऽवातेऽर्थे निर्वाणशब्दस्य नत्वनिपातनं विधीयते।

अयम्भावः - निष्ठाया नत्वविधानाय बहुषु सूत्रेषु प्रकल्पितेष्वपि, तेषु केनाप्यत्र नत्वं न सिद्ध्यति। तस्माद् अवातेऽर्थे नत्वनिपातनं कृतम्। णत्वं लक्षणान्तरसिद्धम्। तत्र गतिगन्धनार्थकस्य वाधातोरत्र केवलं गत्यर्थ एवाङ्गीकृतः। गतिश्च ज्ञानरूपा। यतः सर्वत्राऽप्यद्वैतसिद्धान्ते अप्राप्तप्राप्तिरेव मोक्षस्य भवतीति सिद्धान्तितम्। केवलम् अज्ञाननिवर्तनमेव शास्त्रेण क्रियते। अत एव विवर्तवादस्य समारम्भः फलति। तेन वाक्तत्त्वस्य प्रत्यक्साक्षात्कार एव मोक्षः।

प्रायशः बहवोंऽशा अस्य शास्त्रस्याद्वैतदर्शनेन सममेव भवन्ति यद्यपि, तथाप्यद्वैतदर्शने शब्दतत्त्वस्यानित्यत्वम्। अत्र तु नित्यत्वम् अङ्गीक्रियते। अन्यच्च- तत्रेक्तं व्याकरणशास्त्रम् अविद्यास्पदम्, अत्र तु विद्यात्वेनैवाङ्गीक्रियते। यतस्तैरुक्तम्-

तत्रैव-

अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।

ततो भूय इव ते तमो यउविद्यायां रताः।।[19]

तत्र व्याख्याकृद्भिरेवम्प्रतिपादितं यत्- 'विद्यया देवलोकः। कर्मणा पितृलोकः।[20]

तत्रैव व्याख्यानं कृतवद्भिराचार्यश्रीशङ्करैः - *"नहि शास्त्रविहितं किञ्चिद् अकर्तव्यतामियात्।*[21]*"* (शङ्करभाष्यम् 1/5/16) इत्यादिना समेषामपि सार्थकत्वं प्रतिपादितम्। उत्कर्षापकर्षत्वन्तु फलभेदाद् अवगन्तव्यमेव।

मन्येऽहमत्र केवलं कर्मण एव निषेधः, उपासनासमन्वितस्य कर्मकाण्डस्य निषेधस्त्वाचार्यस्य नाभिप्रेतः। तेन समुच्चयः सिद्धः। यतो विद्याया अविद्यायाश्च साफल्यम् उपनिषद्येव प्रगीतम्। उक्तञ्च-

विद्याञ्चाविद्याञ्च यस्तद् वेदोभयं सह।

अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते।।[22]

अत एवामृतावस्था सिद्ध्यति। परिभाषिता चेयममृतावस्था-

यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह।

बुद्धिश्च न विचेष्टति तामाहुः परमां गतिम्।। [23]

अन्यच्च मुण्डकोपनिषद्यपि-

द्वे विद्ये वेदितव्ये इतिहस्म यद् ब्रह्मविदो वदन्ति, परा चैवापरा च।[24]

तत्र श्रीमच्छङ्कराचार्यैरेवं व्याख्यातम्- *"परा परमात्मविद्या, अपरा च धर्मसाधनतत्फलविषया। तत्र परा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्यौतिषमिति। अथ परा यया तदक्षरमधिगम्यते।*[25]*"*

एवमेव *"उपनिषद्वेद्याक्षरविषयं हि विज्ञानम्। इह परा विद्येति प्राधान्येन विवक्षितम्। अक्षरब्रह्म इत्यनेन ब्रह्मतत्त्वमेवावगन्तव्यं न तु शब्दराशिः।"* इत्यादि।

परमेतन्मतं वैयाकरणानां नाभिप्रेतम्, यतो व्याकरणमित्यस्य साक्षाद् वेदोपकारकत्वाद् विद्यात्वमेव। वेदा नहि अविद्याग्रन्था अपितु शब्दब्रह्मरूपा एव। अथ च वैयाकरणानाम् अक्षरराशिरेव ब्रह्मपदेनाभिधीयते। स च स्फोटरूप इत्यन्यदेतत्। इदन्त्ववधेयं यद् वैयाकरणानां शब्दो ध्वनिभिन्न एव। बहुधोक्तं तत्र- "स्फोटः शब्दः, ध्वनिस्तु शब्दगुणः" तपरस्तत्कालस्य इत्यस्य भाष्ये। अतः समाशङ्किता विप्रतिपत्तयोऽपि न भवन्ति। अत्र च स्फोटस्य आवरणभङ्गतैव स्वरूपत्वेनाङ्गीकृता। यथा अद्वैतसिद्धान्ते निवर्तितोपाधौ ब्रह्म एवानुभूयते तथैवात्रापि शब्दतत्त्वस्यैव ज्ञानं नेतरस्य, तदितराभावात्। "यस्मिंश्च विज्ञाते सर्वमविज्ञातम्भवति" इत्यादिश्रुतेरुभयथापि प्रसङ्गात्। तेनानुभूयत इत्यौपचारिकम्। एतन्मतापेक्षया वैयाकरणमतवैलक्षण्यावबोधाय तन्निरूपणं क्रियते-

व्याकरणं मुख्यतोऽष्टौ कार्याणि करोति। तत्र कारिकाः -

अपोद्धारपदार्था ये ये चार्थाः स्थितलक्षणाः।

अन्वाख्येयाश्च ये शब्दा ये चापि प्रतिपादकाः।।

कार्यकारणभावेन योग्यभावेन च स्थिताः।

धर्मे ये प्रत्यये चाङ्गं सम्बन्धः साध्वसाधुषु।।[25]

अत्र 'धर्मे प्रत्यये चाङ्गम्' इत्याकूतम्। तत्र व्याख्यातञ्च- साधोः शब्दस्य यः सम्बन्धोऽर्थेन स ज्ञाने शास्त्रपूर्वकि वा प्रयोगे धर्माभिव्यक्तावङ्गत्वं प्रतिपद्यते। 'स्मृत्यर्थमवगम्यन्ते' इत्यनेन तु शब्दसाधुत्वविज्ञानं

व्याकरणस्मृतिप्रयोजनमेव मोक्षस्तु पारम्पर्येण फलमिति ज्ञाप्यते। अतस्ताभ्यां सहास्य शास्त्रस्य हेतुहेतुमद्भावरूपः सम्बन्धः प्रतिफलति। तादृशफलकामस्याप्यधिकारिणः स्वरूपमवधारयति। शब्दतत्त्वस्य स्फोटाख्यस्य च साक्षात्कारो व्याकरणेन क्रियते। अनुपहितस्य तु विशुद्धस्य साक्षात्कार आगमेन। यथा- तं त्वौपनिषदं पुरुषं पृच्छामि' इत्यस्य व्याख्यायाम्-

'तद् व्याकरणमागम्य परं ब्रह्माधिगम्यते' इति कथनाद् आगमवाक्यार्थावबोधार्थमपि छन्दसां मुखं व्याकरणमध्येयम्। ब्रह्मसाक्षात्कारादेव मोक्षः, तच्च परमं प्रयोजनमिति स्पष्टीकृतम्। तदेवोक्तं भर्तृहरिणा-

न चागमादृते धर्मस्तर्केण व्यवतिष्ठते।
ऋषीणामपि यज्ज्ञानं तदप्यागमपूर्वकम्।।

एतत्त्ववान्तरप्रयोजनम्। अत एव प्रथमतो ब्रह्मणः स्वरूपं स्थापितम्-

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।। इत्यादिना।

एतस्य शाब्दबोधः स्वोपज्ञकारेणैवं समर्थितः -

"सर्वपरिकल्पातीततत्त्वं भेदसंसर्गसमतिक्रमेण समाविष्टं सर्वाभिः शक्तिभिर्विद्याऽविद्याप्रविभाग-रूपमप्रविभागं कालभेददर्शनाभ्यासेन मूर्तिविभागभावनया च व्यवहारानुप-पत्तिभिर्धर्माधर्मैः सर्वास्ववस्थासु अनाश्रितादिनिधनं ब्रह्मेति प्रतिज्ञायते।" इति।

किञ्च-

वैकृतं समतिक्रान्तं मूर्तिव्यापारदर्शनम्।
व्यतीत्यालोकतमसी प्रकाशं यमुपासते।।
यत्र वाचो निमित्तानि चिह्नानीवाऽक्षरस्मृतेः।
शब्दपूर्वेण योगेन भासन्ते प्रतिबिम्बवत्।।[26]

इति प्रघट्टके तद् व्याकरणमागम्य परं ब्रह्माधिगम्यते इत्येतेन ब्रह्मणः साक्षात् प्राप्त्युपायत्वेन व्याकरणमिदं विद्यायामेव प्रविष्टिमुपैति। अतो विद्यायाः साफल्यं मोक्षद्वारेणैवोपपादितम्। तेन 'यं प्रकाशमुपासते' इत्यनेनाभिव्यज्यते यत् प्रकाशावाप्तिरेव मोक्षः इति। स च प्रकाशो ब्रह्मरूपः। स्वतन्त्रस्य तस्यैव स्वराट्त्वेन बहुधाऽभिधानात्। अत्र कारिकायां ब्रह्मणः साक्षात् स्वरूपं निर्दिष्टम्, यतः पण्डितधौरेयेण श्रीमता रघुनाथशर्मणैवं प्रतिपादितं यद्- *"विकृतौ भवं वैकृतम्"*। मायायाः परिणामो ब्रह्मणस्तु विवर्तः, तत्र भवमित्यर्थः। तत्रोपाधिवशात् मूर्त्याः परिच्छिन्नस्य जगद्रूपस्य व्यापारस्य दर्शनं प्रातिभासिकतयाऽनुभूयते। ये तु भेददर्शनस्यासत्यत्वाद् अभेददर्शने व्यवसिता योगिनस्त एव आलोकतमसी व्यतीत्य तम् तच्छुद्धं ब्रह्मावाप्नुवन्ति। 'आलोकतमसी' इत्यनेन विद्याविद्ये ग्राह्ये। तत्र ब्रह्मणि विद्याया अविद्यायाश्च स्थितिर्न भवति। अत एव तस्य निर्विकल्पकसमाधावेव साक्षात्कारो

जायते। एतेनेदमपि सिद्ध्यति यद् व्याकरणद्वारा मूर्तिव्यापारदर्शने व्यपगते यच्चैतन्यं शब्दरूपं प्रत्यक् साक्षात्क्रियते, स साक्षात्कार एव मोक्षः। वेदान्तदर्शनवद् अत्रपि मायायाः परिणामो ब्रह्मणश्च विवर्तोऽवलोक्यते। तेनैव शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः इत्यस्याः कारिकायाः घटकीभूता षष्ठी तत्समभिव्याहारे परिणामशब्दोऽपि सङ्गच्छतः। एतेनैकत्र परिणामोऽन्यत्र विवर्त इति विरोधाभासः परिहृतः। सिद्धान्ततः शक्तिर्नाम परिणाम एव। अत्र च ब्रह्मणो विवर्तत्वे आचार्यो भर्तृहरियाँ कारिकां निर्दिशति, तदेवास्माकं प्रमाणम्। यतस्तस्य प्रसिद्धो व्याख्याकारः श्रीहरिवृषभः स्वविरचितस्वोपज्ञटीकायां विवर्तस्य लक्षणमेवं निर्दिशति-

एकस्य तत्त्वादप्रच्युतस्य भेदानुकारेणासत्यविभक्तान्यरूपोपग्राहिता विवर्तः।[27]

अस्यायम्भावः - यथा वेदान्तदर्शने विविधानि श्रुतिप्रमाणानि अवलम्ब्यावलम्ब्य तस्य ब्रह्मणः स्वप्रस्थानानुरूपं व्याख्यानं क्रियते, तथैवात्रापि श्रुतीनां प्रामाण्येन शब्दब्रह्मणो ब्रह्मत्वं प्रतिपाद्यते। ताश्च श्रुतयः -

'प्रणव एवैकस्त्रेधा व्यभज्यत।'

असद्वा इदमग्र आसीत्, किन्तदसदासीत् ऋषयोवाऽव तेऽग्रे तदसदासीत् य ऋषयः प्राणा इति।

अत्र ब्रह्मणः सलिलत्वेन रूपेणोपादानं स्वच्छत्वरूपं साम्यमुपादाय प्रतिपादितम्। यथाऽन्यत्र विभुत्वादाकाशत्वेन निरूपणं क्रियते। अस्य ब्रह्मणो बहूनि रूपाणि, तेन प्रणवत्वेन निरूपणम्। तस्य वाचकः प्रणवः इत्यादिषु वाच्यवाचकभावस्य तादात्म्येन ग्रहणात् प्रणवत्वमुपपादितम्। उताहो प्रणवशब्दार्थ अविवृत्त आत्मा। स च प्रणव ऋग्यजुःसामभेदैस्त्रिधा रूपतां भजते। तेनैव प्रकारेण 'ऋषयः प्राणाः' इत्यत्र प्राणपदेन इन्द्रियाणां ग्रहणं कर्तव्यम्। प्राणानामसत्त्वञ्च विकारत्वाद् ब्रह्मणः। तेनेदं सिद्ध्यति यद् इन्द्रियाणि तस्यैव विकारभूतानि न तु वास्तविकानि। अतः श्रुतीनां समानप्रामाण्येन शब्दस्यापि ब्रह्मरूपत्वं निर्विवादम्। अत्रैवानेकानि आगमशास्त्राणि प्रमाणभूतानि। ब्रह्मणः परिणामः सर्वथा निषिद्धः, यत उक्तं हरिवृषभेण-

सर्वतः परिवर्तानां परिमाणं न विद्यते।

तस्या या लब्धसंस्कारा न स्वात्मन्यवतिष्ठते।। इति

अविद्याऽप्येवम्भूताऽवगन्तव्या, तस्या अपि परिमाणं न विद्यते। यतोऽविद्या लब्धसंस्कारा स्वात्मनि = स्वरूपे नावतिष्ठते। तस्या नितान्तम् असत्त्वात्। अतस्तस्या अधिष्ठानस्य सर्वतोभावेन भेदरहितत्वेन वस्तुतो भानात् तद्गतानां भेदानां विवर्तत्वेनैव भानं करणीयमिति।

"शब्दब्रह्मणो मूर्तिक्रियाविवर्तौ अविद्याशक्तिप्रवृत्तिमात्रम्, तौ विद्यात्मनि तत्त्वान्यत्त्वाभ्याम् अनाख्येयौ, एतद्धि अविद्याया अविद्यात्वम्" इति सिद्धान्ताङ्गीकारेऽपि अद्वैतवेदान्तस्य प्रक्रियायाः प्रभावोऽत्रावलोक्यते। यतः "अतात्त्विकोऽन्यथाप्रथा विवर्तः" इति लक्षणं वेदान्तविद्भिः प्रत्यपादि, वैयाकरणैरपि च "एकस्य तत्त्वादप्रच्युतस्य भेदानुकारेणासत्यरूपोपग्राहिता विवर्तः" इति। तर्हि तत्त्वादप्रच्युतस्येति कथनेन

अतात्त्विकोऽन्यथाप्रथाभाव एव समर्थितः। अयञ्च विवर्तः मूर्तिरूपः क्रियारूपश्च। यथा 'गेहे घटः, क्षेत्रे गौः' इत्यत्र देशभेदावग्रहरूपेण गोः घटस्य च ज्ञानं जायते। एतच्च ज्ञानमवस्थानरूपम्। तेनास्य विवर्तस्य मूर्तिरूपता भवति। तस्यैव यदा जायते, नश्यति इत्यादिरूपेण ज्ञानं क्रियते, तस्य ज्ञानस्य क्रियोपहितत्वात् तत्सम्बन्धिभेदावग्रहः क्रियारूपतां प्राप्नोति। असौ द्विविधोऽपि विवर्तः शक्तिप्रवृत्तिभ्याम् अवस्थाभेदेन भेदमुपदधत् चातुर्विध्यम् अङ्गीकरोति। अवलोक्यताम्- सदपि वस्तु निर्दिष्टकारणवशाज्जायते, नश्यतीत्याद्यनुभूतीनां विषयो न भवत्यपितु नास्तीत्यादिव्यवहारात् तस्यादर्शनमेव परिकल्प्यते। तदाऽदर्शनबेलायां तस्य भौतिकीसत्ताङ्गीकारात् शक्तिरूपो विवर्तः परिकल्प्यते। यदा तु व्यवहारे तयोः सङ्घटनं जायते, तदा प्रवृत्तिरूपो विवर्तोऽवधेयः। द्वावपि विवर्तौ विद्यारूप आत्मन्यविद्यावशाद् भेदाभेदाभ्याम् अनिर्वाच्यौ भवतः। तदेवोक्तम्- 'एतद्धि अविद्याया अविद्यात्वम्, अनिर्वचनीयत्वम् इति यावत्'। अत्र जगत्पदेन सकलोऽप्यागमः, त्रयीरूपोऽवगन्तव्यः। अतो लक्षणावृत्त्या जगत्पदेन आगमानां शास्त्राणाञ्च ग्रहणं कर्तव्यम्। तदेवोक्तम्-

यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै।

एतेन सर्वप्रथमतो वेदानामेव स्थितिर्ज्ञायते। तदेव श्रीमद्भागवतेऽपि- ''तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः'' इत्यादि सङ्गच्छते। अन्यथा ब्रह्मणः पश्चात् तत्सत्ताङ्गीकारेऽभावभूतस्य वस्तुनो विस्तारस्य प्रतिपादनम् असम्भवमेव स्यात्। इदमपि वक्तुं शक्यते- ''वस्तुसदेकस्योपाधिवशाद् अनेकत्वप्रतीतिर्विवर्तः'' इति। यदा सर्वविकाराणां प्रलये वर्णमात्रपदाद्यानुपूर्वी तिरोहति, तदैवोपसंहृतक्रमं शब्दाख्यं ब्रह्म वस्तुरूपेणावतिष्ठते। तस्य चेयमेवावस्था अनेकस्य एकत्रोपसंहारः संवर्तः' इत्यादिरूपेण परिभाषणाद् विद्वद्भिरवगम्यते। तेनेत्येतत्कथनं सम्भवति- 'संवर्तस्य भानमपि मोक्षः' इति। तदेवोक्तं हारिवृषभे-

व्यतीतो भेदसंसर्गौ भावाभावौ क्रमाक्रमौ।
सत्यानृते च विश्वात्मा प्रविवेकात् प्रकाशते।।
अन्तर्यामी स भूतात्मा आराद् दूरे च दृश्यते।
सोऽत्यन्तमुक्तो मोक्षाय मुमुक्षुभिरुपास्यते।।[28]

तेनेदं वक्तुं शक्यते यद् दृश्यादेरसत्यत्वाद् असंसर्गतया ब्रह्मणः प्रत्यक्चैतन्यरूपेण स्वप्रकाशत्वेन चोपलब्धिर्मोक्ष इति। अत एव तस्यान्तर्यामित्वं कथितम्। स परमात्मा समेषां प्राणिनाम् अन्तोऽवस्थाय प्रवर्तको भवति। तस्य प्रवर्तकस्य ज्ञानमेव मुमुक्षूणां कृत्यम्। ते च निष्कामकर्मानुष्ठानेन तस्यैव सेवनं समाधौ साक्षात्कारेण च कुर्वन्ति। अत एवम्भूतस्य तत्त्वस्य साक्षात्कार एव मुमुक्षूणां कर्म, तल्लक्ष्यञ्च मोक्षः। तस्य ब्रह्मणः स्वरूपम् एवमपि हारिवृषभेणमप्रतिपादितम्-

शान्तं विश्वात्मकं योंऽशस्तदु हैतदविद्यया।
तयाऽग्रस्तमिवाजस्त्रं या निर्वक्तुं न शक्यते।।

एतेनाऽप्यविद्यया शान्तस्य नित्यविज्ञानात्मकस्यापि तस्य ब्रह्मणोऽभ्रखण्डेन आदित्यबिम्ब इव यथा अन्यथारूपेण प्रतिभास्यते तथैवाभ्ररूपेण बहुधा प्रचीयमानैषा अविद्या शान्तस्यापि चाञ्चल्यम् उपकल्पयति। तेन चाञ्चल्यभावस्य परित्याग एव मोक्षः इति सिद्ध्यति। अत एवोक्तम्-

यः सर्वपरिकल्पानाम् आभासेऽप्यनवस्थितः।

तर्कागमानुमानेन बहुधा परिकल्पितः।।[29]

अनेन प्रकारेण समस्तमपि नामरूपात्मकम् अग्निसोमात्मकञ्च जगच्छब्दतत्त्वस्यैव विवर्तभूतम्, नहि कस्यचिदन्यस्य अद्वैताभिप्रेतस्येति वैयाकरणानामभिप्रेतम्। अत्र केचनाक्षिपन्ति यद् भिन्नस्वरूपाणां भिन्नेन्द्रियग्राह्याणाञ्च रूपादीनाम् अभिन्नरूपम् अभिन्नेन्द्रियग्राह्यञ्च शब्दतत्त्वं कथं प्रकृतिरिति? लोकेऽप्युपादानोपादेययोः सारूप्यस्यावलोकितत्वात्, अस्यैवौचित्याच्चेति। अस्य समाधिः श्रीरघुनाथशर्मणैवं कृतः- यद् अविद्यावशाद् रूपादीनां भिन्नरूपता उपपादिता न हि सा वास्तविकी, अत एव ''वाचारम्भणं विकारो नामधेयं मृत्तिका इत्येव सत्यम्'' इत्यादिश्रुतिषु प्रकृतेरेव मृत्तिकास्थानापन्नस्य तत्त्वस्य सत्यत्वं प्रतिपादितम्। तेन रूपादीनां वस्तुतोऽभावात् केवलं प्रातिभासिकत्वाच्चोपादानोपादेयभावो न परिकल्प्यते। अतोऽविद्यमानदृष्टान्तेन तत्रापत्तिदानं न युज्यते।

अन्यदपि- शब्देन वस्तु परिच्छिद्यते, अत एव प्रकृतिविकृतिभावेन 'शब्दात्मकं वस्तु' इति व्यवहारः। अयञ्च व्यवहारोऽनेन तर्केण पुष्टो भवति- यद्यर्थः शब्दात्मको न भवेत् तदा शाब्दे ज्ञाने न प्रतीयेत किन्तु शब्देन शब्द एव प्रतीयेत ह्यर्थस्य भानं स्यात्। तदनुसारमेव अन्येनान्यस्य प्रतीत्यसम्भवात्। स्वप्रतीतिजनकतायाः स्वस्यैवानुभूतत्वात्। प्रतीतिशब्देन चार्थः शब्दप्रकृतिकतया तेन शब्दात्मकोऽयमर्थ इति प्रतीतिर्भवत्येव। अत एव-

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।

अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।।[30]

इत्याद्युक्तम्। अथ च शब्देन विषयविशिष्टं ज्ञानमेव प्रतिपाद्यते। यथा- 'मम घटः' इति ज्ञानं जातम्। शब्दात्मकोऽर्थो ज्ञानञ्चेति पार्थक्येन प्रतीतिर्न भवति। एतेनापि सम्बन्धिवशिष्टस्यैव शब्दस्य ज्ञानं सिद्ध्यति। तेन नह्येवम्भूतोऽर्थ उपलभ्यते यस्य शब्दमन्तरा ज्ञानं स्यात्। अतः सर्वत्रानुस्यूतत्वं शब्दस्यावश्यमेवाभ्युपेयम्। अत एव सर्वेऽपि स्थितिप्रवृत्तिनिवृत्तिरूपा व्यवहाराः शब्दमयाः। तेषां समेषां व्यवहाराणां मूलभूतं शब्दात्मकं तत्त्वं ब्रह्मेति सिद्धान्तोऽवगन्तव्यः। अत्र ब्रह्मणो वस्तुसद्भावेनार्थस्य तु संसर्गतया औपाधिकं वा ज्ञानमेव मोक्षः। अत एव ब्रह्मणो दशाद्वयी प्रतिपादिता।

एका विद्ययाऽप्रविभागरूपा, अपरा अविद्यया प्रविभागरूपा च। प्रविभागदशायां ब्रह्म विविधविकल्पगोचरम्भवति, अस्यामेव दशायां ब्रह्मणो धर्मधर्म्यादिरूपेण विकल्पोऽपि प्रतिपाद्यते। यथा घटोऽभूत्, भवति, भविष्यति इत्यादिरूपेण एकस्यैव घटस्य नाना व्यवहारा भवन्ति, तत्रैव 'सोऽयं घटः' इति प्रत्यभिज्ञावशाद् अभेदप्रत्ययोऽपि भवति। अतः सर्वमेतत् प्रविभागदशायां परिकल्प्यते। अप्रविभागदशायान्तु संवर्तेनोपक्रान्तं ब्रह्मैवावशिष्यते। अतोऽप्रविभागदशामुपगतस्य शब्दतत्त्वस्य साक्षात्कार एव मोक्षः।

एतत्सर्वं व्याकरणज्ञानेनैव सम्भवति, तस्यैव विवेचनाधिकारात्। अत्रोच्यते- यदविद्यावशाद् ब्रह्मणि नानात्वप्रतीतिः, सत्य इव जायते, परन्तु वस्तुगत्या सा सत्या न भवति, ब्रह्मणः कूटस्थनित्यत्वेन उत्पत्तिनिधनादिरूपसत्यविकल्पासम्भवात्। तदेव सिद्धे शब्दार्थसम्बन्धे इत्यत्र भाष्यकृताप्युक्तम्-

तस्मात् कार्यप्रतिद्वन्द्विभावान्मन्यामहे नित्याः शब्दा इति।[31]

अत्रेदमपि न शङ्कनीयं यद् विवर्तदशायां प्रतीयमाना विषया न सत्यास्तर्ह्यसत्यभूतानां विषयाणां कुतः प्रतीतिरिरिति? यतोऽनादौ संसारे यदभूद् भवति, भविष्यति चैतत्सर्वं कालभेददर्शनं तदभ्याससञ्जातसंस्काराणां परिपाकवशात् कालोपाधिना यः पृथग् व्यवहारोऽनुभूयते, स कालव्यवहारः। पृथग्रूपेण गोघटादीनां पृथक् पृथग् देशग्रहणाभ्यासात् सर्वोऽपि नानाव्यवहारो देशोपाधिकः। व्यापकस्य ब्रह्मणः सर्वत्र सत्त्वात् तेन तद्विवर्तभूतानां वस्तूनां तद्व्यतिरेके ब्रह्मणो देशकालकृतव्यवहाराभावेन च सर्वथाऽसम्भवात् नानात्वं न प्रतीयेत। अतस्तत्र सर्वत्रपि कालोपाधिर्देशोपाश्चिाङ्गीकर्तव्यौ। ब्रह्मणस्तु देशकालकृद्व्यवहाराभावः। उक्तञ्च हेलाराजीये-

प्रदेशोऽपि ब्रह्मणः सार्वरूप्यमनतिक्रान्तश्च विकल्पश्च।[32]

अस्या विवरणमेवं कृतवान् पण्डितश्रीरघुनाथशर्ममहाभागः -

ब्रह्मणः सार्वरूप्यं सर्वात्मकत्वमेव अध्यासिकमनतिक्रान्तम्, अत एव तत्र विकल्पः कल्प्यत इति। अतो देशकालभेदेन व्यावहारिकस्य धर्मधर्म्यादिभावेन चोत्पत्तिविनाशादिषु प्रतिभासितस्यैव विकल्प्यमाना विषयाः। एतत्तु व्यवहारमात्रम्। एतेन ब्रह्म आदिनिधनेऽन्यान् वा विकल्पान् समाश्रयतीति कुतः कूटस्थत्वम्, कुतोऽविकारित्वम् इति विमतीनां प्रवादा अपि विखण्डिता भवन्ति। वस्तुतो विकारदशायामपि ब्रह्मणोऽनादिनिधनत्वमेव। एकमेव ब्रह्म कार्यञ्च कारणञ्च, अतो यथाक्रमं विभक्तञ्चाविभक्तञ्च सर्वेषु श्रुतिप्रमितवादेष्ववस्थितम्। तस्य च कार्यं प्रति प्रवृत्तिकोटिर्निवृत्तिकोटिर्वा यथाक्रमं पूर्वापरकालकल्पनाशून्या न परिसङ्ख्यातुं शक्यते। नहि ब्रह्मणः सर्गप्रवृत्तेः प्राक् किञ्चिदासीत्, सर्गप्रवृत्तेः पश्चात् च न किञ्चिद् भविष्यतीति न वक्तुं शक्यते, अनादित्वात् प्रवृत्तिनिवृत्त्योः कालपरिच्छेद्यासम्भवात्' इति रघुनाथशर्माण उल्लिलिखुः। अस्योपजीव्यन्तु स्वोपज्ञवृत्तिरेव। सा च आनुपूर्वी उपस्थाप्यते-

"नहि कार्यकारणात्मकस्य विभक्ताविभक्तस्यैकस्य ब्रह्मणः सर्वप्रवादेष्वपूर्वापरे प्रवृत्तिनिवृत्तिकोटी परिसंख्यायेते। न चास्योर्ध्वमधिस्तर्यग्वा मूर्तपरिवर्त्यप्रत्यङ्गानां क्वचिदवच्छेदोऽभ्युपगम्यते। तत्तु भिन्नरूपाभिमतानामपि विकाराणां प्रकृत्यन्वयित्वाच्छब्दोपग्राह्यतयोपग्राहितया च शब्दतत्त्वमित्यभिधीयते।"

एतेनैतत्प्रक्रियाद्वारा शब्दतत्त्वस्य ज्ञानमेव मोक्षः। अयमेव मोक्षपदार्थो वैयाकरणनिकाये।

।। इति शम्।।

न्दर्भाः

1. वाक्यपदीयम्, ब्रह्मकाण्डम्, अम्बाकर्त्रीसहितम्, का. -1, पृ. - 1, सं.सं.वि.वि.वाराणसी, 2006, चतुर्थसंस्करणम्।

2. महा. 6/1/4

3. वाक्यपदीयम्, ब्रह्मकाण्डम्, अम्बाकर्त्रीसहितम्, का. -11, पृ.-30, सं.सं.वि.वि.वाराणसी, 2006, चतुर्थसंस्करणम्।
4. महा. 6/1/49, वा.- 2
5. महा. 1/2/32
6. वाक्यपदीयम्, ब्रह्मकाण्डम्, अम्बाकर्त्रीहितम्, का. - 14-16, पृ. - 37-39, सं.सं.वि.वि.वाराणसी, 2006, चतुर्थसंस्करणम्।
7. पदमञ्जरी।
8. अथ शब्दानुशासनम्, पृ. 11, पदमञ्जरी, रत्ना पब्लिकेशन्स, वाराणसी, प्रथमसंस्करणम्-1985
9. पदमञ्जरी पृ.-14, रत्ना पब्लिकेशन्स, वाराणसी, प्रथमसंस्करणम्-1985
10. वाक्यपदीयम्, ब्रह्मकाण्डम्. स्वोपज्ञवृत्ति, पृ.- 30 कारिका-11, सं.सं.वि.वि.वाराणसी, 2006, चतुर्थसंस्करणम्।
11. महा. 1/1/1
12. महा. 6/1/84
13. महाभाष्यम्, पस्पशाह्निकम्, पृ.- 55, प्रतिभाप्रकाशनम्, द्वितीयसंस्करणम्- 1999
14. तत्रैव, 6/4/161
15. तत्रैव, 2/1/69
16. काशिका 5/3/155
17. महा. 1/4/3
18. तत्रैव, 4/1/3
19. ईशावास्योपनिषद्- 9, ईशादि नौ उपनिषद्, पृ- 8, गीताप्रेस-प्रकाशनम्।
20. बृहदारण्य. 1/5/16
21. शङ्करभाष्यम् 1/5/16
22. ईशावास्योपनिषद्- 11, ईशादि नौ उपनिषद्, पृ. 10, गीताप्रेस-प्रकाशनम्।
23. कठोपनिषद्- 2/3/10
24. मुण्डकोपनिषद्- 1/1/4
25. शङ्करभाष्यम्- 1/1/5
26. वाक्यपदीयम्, ब्रह्मकाण्डम्, कारिका- 19, 20, पृ.- 40, सं.सं.वि.वि.वाराणसी, 2006, चतुर्थसंस्करणम्।
27. तत्रैव, ब्र. स्वोपज्ञवृत्तिः, पृ. 5, सं.सं.वि.वि.वाराणसी, 2006, चतुर्थसंस्करणम्।
28. वाक्यदीयम्, ब्रह्मकाण्डम्, स्वोपज्ञवृत्तिः, पृ. 7, सं.सं.वि.वि.वाराणसी, 2006, चतुर्थसंस्करणम्।
29. तत्रैव, पृ.6

30. तत्रैव, पृ. - 183
31. महाभाष्यम्, पस्पशाह्निकम्, पृ. 49, प्रतिभाप्रकाशनम्, द्वितीयसंस्करणम्- 1999
32. वाक्यपदीयम्, ब्रह्मकाण्डम्, अम्बाकर्त्री, पृ.- 3, सं.सं.वि.वि.वाराणसी, 2006, चतुर्थसंस्करणम्।

❐❐❐

(I)

Book : लघुपद्यप्रबन्धत्रयी, Authored by : **Dr. Ramji Thakur,** Published by, **Rashtriya Sanskrit Sansthan,** 56-57, Institutional Area, Janakpuri, New Delhi, 2010, **pp.75**, Rs. **95** /-

Dr. Ramji Thakur, the poet of the present Anthology is recently awarded with the Sahitya Akademy award for his *Laghupadyaprabandhatrayī*. Before that the author has given a number of marvelous creations in the form of poetry to the lovers of contemporary creative writings in Saṇskrit. As per my knowledge goes, at least ten other creative literary works have been published so far to his credit. Besides the present one, he is the author of following काव्य-s, namely, वैदेहीपदाङ्कम्, राधाविरहम्, बाणेश्वरी, प्रेमरहस्यम्, मातृस्तन्यम्, गीतिमाधुरी (2009), काव्यकोष (2011) गोविन्दचरितामृतम् (all from Rita Prakashan, Darbhanga) आर्याविलासः (2009, Vidyanidhi prakashan, Delhi), लघुपद्यप्रबन्धत्रयी (2010, Rashtriya Sanskrit Sansthan, New Delhi). His other three *kāvyas*, namely, *Amṛtamanthanam* (his first महाकाव्य), ऋतुचक्रम् and त्रिधारा are awaiting early publication.

As it is clear from the title, the present anthology is a collection of three लघुकाव्य-s, namely, अनुशासनम् (खण्डकाव्य), लीलाशुकीयम् and प्रेरणापुरुषः आब्राहमलिङ्कनः. Out of these three, the first खण्डकाव्य : अनुशासनम् contains 63 verses, while the second काव्य-लीलाशुकीयम् consists of five cantos having 217 (46+35+33+71+32) verses and the last one, i.e. प्रेरणापुरुषः आब्राहमलिङ्कनः contains 64 poems. Thus, the collection contains 344 verses in all.

In अनुशासनम् the poet has presented the essence of the उपनिषद्-s and the values of purāṇic statements. For example, the poet says :

कुवासनाजालनिबद्धमानसे न शान्तिरस्ति स्थिरताऽपि न क्षणम्।
चलत्तरङ्गे जलधौ निपातितो निमज्जनोन्मज्जनलुप्तचेतनः।38।

Here the वित्तेषणा is criticized and the bad result of लोकेषणा is highlighted.

रामोऽनुधावति स्वर्णमृगं वैदिहि रटन् विचरति सदैव।

को वित्ततृष्णया मुक्तमनाः सा भवति नाम दुःखप्रदैव।19।

The basic essential poetic qualities such as अलङ्कार etc. are applied in appropriate ways through varios traditional metres. Sometimes the poet has used the metres of his mother tongue Maithili. The poet has depicted the troubles faced by people in modern life. The poet has also taken into account the tendencies like selfishness and greediness etc. and has criticized such tendencies.

लीलाशुकीयम् is a चरितकाव्य. We find many चरितकाव्य-s in ancient Indian literature. For example, Rajavallabha has written *Bhojacaritam* depicting the life history of Bhoja in a poetry form. The famous शङ्करदिग्विजय *kāvya* also depicts the life history of शङ्कर. In the modern age, Paṇḍitā Kshamā Rao has also written a चरितकाव्य, namely, शङ्करजीवनाख्यानम् depicting the life history of her father शङ्करपाण्डुरङ्गपण्डित.

The भक्तिकाव्य कृष्णकर्णामृतम् is attributed to the saint poet विल्वमङ्गल who is otherwise named as लीलाशुक, because, he used to recite the names of the लीलापुरुष श्रीकृष्ण just as a reciting bird parrot (शुक). The काव्य लीलाशुकीयम् is based on the life history of विल्वमङ्गल. The saint poet विल्वमङ्गल was addicted to wine and prostitutes due to curses (शाप) and he returned to the main stream when he was purposefully insulted by his beloved , i.e. वाराङ्गना चिन्तामणि.

द्विजस्यापि ते वेश्यासक्तिर्नूनं भविता

सम्भाविता ते दुर्यशोसितो जीवनसविता।

कीर तिरागिता प्रबलतरा वैराग्यवतस्ते

विषयविषमकानने धावतः सुखं कुतस्ते।। (27)

In fact, after that he abandoned the world and became a saint, fully devoted to lord Krishna.

न खलु धावता किमपि वस्तु लभ्यते जन्तुना

सदा तिष्ठ चैकत्र पदे किं श्रम्यतेऽधुना।। (44)

प्रभुशक्तिरियं दुरत्यया भ्रमयन्ती पुरुषं निजेच्छया।

पदपद्ममुपेत्य निर्भयं ननु तस्यैव निरस्यते ध्रुवम्।। (46)

The third काव्य : काव्यप्रेरणापुरुषः आब्राहमलिङ्कनः is also a चरितकाव्य where the life history of John Abraham Lincon, the ex-president of USA is presented in a poetry form that too in traditional Sanskrit metre. Many Sanskrit poets have written poetry on Marxists. For example Padma Shastri has written a महाकाव्य on the famous Marxist Lenin, titled लेनिनचरितम्. Thus, Dr. Thakkur has written a long poetry on Abraham Lincon titled काव्यप्रेरणापुरुषः आब्राहमलिङ्कनः. The poet describes Abraham Lincon as a hero here as he calls him with the titles like वीर, वीरवर etc.

उषितवतः परदेशे पारेसिन्धु प्रसिद्धिमाप्तस्य।
वीरवरस्य कथैका लघ्वी बन्धो निशम्यतां तावत्।।

He has described the determination of a hero as he never goes back from his goal eventhough he walks alone in that way. Based on such thoughts the following verse has taken the form of a सुभाषित :

प्रबलो वातः प्रवहतु पर्वतखण्डाः पतन्तु वा मार्गे।
एकाकी प्रचलन्नपि वीरः पश्चात्पदं न वै कुरुते।।

I hope and believe that this anthology will be appreciated by lovers of contemporary creative writings. I wish many such works will flow from the pen of the poet in future also.

Banamali Biswal

(II)

पुस्तक - तथास्तु ; **लेखक** - हर्षदेव माधव; **सम्पादक** - नारायण दाश; प्रकाशक-पार्श्व पब्लिकेशन, अहमदाबाद, **पृष्ठ संख्या**-180; **संस्करण** - प्रथम; वर्ष 2012; **मूल्य** 150

हर्षदेव माधव अपनी कविताओं से पाठक-श्रोताओं को चौंकाते रहे हैं। हर्षदेव माधव कब क्या लिख कर हमें अचम्भित कर देंगे, यह कहना नितान्त कठिन है। हर बार वे नये रूप में अपनी कविता-वनिता को प्रस्तुत करते रहे हैं। यहां माघ की यह उक्ति अप्रासंगिक नहीं होगी-''क्षणे-क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः''। हर्षदेव माधव की कविता मानो इच्छाधारिणी है, जो कभी भी कोई भी रूप धारण कर लेती है। कभी कवि अलकनन्दे को हृदय के अन्तःस्थल से पुकारता है तो कभी उपनिषद्-ज्ञान की नवीन त्रिपथगा प्रवाहित कर देता है। कभी वह मृत्यु को इस तरह कविताबद्ध करता है कि वह जीवन्मुक्त पुरुष के महावाक्यों के समान प्रतीत होने लगती है, तो कभी वह अवकरिका dustbin जैसे सर्वथा अनछूए विषय पर भी साधिकार कविता रच देता है।

'तथास्तु' आधुनिक संस्कृत कविता के पर्याय हर्षदेव माधव का 22वां काव्यसंग्रह है। काव्यसंग्रह के आवरण-पृष्ठ पर उकेरे हुए चित्र को देखकर प्रथम दृष्ट्या ही ज्ञात हो जाता है कि माधव जी पुनः जो नवीन काव्य प्रस्तुत कर रहे हैं, वह हास्य से सम्बद्ध है क्योंकि यह चित्र 'लाफिंग बुद्धा' से प्रेरित लगता है, जिसमें मुखाकृति कवि हर्षदेव माधव की है। इसे आधुनिक हास्य-काव्यसंग्रह कहा जाना उचित है। यहाँ कहीं शुद्ध व्यंग्य की छटा है तो कहीं शुद्ध हास्य की। अब यदि काव्यसंग्रह आद्यन्त हास्य-व्यंग्य से परिपूर्ण हो तो फिर उसका मङ्गलाचरण उससे कैसे अनछूआ रह सकता है, अतः कवि मङ्गलाचरण की परम्परा का निर्वाह करते हुए खल को कुछ यूं नमन करते हैं-

लताप्रहाराय पादारविन्दं गालीप्रदानाय मुखारविन्दम्।

प्रयोजयन्तं च करारविन्दं मुष्टिप्रहाराय खलं नमामि।। (नमामि)

कवि ने पूर्व में 'अर्वाचीन-स्तोत्रावली' जैसे गम्भीर स्तोत्रकाव्य भी रचे हैं, किन्तु वे व्यंग्यात्मक स्तोत्रकाव्य की रचना में भी सिद्धहस्त हैं-

नागेन्द्रहाराय महाविषाय धृष्टाय दुष्टाय सदा खलाय।

वक्राय वाचा विषमेक्षणाय तस्मै नमो भद्र! नमः भाङ्गाय।। (भाङ्गस्तोत्रम्)

ऐसे काव्यों को समीक्षा के क्षेत्र में पैरोडी काव्यों की श्रेणी में रखा जाता है, जिन्हें परिवृत्ति काव्य भी कहा जाता है। ऐसी रचनाओं में कवि किसी अन्य कवि या काव्यों की शैली एवं भावनाओं का अनुकरण इस प्रकार करता है कि वे हास्यास्पद प्रतीत हो। यह अनुकरण भी दो प्रकार का हो सकता है - या तो मूलकवि या कवि की भावनाओं का परिहास करके उसे तुच्छ दिखाया जाए, जैसे कुछ शठ लेखकों ने तुलसीदास जी की 'रामचरितमानस' को 'गड-बड रामायण' के रूप में परिवृत्त कर दिया था, या फिर मूलकवि या कवि की भावनाओं को मात्र शिष्ट हास्य-व्यंग्य की अभिव्यक्ति के लिये परिवृत्त किया जाए। यहाँ हर्षदेव माधव ने पूर्व स्तोत्रकाव्यों की शैली का अनुकरण करके उन्हें शिष्ट हास्य-व्यंग्यात्मक बना दिया है, यथा- पत्नीकवचम्, विविधोपचारपूजा, भज आनन्दम्, भज सुराधिपतेरखिलं मधुरम् इत्यादि। 'चौर्यप्रशंसा' कविता में कवि ने काव्यचोरी को व्युत्पत्ति की संज्ञा दे दी है- *"काव्यचौर्यं ही ख्यातं हि व्युत्पत्तिरिति कथ्यते"*। यहाँ 'श्वश्रूकृतं वधूस्तोत्रम्' है किन्तु वधूओं को इससे निराश नहीं होना चाहिए, क्योंकि यहाँ 'पुत्रवधूकृतं श्वश्रूस्तोत्रम्' भी है।

इन कविताओं का हिन्दी अनुवाद डॉ. नारायण दाश द्वारा किया गया है। प्रस्तुत काव्यसंग्रह में 34 काव्यबन्ध हैं। अन्तिम काव्यबन्ध 'भाति ते भारतम्' है, जो पूर्व में पृथक् रूप से प्रकाशित हो चुका है तथा कवि रमाकान्त शुक्ल के 'भाति मे भारतम्' के प्रतिकाव्य के रूप में प्रसिद्ध है। यहाँ इस 104 श्लोकों में बद्ध काव्य को हिन्दी अनुवाद (अनुसर्जक-डॉ. नारायण दाश), ओडिआ अनुवाद (अनुसर्जक-डॉ. नारायण दाश) तथा आंग्ल अनुवाद (अनुसर्जक-डॉ. अरुणरंजन मिश्र) सहित प्रकाशित किया गया है।

कौशल तिवारी

Book Reviews

(III)

Book: तारा अरुन्धती; Original Gujarati: Dr. Usha Upadhyaya, Sanskrit Translation : Prof. Banamali Biswal; Published by : Rashtriya Sanskrit Sanstahan, New Delhi; Ist Edition : 2011, PP. Li (51) + 70 = 121; Price 110

The book being reviewed is titled as तारा अरुन्धती and it is published by : Rashtriya Sanskrit Sansthan, New Delhi, under its Popular Literature series (No. 33). It is a collection of translated poems in Sanskrit by Prof. Banamali Biswal. It has been translated by him from the English version of Gujarati Poems of Dr.Usha Upadhyaya.The book was translated into English by Rupalee Burke and being a non Gujrati Prof. Biswal has translated it from its English Translation and he has ofcourse gone through the Gujarati version : 'Arundhatino Taro' whenever he had a problem.

The star वशिष्ठ is the seventh star in the सप्तर्षि constellation. Owing to Arundhati' s austere penance and ऋषि वशिष्ठ,s insistence, Arundhati did get a place in the सप्तर्षि constellation. However, as a star it is smaller, fainter, and dimmer compared to the other seven stars. This was the reason for which the poetess as a woman herself was inspired to name her collection as तारा अरुन्धती. Dr. Usha clarifies in the introduction to the Gujrati version under a title 'A few lines about the star Arundhati' that from her childhood she has been questioning herself, how luminous the other stars of the सप्तर्षि are, then why is the star Arundhati small and dim. But she did not find any answer to her question. She says that some of the poems in this collection are a result of that search.Elements of nature and various events have another side to them behind the facade.

Dr. Usha Upadhyay is not only a great scholar but also a mature Gujarati poetess. Her poetic world ranges from feminism to love of nature and to a sort of revolt against social injustice. Translating Dr. Usha Upadhyaya's poems to Sanskrit, is no doubt a difficult task. But in spite of that Prof.Biswal seems to be successful in his effort.

Another poem that is in continuation of the foregone theme is 'Tale'. A woman's struggle to write, forms the subject of the poem. The poem कथा 'Tale' is about a blade of grass which has a tale to tell. Crushed under the rock, buried in the dark grave, all attempts are made to stifle its voice. But painstakingly it emerges from the darkness to tell its tale, only to be cursed by the 'tree gods' resplendent in sunlight. 'Woman, sky and wings, a poem in the same vein concludes rather resignedly. The poem निष्ठीवनपात्रम् 'Spittoon' is written in a brightly satirical tone and with seething anger mainly against patriarchy. The poem maps the trajectory of womankind from defication in the Purāṇic

age to commodification in the modern age. Let all inequalities be consumed by the burning lāvā spewing from the Earth's womb. The final prayer has connotations of woman as शक्ति in binary opposition to woman as देवी / दासी.

Poems like सूर्य: 'The Sun', धरावस्त्रम् 'Earth-robe', स्पन्द: 'Quiver', चतुर्थी चन्द्र: 'Chaturthi Moon', कपोतयुगलम् 'Two Pigeons', वर्षाचित्राणि 'Rain Pictures', पवन: 'wind' and वर्षा: 'rains' are exquisite Nature Poems with that peculiar sensitivity towards nature as having an existence of its own. One can find the spontaneous overflow of powerful feelings in प्रदोष: 'Twilight' with its extremely beautiful natural imagery.

It is in the cluster of poems like साम्प्रदायिक-संघर्षानन्तरम् 'After the Communal Flare', कज्जलम् 'Kohl', पादाः 'Feet' and most importantly उष्ट्र: 'Camel' are committed poems, both at the personal as well as social level. The poetess Dr. Usha makes it evident that she feels strongly about these issues and is deeply moved by them.

Some of the poems are charged with emotional truth. The agonized voice of these poems makes as lasting an impression as the others in the collection. प्रतिवेशित्रयम् 'Three Neighbours' can be illustrated in this context where it is pointed out that modern man has no time to admire even his new furniture, in that case what to say about discarded things. In this poem there is an animated dialogue exchanged among inanimate things.

Dr. Rupalee Burke feels that one can clearly see the resemblence of her poems with the Indo-Canadian poet Uma Parmeswaran's poems, particularly her mythological and cultural references, natural images interwoven with contemporary situations and life in an increasingly conflicting world.

In some other poems her poetic mind has tried to transcend the grossness of the elements of nature in order to capture her vast subtle beauty. In poems like 'साम्प्रदायिक-संघर्षानन्तरम्' she has raised her voice against social maladies.

Thus, I may conclude the review with the appropriate wordings of Dr. Binapani Mohanty in her foreword to the English version of the anthology under a title "Subtle Beauty" where she says : While going through these poems, a reader is bound to be transported into a rapturous poetic world where he may be face-to-face with the state beyond the state of things and beauty beyond beauty.

The credit also goes to the Sanskrit re-creation by Prof.Biswal who himself is a poet to keep the accuracy in his translation as he has the long experience of translation in all the genres like *śāstra, kāvya, kathā, upanyāsa* and *nāṭakas*.

Vinod Kumar Dixit

IV

कृतिः काश्मीरोदयम्; **कविः** सूर्यमणिरथः, **प्रकाशिका**- कवितारथः, मातामठलेन्, चूडङ्गसाहि, पुरी, **वर्षम्** 2013, **पृ.** 156; **मूल्यम्** रू. 200/

भारतभूस्वर्गभूतायाः काश्मीरभूमेरनन्याकर्षणेन को नाम रसिको मौनमाश्रयेत्। शब्दकल्पद्रुमे तस्य परीणाह एवमुक्तम् -

शारदामठमारभ्य कुङ्कुमाद्रितटान्तगः।

तावत् काश्मीरदेशः स्यात् पञ्चाशद्योजनात्मकः।।

66063-ग्रामयुक्तस्य काश्मीरमण्डलस्य परिमाणविषये अयं श्लोकः प्रसिद्धो वर्तते।

षष्टिग्रामसहस्राणि षष्टिग्रामशतानि च।

षष्टिग्रामास्त्रयो ग्रामा ह्येतत् काश्मीरमण्डलम्।।

महाभारते सूत्रितस्यास्य राजवंशस्य सविस्तरं वर्णनं राजतरङ्गिण्यां कृतं कल्हणेन। अर्वाचीनस्य श्रीहनुमत्प्रसादशास्त्रिणः काश्मीरेतिहासे अपि सैव परम्परा सुरक्षिता। परवर्तिकाव्यनाटकोपन्यासकथासु जेगीयते इयं भूमिः। समकालिकसाहित्ये राधावल्लत्रिपाठिरचितौ अन्यच्च, ताण्डवम् इत्युपन्यासावपि काश्मीरस्य इतिहासं विशदयतः। सद्यः पुरीस्थसंस्कृतकवीनां मध्यमणेः कवेः सूर्यमणेः रथस्य 172 श्लोकान्वितं मणिव्याख्यायुतं 156 पुटविस्तृतं काश्मीरोदयं काव्यं पुलकयति सहृदयान्। राजतरङ्गिणी-काश्मीरेतिहासाद्यैतिहासिकग्रन्थाधारेण काव्यमिदं रचितमिति कविवचनाज् ज्ञायते। 165 राज्ञां सूची, राजातरङ्गिण्या मुख्यांशः अपि अत्र कविः सन्दर्भरूपेण अयोजयत्। काव्यमिदं निशोदयः प्रातरुदयः इति भागद्वयेन विभक्तम्। प्रथमे निशोदये काश्मीरस्य अन्धकाराच्छन्न इतिहासः प्रकाशितः।

नहि कवेरितिवृत्तमात्रनिर्वहणेन किञ्चित् प्रयोजनम्, इतिहासादेव तत् सिद्धेः इति ध्वनिकारवचनप्रतीपं वदति काव्यकारः साहित्यवद् इतिहासोऽपि समाजस्य दर्पणः -

इतिहासोऽपि दर्पणः समाजस्य साहित्यवदिति सत्यम्।

सङ्गतिमसङ्गतिञ्च स पूर्वगतां प्रवदत्यविकलम्।।6।।

प्रकरणवक्रतां परिकल्प्य कविः नन्दनवने देवसभां कल्पयति, यत्र देवेन्द्रेण सह अन्ये देवाः, गन्धर्वाः, अप्सरसश्च समुपस्थिताः सन्ति। देवानां प्रश्नानामुत्तरप्रदानव्याजेन देवर्षिः नारदो भारतमहिमानं काश्मीरगरिमाणञ्च प्रकटीकरोति-

पूज्यप्रजापतिकृते धरणीविभागे रम्ये महाविपिननिर्झरमण्डिताङ्गे।

नित्यं पवित्रजलराशिविधौतपादो देशोऽस्ति भारतमिति श्रुतवेदनादः।।30।।

पूर्वापरौ जलनिधी स्पृशतः प्रभूतैर्नैसर्गिकैश्च विभवैर्लसतः समन्तात्।

विन्ध्याद्रिकल्पितमनोहरमेखलस्य यस्यास्ति मस्तकसमः सुमहान् हिमाद्रिः।।31।।

नित्योर्वरे नयनसौख्यकरे वितस्तातीरे तरुव्रततिपुञ्जनिकुञ्जरम्यः।

देशोऽयमुन्नततरः श्रुतिकीर्तितश्च संशोभते प्रकृतिवैभवपुष्टकायः।।34।।

कश्चित् प्रकाशनगतः कश-धातुरस्ति यस्मान्मुडागमपरः किल प्रत्ययोऽस्ति।

ईरन्निति प्रथित एव च पाणिनीयः कश्मीरनामकरणं कुरुते यथार्थम्।।35।।

37 तम-श्लोकात् कश्मीरनरपतीनामैतिह्यं ग्रथितं कविना-

एतादृशे परमपावनतीर्थभूते काश्मीरके नरपतिः प्रथमः स आसीत्।

गोनन्द इत्यभिधया विदितप्रतापः नित्यं प्रजासुखकरोऽनलसोऽरितापाः।।37।।

शचीनरस्य अनपत्यताहेतोः तस्य पितृव्यपुत्रः अशोकः राजा अभवत्। बौद्धधर्मदीक्षितः असौ म्लेच्छान् जित्वा शान्तिप्रतिष्ठां कृत्वा, राजकोषात् धनव्ययं कृत्वा 93 लक्षगृहयुतं श्रीनगरं निर्माय प्रजाभ्यः उत्ससर्ज-

श्रीपूर्वकं नगरमाढ्यमतीवरम्यं संस्थापितं सुकृतिनां प्रमुखेन तेन।

अद्यापि यल्लसति नाकसमानकान्ति-भास्कर्यसांस्कृतिकशिल्पकलाप्रशस्ति।।47।।

ततः कविना लघुना कनिष्क-तुञ्जीन-मातृगुप्त-प्रवरसेनादयो वर्णिताः। ततः साक्षात् 749 तमे ईस्वीये विराजितं संस्कृतप्रियं राजानं जयापीडं वर्णयति, यस्य सभायाम् उद्भट-भट्ट-दामोदरगुप्त-वामनभट्ट-चटक-शङ्ख-मनोरथादयः पण्डिता आसन्-

राज्ये प्रशस्तविभवे दनुजारिभाषा कोणानुकोणमनुवासरमेधिता स्यात्।

नैवास्तु चापि विदुषां छलना कदाचिद् इत्यादि यो दृढमतिः सचिवेष्वभाणीत्।।60।।

परस्मिन् नवमशतके महादानी सुशासकः अवन्तिवर्मा राजा बभूव।

काश्मीररम्य रमणीयवदनारविन्दम् उल्लास्य बालतपनोऽयमवन्तिवर्मा।

पश्चाद्घनं विततदुःखतमो विनाश्य प्रोद्दामकीर्त्तिकिरणैरुदियाय तूर्णम्।।65।।

आनन्दवर्धन इति ध्वनिकृत् प्रभावी रत्नाकरः कविवरो विविधानुभावी।

मुक्ताकणश्च कवितावनिताविलासी स्वामी शिवश्च शुशुभे तदधीनवासी।।70।।

तत्पुत्रः शङ्करवर्मा अस्थिरं सिंहासनं कथमपि मन्त्रिणां साहय्येन स्थिरं चकार। परन्तु तत्पत्नी सुगन्धा स्वैरिणी प्रभाकरेण सङ्गता। तदारभ्य काश्मीरभाग्यं पुनः अन्धकाराच्छन्नं जातम्। ततः निर्जितवर्म-दिद्दा-अनन्तदेव-कलश-हर्ष-उत्कर्ष-उच्चल-सह्लण-सुस्सल-भिक्षाचर-जयसिंह-कोटादेवीत्यादीनां सुरासाकीप्रणयिनां राज्ञां (883-1340) वर्णनं करोति कविः। एतेषु अनन्तदेवः किञ्चिदुत्तमं शशास। अन्तिमा हिन्दुराज्ञी आसीत् कोटादेवी। ततः 1818 यावत् 36 यवनराजानः

काश्मीर- राजपदे स्थिताः। तेषु परमतसहिष्णुः संस्कृतज्ञो राजा हसनखानः उत्तमं शशास। पश्चात् मोगलाधिपतेः वावरस्य सेनापतिः नाजुकशाहः काश्मीरमधिचकार। तदा तस्य उदारशासने हिन्दवः वेदप्रवर्तितमार्गेण अतिष्ठन्। ततः दौलतखान-यूसुफशाह-शेखफरीदादीन् वर्णयति कविः। अकवर-जाहाङ्गीरयोः काश्मीरप्रीतिः अनन्या आसीत्। अतः पण्डितानां कृते गृह-स्वर्ण-दक्षिणादिव्यवस्थां कारयित्वा तेषां विश्वासस्थानं गताः। यथोक्तं कविना-

काश्मीरभूर्यवनहस्तगताऽपवित्रा जातेति तां परिविहाय गतान् द्विजातीन्।
निर्वर्त्य मान्यकवरो द्विजबन्धुरेष तेभ्यश्चिराय च करग्रहणं न्यषेधत्।।125।।
आशीर्वचांस्यनुदिनं प्रददौ सहर्षं काश्मीरभूसुरगणः श्रुतिपारदृश्वा।
सम्मानदाय नरपाऽऽकवराय तस्मान्मानाप्तितो जगति को न शुभाननः स्यात्।।130।।
यावत् प्रशासनविधेरवधिर्न विद्धो दिल्ल्यामपांशुलितमोगलशासकानाम्।
भूषादिभूषिततनुस्तरुणीव तावत् काश्मीरभूः स्मितमुखी सुतरां दिदीपे।।136।।

प्रातरुदयः इति द्वितीयभागे 138-172 श्लोकेषु कविः काश्मीरस्य समृद्धिं वर्णयति। क्रमप्राप्तानां राज्ञां रणजीतसिंह-गुलावसिंह-रणवीरसिंह-प्रतापसिंह-हरिसिंह-कर्णसिंहानां वर्णनं कृत्वा कविः स्वाधीनोत्तरकाश्मीरस्य समृद्धिं योजयति। तदनु डालह्रद-पहलगाँ-अमरनाथ-गोलमार्ग-सोनमार्ग-कृषकाणां वर्णनं विधाय कविः आतङ्कवादिनां वर्वरतां प्रकाश्य कथमपि देशमस्तकमिव विराजितं काश्मीरं न दास्यते कस्मै अपि इत्युक्त्वा नारदमुखाद् वर्णनं श्रुत्वा द्रष्टुमागताः देवाः न प्रतिगताः अत्रैव पुनारमन्ते इति वर्णयन् श्लोकद्वयेन स्वकाव्यमाहात्म्यं प्रकटीकरोति।

काव्यस्वरूपम् - 'खण्डकाव्यं भवेत् काव्यस्यैकदेशानुसारि' इति लक्षणात् काव्यमिदमैतिहासिकं खण्डकाव्यं वर्तते। अत्र खण्डशः एव काश्मीरेतिहासो वर्णितः।

काव्यप्रयोजनम् - अत्र राष्ट्रभक्तिः एव प्रयोजनमिति कल्पयितुं शक्यते। उक्तमेव "राष्ट्रभक्त्यादीनि प्रयोजनानि पुनर्वयमप्यभिनन्दामः। तत्समर्थितमेव रेवाप्रसादद्विवेदैरपि युगावश्यकतापूर्तेः धर्मरक्षाराष्ट्रदेवप्रबोधादीनामपि काव्यप्रयोजनत्वमिति ..।" (काव्यालङ्कारकारिका, कारिका- 22-24)। कविकृता देशस्तुतिः यथा-

गान्ध्यादिनेतृजनवर्गमहोद्यमेन द्वीपाब्धिकाव्यरससूर्यमिते शताब्दे।
आङ्गलेयशासकशयादधिगत्य मुक्तिं देशोऽवनौ लसति भारतवर्षनामा।।154।।
यद्भारतस्य विदितं शुभमुत्तमाङ्गं नैसर्गिकेण विभवेन विमण्डितं यत्।
यत्केसरैरतितरां परिपूर्णमस्ति तद्भूतलं कथमनिन्द्यमिदं विहेयम्।।168।।

रसः- आधुनिकसमीक्षकाणां रहसविहारिद्विवेदादीनां मतेन अत्र देशभक्तिः रसः भवितुमर्हति, आहोस्वित् प्राचीनमतेन वीररसः अङ्गीरसः भवितुमर्हति, वीरपुरुषाणां गुणवर्णनात्। यथा-

तस्मान्नृपात् स रणजिद् विजिताद् बलेन कोहेनुराख्यममरैरपि दुर्लभञ्च।

जग्राह रत्नमतियत्नसुरक्षितं तन्मानप्रदं समितिलब्धजयस्वरूपम्।।139।।

अष्टादशे वयसि पण्डितकर्णसिंहस्तातैरघोषि नृपतिर्हरिसिंहपादैः।

अद्यापि संस्कृतमनाः सुरभाषिरक्तः सर्वत्र सद्गुणधरो बहुमानमेति।।152।।

मङ्गलाचरणम्- नीलाचलाधीशस्य त्रिकूटाधिश्वर्य्याश्च कृपापरम्परां स्मरन् कविः आशीर्वादात्मकं मङ्गलं वितनोति-

नीलाद्रौ शङ्खतीर्थे जलदरुचिजगन्नाथदेवो विराजन्

अन्यस्मिंश्च त्रिकूटे त्रिभुवनजननी वैष्णवी राजमाना।

अस्मिन्मत्काव्यबन्धे व्यपनयतु हतिं दुर्भरां दुर्निवारां

किं कार्यं वा महीयस्तनुजसुखमृते भाति पित्रोर्धरायाम्।।1।।

छन्दः -172 श्लोकेषु मङ्गलाचरणं स्रग्धराच्छन्दसा 2-8, 172 च श्लोकाः आर्याछन्दसा निबद्धाः। अन्ये च वसन्ततिलकच्छन्दसा लिखिताः सन्ति।

अलङ्कारः - काव्यसौन्दर्यं वर्धयितुं कविना स्वाभाविकतया अलङ्कारा योजिताः। श्लेषोपमोत्प्रेक्षाणां बाहुल्ये अपि कविः इतिहासमर्थान्तरन्यासैः समर्थयति। यथा-

अत्रत्यसेवफलनास्पतिकेशराणि चोत्पादितानि कृषकैर्बहुना श्रमेण।

देशान्तरेषु बहुमानपदं लभन्ते श्रद्धास्पदं भवति को न गुणैकधारी।।165।।

सुरपादपसौरभात् अप्सरसां गन्धः उत्कृष्टतरः इति व्यतिरेकालङ्कारेण तत्प्रतिपादितं कविना-

देवद्रुमोल्लसितसौरभमुत्तमं तद्भृङ्गास्तदा सरभसं प्रविहाय यत्र।

धावन्ति नाकवनिताश्वनोत्थगन्धाऽऽकृष्टन्तरा मधुरगुञ्जनसूक्तमोदाः।।15।।

पूर्णोपमया अवन्तिवर्मणो रणजितसिंहस्य च यशोवर्णनं यथा-

विद्यां विभिन्नसरणिं चतुरोपभोग्यां क्रूरात्मपाददलितामपमानितां सः।

वाराङ्गनामिव तदा करुणं लपन्तीं सम्मानयन् कुलवधूमिव संपुपोष।।68।।

युद्धे विजित्य रिपुमुद्धतमेष राजा जायाकृतेऽपरिमितां वसुधां सपत्नीम्।

मोदप्रदां बहुलकेसरवासिताङ्गीमङ्गीकृतामतनुसम्पदमानिनाय।।140।।

विरोधाभासेन शेखफरीदस्य प्रजाहितकरं कार्यमित्थं वर्णितम्-

राजा प्रजाहितकरः करनाशनेन कृत्वा धरां फलनतां जलसेचनेन।

चित्तं जहार च जनेषु गृहार्पणेन लुण्ठाकतस्करशठादिनिवारणेन।।128।।

प्रकृतिवर्णनम् - ऐतिहासिके पुनः भूस्वर्गकाश्मीरस्य वर्णने कविः प्राप्तं सुयोगमुपयोज्य डालह्रद-पहलगाँ-अमरनाथ-गोलमार्ग-सोनमार्गाणां वर्णनं करोत्येव।

डालह्रदो लसति पर्वतपाददेशे भूस्वर्गभूमिवलये स्वतनुं वितन्वन्।
देशान्तराधिगतपर्यटकैः परीते यत्रोडुपेषु पणनं क्रियते वणिग्भिः।।156।।
नौकागृहे ह्रदगतेऽतितरां मनोज्ञे नीलाभया विलुलिते रजनीषु यत्र।
बाला प्रियेण सह यौवनसौख्यराशिमास्वाद्य नैजजननं सफलीकरोति।।159।।
नैसर्गिकं च गिरिमूर्धनि राजमानं मुक्तिप्रदायकमपूर्वमतीवरम्यम्।
भक्ता जना अमरनाथतुषारलिङ्गं द्रष्टुं व्रजन्ति किल चन्दनवाटिकातः।।162।।
स्वच्छाम्बुनिर्झरजनादविमण्डिताङ्गश्चेतोहरः प्रकृतिसुन्दरसोनमार्गः।
आकाशचुम्बिसरलैस्तरुभिर्विराजन् वैदेशिकान् च परिकर्षति गोलमार्गः।।163।।
यथा कविरुत्प्रेक्षते काश्मीरनायकः प्रकृतिनायिकया आच्छादितः इति-
एतस्य पेलवतनूपरि शीतकाले सर्वत्र भूरिघनपादपराजितस्य।
प्रावारकं सुघटितं वहलैस्तुषारैराच्छाद्यते प्रकृतिनायिकया सरागम्।।164।

एवमत्र कविः सुललितकाव्यभाषया भारतललामभूतं काश्मीरं सरागमवर्णयदिति वक्तुं शक्यते।

नारायण दाशः

Our Contributors

1.	Govinda Chandra Rath	G.B.Pant Social Science Institute,Jhusi, Allahabad - 211019 (U.P)
2.	Kishor nath jha	Village-Bittho, Post-Sarisabpahi, District-Madhubani, Pin-847424 (Bihar)
3.	Rahas Vihari Dwivedi	615, Samadadiya, Green City, Madhotal, Jabalpur – 482002 (M.P.)
4.	Abhay Tiwari	Deptt. of Sanskrit, JNU New Delhi - 110067
5.	Arun Ranjan Mishra,	Deptt. of Sanskrit, Vishva Bharati, Shantiniketan, West Bengal - 731235
6.	Janardan Prasd Pandey	Rashtriya Sanskrit Sansthan, Ganganath Jha Campus, Azad Park, Allahabad-211002
7.	Vandana Shukla	Deptt. of Sanskrit, Kanpur Vidya Mandir f Mahaila P.G. College, Swarup Nagar, Kanpur(U.P)
8.	Jayanti Tripathy	CASS, University of Pune, Pune - 411007
9.	Vijayapal shastri	Rashtriya Sanskrit Samsthan, Garli Campus, Garli, Kangda, (H.P.)
10.	Satya Prakash Srivastva	347/4, Type-IV, Rajya Shiksha Sansthan Campus, Allenganj, Allahabad, (U.P.)
11.	Sima Singh	Shri Rainath Brahmadev, P.G. College, Salemnpur, Deoria, (U.P.)
12.	Khagendra Patra	Plot No. 698/766, At Balio, Near DFO Office, Post Balia, Dist- Balasore, Odisha
13.	Archana Tiwari,	Vill./Post-Korsam, Dist.-Fatehpur, Pin-212665 (U.P.)
14.	Nirupama Tripathi,	c/o Dr. Jayant Tripathi, 4-C/1, Bank Road, Allahabad
15.	Kishor Kumar Tripathy	Indira Gandhi National Centre for the Arts 1, C.V. Mess, Janpath, New Delhi-110001
16.	Triloknath jha	Rajkumari Ganes Sharma Sanskrit Vidyapeeth, Kolhanta, Patauri, Darbhanga, Bihar - 846003
17.	Jai Prakash Varma	7 G/1A C.Y. Chintamani Road, George Town, Allahabad

18.	Savitri Panda	194/B, Nilayam appartment, flat - C, Near Fire Briged, Bandroni. NSC Bode Road, Kolkatta-47
19.	Manjushree Tripathi	Reader in Sanskrit, BJB Junior College, B.J.B. Nagar, Bhabaneswar - 16, Odisha
20.	Reeta Tiwari	Dept. of Sanskrit, A.P.N.P.G.College, Basti. U.P.
21.	Gitanjali Pandey	Dept. of Sanskrit, Imamvada Girls P.G. College, Gorakhpur, U.P.
22.	Narayan Dash	Lecturer, Sanskrit, Ramkrishna Mission Residential College, Narendrapur, Kolkatta-103, West Bengal, India
23.	Surya Prakash Shukla	Dept. of Sanskrit, Govt. Degree College, Palia kala, Lakhimpur Khiri (U.P.)
24.	Anirvana Das	Dept. of Pali, University of PunePune - 411007
25.	Rajmangal Yadav	Sanskrit Dept. Delhi University, Delhi
26.	Amita sharma	2 B, Navyug Adarsh Apartment, F Block, Vikaspuri, New Delhi – 110 058
27.	Ram Narayan Dwivedi	Rajkumari Ganesh Sharma Sanskrit Vidyapeeth, Kolhanta, Patauri, Darbhanga, Bihar - 846003
28.	C.D. Pandey	Dept. of History, Allahabad University, Allahabad
29.	Jyoti	70/60, Aahamad Ganj, Nakash Kohana, Allahabad, 03
30.	Vinod Kumar Gupta	Sanskrit Rajakiya Degree college, Nai Tihri, Tihri Garhwal, Uttarakhand - 249001
31.	Subas Chandra Dash	Sanksirt Dept. Utkal Univerisity, vainevihar, Bhubaneswar, Odisha
32.	Vatsala	D/o S. B. Srivastava, C/25/1A-1, Ramkatora, Varanasi-221001
33.	Suchitra Mitra	Dept. of Sanskrit, Allahabad University, Allahabad
34.	Vijay Sanker Dwivedi	Dept. of Sanskrit, Delhi University, Delhi
35.	Aprajita Mishra	Rasktriya Sanskrit Sansthan, G.N. Jha Campus, Azad Park, Allahabad-211002

36.	Sharada Samant Roy	Sahitya Department Shri Jagannath Sanskrit University, Shrivihar, Puri, (Odisha)
37.	Om Prakash Shrivasta	12-B, P.C. Benerjee Marg, Allengunj, Allahabad,(U.P.)
38.	Vasant Kumar Bhatta	Director, Bhasha Sahitya Bhawan, Gujrat Universtiy, Ahmedabad 380009
39.	Rabi Shrivastav	12-B, P.C. Banerjee Marg, Allengunj, Allahabad, (U.P.)
40.	Sadanand Jha	Kameshwar Singh Darbhanga Sanskrit Univeristity, Darbhanga, (Bihar)
41.	Banamali Biswal,	57, Vasant Vihar, Jhusi, Allahabad-211019
42.	Ram Salahi Dvivedi	Shri Lal Bahadur Rashtriya Sanskrit Vidyapeeth, Katwaria Sarai, New Delhi - 110016
43.	Vinod Kumar Dikshit	71/2 Nehru Nagar, New Colony (before Shiva Temple) Deoria, (U.P.)
44.	Kaushal Tiwari,	S/o Shri Badrilal Sharma, Mala Devi, Mohalla-Shahbad, Ward, Post/Dist.-Baran, Rajasthan
45.	Narayan Dash	Ramakrishna Mission Residencial College, Narendrapur, Calcutta - 700103
46.	Jagannatha Pathak,	3/14, M.I.G., Jhusi, Allahabad-211019

गैर्वाणी-गौरव-ग्रन्थमाला - 32
गैर्वाणवाणी-गौरवभूत-प्रत्न-नूतन-लघु-ग्रन्थानां सङ्कलनम्
गङ्गानाथ-झा-परिसर-शोधपत्रिकायाः परिशिष्टम्

मोहन-कृता

रसानन्द-तरङ्गिणी

सम्पादकः

जगन्नाथ पाठकः

राष्ट्रिय-संस्कृत-संस्थानम्
गङ्गानाथझापरिसरः
चन्द्रशेखर-आजादोद्यानम्
प्रयागः-211002
2013

ISSN : 0377-0575

पुस्तकम् : मोहन-कृता रसानन्द-तरङ्गिणी

प्रकाशकः : राष्ट्रिय-संस्कृत-संस्थानम्
गङ्गानाथझापरिसरः
चन्द्रशेखर-आजादोद्यानम्,
प्रयागः - 211002

सम्पादकः : जगन्नाथ पाठकः

वर्षम् : 2013 ई.

मुद्रकः : एकाडेमी प्रेस
दारागंज, इलाहाबाद - 211006

ISSN 0377-0575

Published under *Gairvāṇavāṇi-Gaurava-Granthamālā*
Series-32

RasānandaTaraṅgiṇī

of Mohana

Edited by
Jagannath Pathak

Rashtriya Sanskrit Sansthan
Ganganath Jha Campus
Chandrashekhar Azad Park
Allahaad - 211002
2013

ISSN : 0377-0575

Book : RasānandaTaraṅgiṇī of Mohana

Edited by : Jagannath pathak

Published by : Rashtriya Sanskrit Sansthan
Ganganath Jha Campus
Chandrashekhar Azad Park
Allahaad - 211002

First Edition : 2013

Printed at : Academy Press
Daraganj, Allahabad - 211006

Preface

It is a small anthology (शतककाव्य) containing 110 verses titled रसानन्दतरङ्गिणी, authored by Mohan (17th century AD) and edited by Dr. Jagannath Pathak, one of the eminent poets of the present time. The present edition has been prepared with the help of a single manuscript procured from Allahabad Museum (vide its accession No. 337/127). For more details of this manuscript one may refer to the Editor's note under a title 'पृष्ठभूमि'. We do not know much about the present author Mohan. At least two authors are available having the same name 'Mohan'. One is Mohana Upadhyaya (18th century AD) and the other is Mohan Ojha (17th century AD). According to the editor, Dr. Pathak, Mohan Ojha is the author of the work : रसानन्दतरङ्गिणी. The ending colophon of the manuscript contains the following verse about the author Mohana.

जनितो देवसेनायामनिरुद्धेन सूरिणा। मोहनः कृतवानेतां रसानन्दतरङ्गिणीम् ।।

It is believed that Mohan Ojha has written a work on the theory of *Rasa*. However, the editor Dr. Pathak feels that the same may not be other than the present work रसानन्दतरङ्गिणी. One can find the name of this Mohan in many later *Subhāṣita*-works.

The author was most probably a Vaiṣṇava as he has eulogised श्रीकृष्ण in his मङ्गलाचरण :

कमलाचिबुकोन्नायी कृष्णस्य करः करोतु कल्याणम् ।
मुकुरमिव नीलवृन्तं भाति नितान्तं तदाननं येन।।1।।

In addition to that, in many verses he has depicted the love sport of श्रीकृष्ण and गोपी-s. The modesty of the poet is expressed in the second verse where he calls himself a 'सुबालिश' i.e. अज्ञ. The term 'रस' used here in the title of the book also denotes 'शृङ्गार', because to entertain the readers no other 'रस' than the 'शृङ्गार' might have been intended here by the poet. The poet has defined the form and nature of the poems to clarify his stand in this regard:

मृदुभिः प्रसन्नवर्णैः कुसुमैरिव या पदैः सुसङ्ग्रथिता।।
स्रगिव कविता सुवृत्ता सा हृदि शृङ्गारमावहति।।34।।

Here the poet has compared the poetry with a garland which is composed with the flower-like soft and amicable words in appropriate metre and it is full of themes depicted in non other than the kingly 'रस', i.e. 'शृङ्गार'.

The poet has also depicted the natural love of the lord Krishna with the Gopis. Sometimes the poet sketches such real picture through his poetic talent that the reader feels that as if the event is going on before him. For example, he depicts the beauty of a bathing lady in the following verse :

न्यञ्चद्धारं चिकुरनिकरं बिभ्रती पाणिगर्भे

गात्रश्लिष्टस्तिमितवसनस्पष्टसर्वाङ्गशोभा।

स्नानोत्तीर्णा कमलवदना तिर्यगावर्तितास्या

नो वा कस्यासमशरसमाक्रान्तमन्तश्चकार।।9।।

The lotus-faced lady has just come out of the bathing pool immediately after taking bath and the wet and also short cloth is clinging to her body and as a result, the parts of her youthful body are quite visible. She is holding her wet hair in her hands from which the water-drops are falling constantly when she has curved her face a little zigzag as if to hide her identification.

Similarly, the poet describes the teenage of a girl in a very appropriate poetic style through a famous figure of speech called रूपक as he compares her position with evening or सन्ध्या :

तिरोभूतोऽमुष्या वपुषि शिशुताशीतकिरणो

न च प्रादुर्भावं प्रकटयति तारुण्यतरणिः।

तदेषा कल्याणी गुणविधिविदां नागरहृदा-

मुपास्या सन्ध्येव स्फुरति रमणीयाकृतिमती।।11।।

Here the poet says that the child-like moon has already set in the body of the teenaged girl and the young sun is just about to rise there. Thus, she resembles सन्ध्या where the day is about to pass away and the night is just about to approach.

In another verse, the poet describes a lady approaching her lover in night (i.e. an अभिसारिका) who is preparing herself for her union (अभिसरण). When the she-friends of the नायिका look her in such a position they are tempted to ask her out of curacity : you are wearing a blue blouse and putting callyrium in your eyes, leaving out tinkling of anklet, the waist band is not pleasing you and you are preferring कस्तूरी than the sandal paste. Then O मुग्धे ! tell us on whom the love deity having flower bow (i.e. cupid), is pleased with :

नीलञ्चोलमुरीकरोषि कुरुषे नेत्रेऽञ्जनारञ्जनं

मञ्जीरं मुखरं जहासि रसनाबन्धे न धत्से मुदम् ।

पाटीरं परिहृत्य लिम्पसितरां कस्तूरिकाभिस्तनुं

तन्मुग्धे ! तरुणस्य कस्य कथय प्रीतः प्रसूनायुधः।।42।।

The poet seems to be a master of *kāmaśāstra* also as he shows his mastery over this *śāstra* through several verses. In the following verse he depicts the act of embracing which has got a prominent place in the *kāmaśāstra* :

विधाय मृदुबन्धनं भुजयुगेन कण्ठस्थले

निपीड्य निबिडं हृदा कुचयुगुं कुरङ्गीदृशः।

धयन् मुकुलितेक्षणोऽधरदले सुधामाधुरीं

हिमागमविभावरीं नयति कोऽपि धन्यो युवा।।25।।

In another verse the *puruṣāyita-rati* is described where the poet imagines that it is not the case that the flowers are falling from the braids of the young lady engaged in *puruṣāyita-rati*, but it is the densed darkness which is laughing after winning over the face-moon :

सुदृशः पुरुषायिते विकीर्णे कचभारे कुसुमानि यत्स्फुरन्ति।

तदवैमि विजित्य वक्त्रचन्द्रं हसति स्फीतमना घनान्धकारः।।27।।

puruṣāyita-rati is also described in the verse No. 29 when the poet describes the dialogue between a lover and a beloved engaged in the posture of *puruṣāyita-rati* :

किं क्लान्तासि परोपहासिनि कुतो भूयः श्वसिष्युल्बणं

किं बध्नासि न नीविकामिति मया मन्दस्मितं जल्पिते।

मा किञ्चिद् वद वीतलज्ज परतो याहीति कोपादिव

प्रत्युक्तं पुरुषायितान्तसमये तन्व्या न विस्मर्यते।।29।।

In addition to that, the poet describes embracing, kissing and nail-marks etc. altogether in a single verse where he says that the lovers are not tired of doing all such love activities though the deity of five arrows himself seems to be tired :

अन्योन्यं दशनच्छदेषु दशतोरन्योन्यमाश्लिष्यतो-

रन्योन्यं नखरैः खरैर्विलखतोरन्योन्यमाचुम्बतोः।

औत्सुक्येन नवं नवं निधुवनप्रागल्भ्यमभ्यस्यतोः

श्रान्ते पञ्चशरेऽपि न प्रणयिनोः प्राप्तोऽपकर्षो रसः।।28।

In anotehr verse the poet reads the mind of a beloved waiting the early visit of her lover and he keeps records of her behavioural changes as the lover's visit delays for reasons not known :

भूयो बहिर्भवति मन्दिरमेति भूयो/भूयो विलोकयति वर्त्म गवाक्षलग्ना।

आगन्तुके बत विलम्बिनि जीवितेशे/बाला पलार्द्धमपि कल्पशतान्यवैति।।38।।

In verse No. 32 the poet sketches a real picture of a very unmatured young lady (bālā) coming out of the love-room with a fear as her decorations are disturbed, the shining of her face is faded, her eyes are redened as she was awakened the whole night till the morning :

व्यस्तालङ्कृतिराकुलालसगतिर्म्लानाननेन्दुद्युतिः/पर्यस्ताखिलकुन्तलस्थितिरनुत्साहावसन्नाकृतिः।

प्रातर्ज्जागरणारुणेन नयनेनालोकयन्ती दिशः/साशङ्कं बहिरेति विह्वलतनुर्बाला विलासालयात्।32

Some fine examples of *yamaka-alaṅkāra* can also be recorded in this anthology where the words are repeated to denote different meanings :

कूले कूले तपनदुहितुः पादपानाञ्च मूले/पुञ्जे पुञ्जे कुहरतमसां वेतसानां निकुञ्जे

भ्रामं भ्रामञ्चपलनयनान्वेषयन्ती भवन्तं / धीरं धीरं कितव ! भवता विप्रलब्धा रुरोद।।46।।

मग्ना मग्ना विरहजलधौ देहलीस्तम्भलग्ना/दृष्ट्वा दृष्ट्वा सुभग!भवतो वर्त्म यावद् दिनान्तम्।

भिन्ना भिन्ना मनसिजशरैस्त्रप!त्वत्कृते सा/खिन्ना खिन्ना गमयति मृगीलोचना वासराणि।।74।।

Moreover, in the following verse, the *gopikās* ask Krishna that how could he learn this art of discieving the innocent young ladiies eventhough he is brought up in such simple surroundings :

गृहे गोपालानां सरलमनसां जन्म भवतो / गवां मध्ये वासस्तदनु शिशवोऽमी सहचराः।

विदग्धा मुग्धाक्षीः कपटवचसा वञ्चयसि यत्/त्वयाऽधीतं वंशीवदन! वद कुत्रेति चरितम्।49।

One can find many such poems in this beautiful garland of verses titled as 'रसानन्दतरङ्गिणी' which help the readers in taking a pleasurable deep in the river of the best sentiment शृङ्गार.

According to the editor Dr. Pathak, this piece of poetry by Mohan reminds the poetic style of the great poet पण्डितराज जगन्नाथ with a slight variation as one can find the tendency of self exposition in former's case whereas one cannot find such tendency in the present poet.

Hope, the publication of this anthology (रसानन्दतरङ्गिणी) will enrich the long tradition of the genre of hundred verses (*śatakakāvya -paramparā*) of Sanskrit literature. Before I stop, I must thank Dr. Jagannath Pathakji for editing the present anthology रसानन्दतरङ्गिणी and for providing the same for publication by the campus.

Banamali Biswal

पृष्ठभूमि

पाण्डुलिपि-परिचय – मोहन द्वारा विरचित रसानन्दतरङ्गिणी संस्कृत का एक मनोरम लघुकाव्य है। संयोग से इस की एक मात्र पाण्डुलिपि मुझे इलाहाबाद संग्रहालय से उपलब्ध हुई। पाण्डुलिपि का परिचय इस प्रकार है -

1. पुस्तक सं. 337/127
2. पत्रों की संख्या : 10
3. पत्रों का परिमाप : 23.5 x 10
4. पाण्डुलिपि पूर्ण किन्तु कुछ क्षतिग्रस्त
5. प्रत्येक पृ. में 10 पंक्तियाँ और प्रत्येक पंक्ति में लगभग 34 अक्षर है
6. पाण्डुलिपि के अन्त में रचनाकार मोहन का परिचय इस श्लोक से दिया गया है-

'जनितो देवसेनायामनिरुद्धेन सूरिणा। मोहनः कृतवानेतां रसानन्दतरङ्गिणीम् ।।'

इसमें सम्पूर्ण पद्यों की संख्या 110 है। पाण्डुलिपि के लिपिकार ने लिपिकरण का काल-निर्देश नहीं किया है।

मोहन नाम के दो रचनाकारों के सम्बन्ध में सूचना मिलती है- मोहन उपाध्याय और मोहन ओझा। रसानन्दतरङ्गिणी का रचनाकार मोहन उपाध्याय नहीं हो सकता, क्योंकि मोहन उपाध्याय के पिता रघुदेव मिश्र और माता रम्भा देवी थी। मोहन उपाध्याय मिथिला के सरिसब ग्राम के निवासी तथा सचल मिश्र के अनुज थे। इनका समय 18वीं शती माना गया है।

दूसरा मोहन या मोहन ओझा यथासम्भव रसानन्दतरङ्गिणी (र.त.) का रचयिता है, जो 17वीं शती के मध्य अथवा उसके पूर्व का कहा जा सकता है। उसे रस-शास्त्र पर किसी ग्रन्थ का रचयिता भी समझा गया है। वस्तुतः रसशास्त्र का अन्य कोई ग्रन्थ न होकर वह प्रस्तुत र.त. ही होना चाहिए। मोहन के नाम से कुछ पद्य परवर्ती सुभाषितसंग्रहों में भी मिलते हैं। र.त. के रचनाकार मोहन के सम्बन्ध में यहाँ इतना ही कहा जा सकता है।

रसानन्दतरङ्गिणी : एक अन्तरङ्ग परिचय – कवि मोहन ने मङ्गलाचरण में श्रीकृष्ण के प्रति अपनी श्रद्धा व्यक्त की है। इस कारण उनका वैष्णव होना सिद्ध होता है। साथ ही इस रचना के कई पद्यों में गोपियों तथा श्रीकृष्ण के परस्पर प्रणय को अपने कवित्व का विषय बनाया गया है। इससे भी उनका वैष्णव होना सिद्ध होता है। मोहन स्वभावतः विनम्र प्रतीत होते हैं, क्योंकि दूसरे ही पद्य में अपनी रचना पर विचार करने के लिए अनुरोध करते हुए उन्होंने अपने को 'सुबालिश' (अज्ञ) कहा है। 'रसानन्दतरङ्गिणी' में प्रयुक्त 'रस' शब्द 'शृङ्गार' मात्र का बोधक है, क्योंकि प्रस्तुत रचना में शृङ्गार के अतिरिक्त किसी रस द्वारा सहृदय-समाज को आनन्दित करना कवि का लक्ष्य नहीं है।अतः कवि ने कविता के स्वरूप के सम्बन्ध में अपना

विचार प्रकट करते हुए अपने इस लक्ष्य या उद्देश्य को भी इन शब्दों में व्यक्त किया है।

मृदुभिः प्रसन्नवर्णैः कुसुमैरिव या पदैः सुसङ्ग्रथिता।।
स्रगिव कविता सुवृत्ता सा हृदि शृङ्गारमावहति।।34।।

वस्तुतः, मृदु, प्रसन्न वर्णों वाले, फूलों जैसे पद से ग्रथित माला की भाँति सुन्दर वृत्तों वाली कविता यदि सहृदय-जनों के हृदय को शृङ्गार के भाव से भर देती है तो वह कविता की एक बड़ी सार्थकता है, साथ ही, वह शृङ्गार यदि गोपियों तथा श्रीकृष्ण की सहज प्रणय-लीलाओं से जुड़ जाता है तो वह कितना भी भौतिक तथा श्लथ प्रतीत होता हो, उस पर उदात्तता की मुहर तो लग ही जाती है। ऐसे अनेक मधुर पद्य रसानन्दतरङ्गिणी के पाठकों को उपलब्ध होंगे। कहीं-कहीं तो कवि ऐसे चित्रमय दृश्य उपस्थित करता है कि उस स्थिति की कल्पना जैसे आँखों के सामने साकार हो जाती है। जैसे, सद्यःस्नाता नायिका के वर्णन का यह पद्य है-

न्यञ्चद्धारं चिकुरनिकरं बिभ्रती पाणिगर्भे
गात्रश्लिष्टस्तिमितवसनस्पष्टसर्वाङ्गशोभा।
स्नानोत्तीर्णा कमलवदना तिर्यगावर्तितास्या
नो वा कस्यासमशरसमाक्रान्तमन्तश्चकार।।9।।

सुमुखी नायिका स्नान करके बाहर निकली हुई है, उसने जूड़े को अपने हाथ में ले रखा है, जूड़े से पानी की धार टपक रही है, उसके थोड़े से भीगे कपड़े उसके अंगों से चिपक गये हैं, फलतः उसके सभी अंगों की शोभा प्रकट हो रही है, उसने अपने मुखड़े को कुछ तिरछे घुमा दिया है।

इसी प्रकार वयःसन्धि के वर्णन में सन्ध्या की प्राकृतिक छटा से, रूपक के सहारे कवि ने कितनी अद्भुत स्थिति उत्पन्न की है-

तिरोभूतोऽमुष्या वपुषि शिशुताशीतकिरणो
न च प्रादुर्भावं प्रकटयति तारुण्यतरणिः।
तदेषा कल्याणी गुणविधिविदां नागरहृदा-
मुपास्या सन्ध्येव स्फुरति रमणीयाकृतिमती।।11।।

शैशव का चन्द्रमा नायिका के शरीर में डूब चुका है और तारुण्य का सूर्य अभी अपना प्रादुर्भाव प्रकट नहीं कर रहा है, इस प्रकार रमणीय आकृतिवाली नायिका सन्ध्या की भाँति लग रही है।

नायिका अभिसारिका है। वह अभिसरण के लिए तैयारी कर रही है, सखी उसे देखकर इन शब्दों में जिज्ञासा कर रही है- तू नीली चोली पहन रही है, नेत्रों में आंजन लगा रही है,

मुखर नूपुर को छोड़ रही है, रसना-बन्ध भी तुझे अच्छा नहीं लग रहा है, चन्दन को छोड़ शरीर पर कस्तूरी का लेप लगा रही है, तो री मुग्धे ! बता किस तरुण पर फूलों के बाण वाला देवता 'काम' प्रसन्न है ?

ऐसे ही अनेक कवित्वमय पद्यों की माला है यह रसानन्दतरङ्गिणी, जिसे आकलित करने वाले का मन शृङ्गार-रस के आनन्द की तरङ्गिणी (नदी) में गोते लगायेगा, इसमें सन्देह नहीं।

कवि मोहन ने अपनी वाग्भङ्गियों में संस्कृत के अनेक प्रसिद्ध छन्दों की योजना की है। प्रायः इनकी यह शृङ्गारमयी रचना पण्डितराज की वाग्भङ्गियों को स्मृतिपथ पर बरबस लाने वाली प्रतीत होती है। भेद केवल इतना ही है कि जहाँ पण्डितराज की कविता में उनका 'स्व' भी झलक जाता है वहाँ मोहन की कविता में कवि की कोई निजता लक्षित नहीं होती।

हमारा विश्वास है कि इस कवि को भी सहृदय-समाज स्वागतार्ह समझेगा।

जगन्नाथ पाठक

मोहन-कृता
रसानन्द-तरङ्गिणी

कमलाचिबुकोन्नायी कृष्णस्य करः करोतु कल्याणम् ।
मुकुरमिव नीलवृन्तं भाति नितान्तं तदाननं येन।।1।।

सुबालिशेनापि गुरुप्रसादान्मया किमप्यालपि मोहनेन।
कृपालवस्तत्कवयः कदापि कुतूहलेनापि विचारयन्तु।।2।।

मृदुभिः प्रसन्नवर्णैः कुसुमैरिव या पदैः सुसङ्ग्रथिता।
स्रगिव कविता सुवृत्ता सा हृदि शृङ्गारमावहति।।3।।

नेत्रे खञ्जनगञ्जने तव सुधाधारानुकारा गिरः।
पाणिः पद्मसहोदरः कचरुचिः शैवालजालोपमा।
वक्त्रं कार्तिककृत्तिकापतिसमं हारिद्रहृद्या तनु-
स्त्वं यस्मै वलसे विलासिनि हृदा तेनैव तप्तं तपः।।4।।

तनुः सुवर्णादपि चारुवर्णा धम्मिल्लभारस्तुलितान्धकारः।
अपास्तभृङ्गस्तव दृक्तरङ्गः कल्याणि ! कस्यासि परा तपस्या।।5।।

तव तन्वि तनुस्तन्वी गुरू पीनौ पयोधरौ।
नूनं कस्यापि कृतिनः सुकृतैरवलम्ब्यसे।।6।।

तूणीशयं स्पृशति नैव शरं करेण
धत्ते मनागपि न वा धनुरादरेण।
कामः कलावति ! जगन्ति विजेतुकामः
कल्याणि ! किन्तु तव कामयतेऽङ्गकानि।।7।।

प्राप्तं फलं प्रियसखे ! जनुषो मदक्ष्णा
साक्षादसौ सुवदना यदिह व्यलोकि।
एकैव हन्त रसना मम किं ब्रवीमि
सीमेयमेव रमणी रमणीयतायाः।।8।।

न्यञ्चद्धारं चिकुरनिकरं बिभ्रती पाणिगर्भे
गात्रश्लिष्टस्तिमितवसनस्पष्टसर्वाङ्गशोभा।
स्नानोत्तीर्णा कमलवदना तिर्यगावर्जितास्या
नो वा कस्यासमशरसमाक्रान्तमन्तश्चकार।।9।।

नेयं विरज्यति रजः पटलीविलासे
नो वाऽनुरज्यति मनोजकलाकथासु।
वक्षो विलक्षणमिव स्वमुदीक्ष्य किञ्च
न्यञ्चन्मुखी तिरयतीव दृगञ्चलेन।।10।।

तिरोभूतोऽमुष्या वपुषि शिशुताशीतकिरणो
न च प्रादुर्भावं प्रकटयति तारुण्यतरणिः।
तदेषा कल्याणी गुणविधिविदां नागरहृदा-
मुपास्या सन्ध्येव स्फुरति रमणीयाकृतिमती।।11।।

श्रूयते सखि ! कदा न कानने माधवे सुमधुरः पिकस्वरः।
साम्प्रतं पुनरसाम्प्रतं कुतो मामकं बत मनो दुनोति सः।।12।।

रोमावलीशृङ्खलया निबद्धौ कामेन मन्ये कुचचक्रवाकौ।
अतो मुखेन्दोरुदयेऽपि तस्या न जायते जातु तयोर्वियोगः।।13।।

त्रिवलिसरितां मध्येऽमुष्या विधित्सति नूतनो
मनसिजमहीपालः सेतुं तदस्य निदेशतः।

अभिनववयः शिल्पी रोमावलीविधिकैतवात्
किमिह सरलं सूत्रं धत्ते मषीमलिनीकृतम् ।।14।।

परितः पिशुनानपश्यतो मे लघु पार्श्वं व्रजतो निवारणाय।
नयनाञ्चलचञ्चरीकयुग्मं चतुरा किञ्चन चञ्चलीचकार।।15।।

पुरो मयि समागते सहचरीसमाजस्थिता
ह्रिया किमपि न प्रिया कृतवती वचः सम्भ्रमम् ।
परन्तु निभृतोल्लसत्स्मितसुधावदातत्विषा
तुषारकरकौमुदी मुदमदत्त मन्नेत्रयोः।।16।।

ऋजुनयननिपातः कामतन्त्रातिपात-
स्तनुरपि बत लक्ष्यः कस्य न स्यात् कटाक्षः।
इति नमितमुखेन्दुः पश्यति प्राणनाथं
जनसदसि विदग्धा पक्ष्मणामन्तरेण।।17।।

अपि शारदचन्द्रिका यदीयां तुलनां गच्छति दुष्करैस्तपोभिः।
न तदुज्झति मानसं मदीयं हसितं खञ्जनमञ्जुलोचनायाः।।18।।

सकपटवचनेन वञ्चितोऽसौ कमलदलाक्षि ! बहूनि वासराणि।
कुरु सकृपमतः परं मनस्त्वं फलतु मनोरथपादपो मुरारेः।।19।।

अभितः सरोजवदने विलोकितं
हसितं सभङ्गि भणितञ्च यत्त्वया।
परितोषमेष्यति कथं स तावता
स्मरकेलिकौशलविशेषलालसः।।20।।

मयि प्रणयपेशले हरति कौतुकात् कञ्चुकं
कुचौ सपदि सङ्कुचत्तनुतया तया संवृतौ।
अथ स्पृशति सस्पृहं मदनजीविकां नीविका-
मकारिषत सुभ्रुवा कतिविधा न काकूक्तयः।।21।।

धम्मिल्लमेकेन करेण धृत्वा
परेण वक्त्राम्बुजमुन्नमय्य।
स्मितामृतस्यन्दि निमीलिताक्ष्या
धन्योऽधरान्तं धयति प्रियायाः।।22।।

दरमीलितलोचनाभिरामं मुखमीषत्स्मितधूसराधरान्तम्।
अवलम्ब कपोलयोः कराभ्यां सुकृती चुम्बति चूङ्कृतैः प्रियायाः।।23।।

मधुराधरपल्लवं धयन्तः कलयन्तः परिरम्भणानि धन्याः।
शयिता निशि दुग्धफेनकल्पे नवतल्पे दयितां विनोदयन्ति।।24।।

विधाय मृदुबन्धनं भुजयुगेन कण्ठस्थले
निपीड्य निबिडं हृदा कुचयुगं कुरङ्गीदृशः।
धयन् मुकुलितेक्षणोऽधरदले सुधामाधुरी
हिमागमविभावरी नयति कोऽपि धन्यो युवा।।25।।

मातर्यामिनि सुस्थिरा भव सखे काम त्वमप्यात्मनः
प्राखर्यं प्रकटीकुरुष्व समयो यात्येष नो दुर्ल्लभः।
दैवादद्य रसातिरेकतरला मन्दाक्षमन्दादरा
बाला पञ्चशरप्रपञ्चरचनाचातुर्यमभ्यस्यति।।26।।

सुदृशः पुरुषायिते विकीर्णे कचभारे कुसुमानि यत्स्फुरन्ति।
तदवैमि विजित्य वक्त्रचन्द्रं हसति स्फीतमना घनान्धकारः।।27।।

अन्योन्यं दशनच्छदेषु दशतोरन्योन्यमाश्लिष्यतो-
रन्योन्यं नखरैः खरैर्विलखतोरन्योन्यमाचुम्बतोः।
औत्सुक्येन नवं नवं निधुवनप्रागल्भ्यमभ्यस्यतोः
श्रान्ते पञ्चशरेऽपि न प्रणयिनोः प्राप्तोऽपकर्षोः रसः।।28।

किं क्लान्तासि परोपहासिनि कुतो भूयः श्वसिष्युल्बणं
किं बध्नासि न नीविकामिति मया मन्दस्मितं जल्पिते।
मा किञ्चिद् वद वीतलज्ज परतो याहीति कोपादिव
प्रत्युक्तं पुरुषायितान्तसमये तन्व्या न विस्मर्यते।।29।।

अवक्रिमभ्रूयुगमक्रमा गिरो
विसष्ठुलं चेलमसौष्ठवं वपुः।
नतभ्रू नेत्रे गतविभ्रमे च ते
तपस्यया कस्य विजृम्भितं भवेत् ।।30।।

चाञ्चल्यं न तवास्ति लोचनयुगे लुप्तो गिरां चण्डिमा
नीरागौ रदनच्छदौ विलुलिता चित्रा च पत्रावलिः।
कस्यैतत् तरुणस्य हन्त तपसा साफल्यमासादितं
येनैषा गजगञ्जितेव नलिनी तन्वि त्वमुत्ताम्यसि।।31।।

व्यस्तालङ्कृतिराकुलालसगतिर्म्लानाननेन्दुद्युतिः
पर्यस्ताखिलकुन्तलस्थितिरनुत्साहावसन्नाकृतिः।
प्रातर्ज्जागरणारुणेन नयनेनालोकयन्ती दिशः
साशङ्कं बहिरेति विह्वलतनुर्बाला विलासालयात् ।।32।।

किमुपालभसे सुलोचने ! मां
न यदद्यैव हरिस्तवोपनीतः।
सहसा कथमालि ! दर्शनीयः
समुपानीय सुधाकरः करेण।।33।।

कलय कुसुमैस्तल्पं सद्म स्वयं सखि धूपय
स्रजमपि सृज श्लक्ष्णां बाले! दुकूलमुरीकुरु।
वरतनु ! तनूवल्लीमेनां विभूषय भूषणै-
रतिथिरचिरादागन्ता ते गृहे गरुडध्वजः।।34।।

विहितां विहितां विलुप्य भूयो रचयन्ती रुचिरां तनौ विभूषाम् ।
न तुतोष हृदा सरोरुहाक्षी हृदयेशस्य विदग्धतां स्मरन्ती।।36।।

अन्तर्ध्यायसि सस्मिता च भवसि प्रीणासि भूषाविधो
सोत्कण्ठं नवकञ्जमञ्जुनयने ! कुञ्जं मुहुः पश्यसि।

सानन्दं सखि वन्दसे दिनकरं प्राप्तं प्रतीचीगिरौ
सज्यं सम्प्रति कम्प्रति स्मरणभूः कोदण्डमाकर्षति।।37।।

भूयो बहिर्भवति मन्दिरमेति भूयो
भूयो विलोकयति वर्त्म गवाक्षलग्ना।
आगन्तुके बत विलम्बिनि जीवितेशे
बाला पलार्द्धमपि कल्पशतान्यवैति।।38।।

रजनिरजनि भूयसी बतेयं वितथकथः सखि ! नागतो मुकुन्दः।
स्मरहिमकरमल्लिकासमीरास्तनुमथ मे सुविभज्य भक्षयन्तु।।39।।

किमपरमहिलामनुप्रसक्तः स्वयमभिधाय यदागतो न कान्तः।
किमथ नहि गता तदन्तिके त्वं वितथकथे बत दूति दारुणासि।।40।।

भूषां विधेहि रुचिरं परिधेहि वासः
पत्रालिमालिख सखि व्रजकेलिकुञ्जम्।
एदद् वयो बत कियन्त्यपि वासराणि
मास्मिन्मृगाक्षि समयं नय दुर्ग्रहेण।।41।।

नीलञ्चोलमुरीकरोषि कुरुषे नेत्रेऽञ्जनारञ्जनं
मञ्जीरं मुखरं जहासि रसनाबन्धे न धत्से मुदम् ।
पाटीरं परिहृत्य लिम्पसितरां कस्तूरिकाभिस्तनुं
तन्मुग्धे ! तरुणस्य कस्य कथय प्रीतः प्रसूनायुधः।।42।।

भूषां हरिन्मणिमयीं वह लिम्प गात्रं
कस्तूरिकाभिरसितं परिधेहि वासः।
एतस्य किं सखि विधास्यसि वक्त्रचन्द्र-
ज्योत्स्नाचयस्य हरितां हरतस्तमांसि।।43।।

मनस्विनि ! तमस्विनी जलदजालजम्बालिनी
न सञ्चरति कुत्रचित्सुतनु ! पञ्चबाणेतरः
अनुस्मर सखि ! स्मरं रचय चाभिसारे भरं
प्रसिद्धमिदमासते यदिह साहसे सिद्धयः।।44।।

मातः कलिन्दगिरिनन्दिनि कुब्जबन्धो
मित्रान्धकार सखि यामिनि यूयमेते।
जानीत साहसिकतां कितवेन तेन
तत्तन्निबन्धवचसा मम वञ्चितायाः।।45।।

कूले कूले तपनदुहितुः पादपानाञ्च मूले
पुञ्जे पुञ्जे कुहरतमसां वेतसानां निकुञ्जे
भ्रामं भ्रामञ्चपलनयनान्वेषयन्ती भवन्तं
धीरं धीरं कितव ! भवता विप्रलब्धा रुरोद।।46।।

याचे त्वां त्यज दुर्ग्रहं सखि विपत्कूपे न मां पातयेः
का वा दैवहता विधास्यति पुनस्तेनैव या सौहृदम् ।
वर्षत्यम्बुधरे निशा यदनयं कुञ्जेषु तद्वञ्चिता
यावज्जीवमपैति किं मम हृदस्तद् वज्रलेपायितम् ।।47।।

माध्वीकधरामधुरैर्वचोभिर्विश्वसितायाः प्रथमं प्रियायाः।
न युज्यते यादवनाथ कर्तुं प्रतारणं प्राणपराभवाय।।48।।

गृहे गोपालानां सरलमनसां जन्म भवतो
गवां मध्ये वासस्तदनु शिशवोऽमी सहचराः।
विदग्धा मुग्धाक्षीः कपटवचसा वञ्चयसि यत्
त्वयाऽधीतं वंशीवदन ! वद कुत्रेति चरितम् ।।49।।

प्रातस्तल्पान्तमेतं परयुवतिपदालक्तकाङ्कालिकान्तं
कान्तं दृष्ट्वा वसन्ती स्फुरदधरपुटाताम्रदृक्प्रान्तकान्तिः।
अन्तःकोपोरक्तस्मितरुचिविचलन्मौलि सम्यग् विभासी-
त्येवं भूयो वदन्ती कलयति चतुरा मानमुच्चैर्महार्घम् ।।50।।

अयि प्रियतमे मयि त्यज रुषं प्रभो सा मया
कृतैव नहि तत्कथं तव दृशोरथं शोणिमा।
मुधा न कुरु जल्पनं यदियमेतयोर्बिम्बिता
तथा जनयति भ्रमं तव ललाटलाक्षारुचिः।।51।।

स्मितमलङ्कुरुते न तवाननं
रुधिरमुद्वहतीव विलोचनम् ।
स्फुरति हन्त हिमार्त्त इवाधरः
कथय कुप्यति कस्य सखि स्मरः।।52।।

धत्ते मत्तचकोरलोचनचमत्कारं तवाक्षिद्वयं
कोष्णः श्वाससमीरणोऽधरदलप्रान्तं धुनीते मुहुः।
पुष्णन्ति प्रतिपक्ष्मपालि वलितान्यश्रूणि मुक्तारुचिं
कस्मै कुप्यति कञ्जमञ्जुनयने कामोऽद्य वामोद्यमः।।54।।

मयि हठेन रुषं न जहासि चेत्तदपि सुन्दरि संयमयालकम् ।
तव समस्तसुधाकरजित्वरं मुखमदस्तसा बत जीयते।।55।।

मानं मानिनि मुञ्च मानसभुवस्साम्राज्यमुज्जृम्भतां
हा हा गच्छति यामिनी न समयो यातः पुनः प्राप्यते।
अत्यल्पागसि कल्पिताधिकभये कान्ते पदान्तानते
कोऽयं कोकिलवाणि केलिसमये कोपस्त्वयालम्बितः।।56।।

भावं भजस्व भव भाविनि ! सुप्रसन्ना
ना यामिनीं गमय गौरि ! दुराग्रहेण।
कोपः कुरङ्गनयने किल कामिनीनां
प्राणेशपादपतनावधिरेव रम्यः।।57।।

मा कुर्याः सखि माधवे प्रणयिनि स्वीकृत्य दोषं निजं
पादान्तं प्रणते मनस्विनि मनो मानग्रहग्रन्थिलम् ।
आयाते मधुमासि चन्दनवनीमन्दानिले सर्पति
प्रोत्फुल्लेषु वनेषु वेत्सि चरितं किन्नो मनोजन्मनः।।58।।

अयि विधुवदने विनापराधं किमिति मधौ मधुसूदनं जहासि।
इह सखि सहकारकाननेषु स्फुरति कलः कलकण्ठकण्ठनादः।।59।।

अयि विधुवदने विनापराधं किमिति मधौ मधुसूदनं जहासि।
यदि च स मदिराक्षि सापराधः स्मरसमरे नखरेण शासनीयः।।60।।

स्मरेणासौ दत्तस्सुतनु तव तेनास्य नियतं
प्रसादे शास्तौ च प्रभवति चलापाङ्गि भवती।
तदेतस्मिन्नेवं चरणपतिते किङ्करजने
दृशः कोणं शोणं न कलय कलाटी (ही?)ननयने ।।61।।

प्रणिपातपरोऽल्पकेऽपि दोषे सखि रोषादवधीरितो मुकुन्दः।
समुपैति वसन्तयामिनीयं करणीयं हतया मया किमस्याम् ।।62।।

स यदा समुपागतोऽनुनेतुं न तदा तन्वि कृतस्त्वया विचारः।
अनुतप्य किमाप्यतामिदानीं समतीते समयेऽस्तु कः प्रकारः।।63।।

अनुनेतुमुपागतः स्वभावादभिमानी यदनादृतो मुकुन्दः।
विषमाशुगतन्त्रया भवत्या स कृतः सुन्दरि-नोचितो विचारः।।64।।

स लघुत्वमवैतु मे तथा मां महिला मानधना विगर्हयन्तु।
पुनरेष्यति चेत् प्रिया (:) प्रदास्ये सहसाऽहं परिरभ्य चुम्बनानि।।65।।

अनुनय चतुरे तमाशु गत्वा समुचितसामगिरैव जीवितेशम् ।
न च पुनरतिकातरं वचस्त्वं सखि मम जीवनतृष्णया विदध्याः।।66।।

प्रणयिनि विमुखे वचोऽतिदीनं यदि बत जीवितकातरा वदिष्ये।
वदनमिदमहं मनस्विनीनां सदसि तदा कथमालि दर्शयिष्ये।।67।।

किमितर इवाभीरस्तन्वि त्वया मुरलीधरो
बत परिचितो येनायातस्स्वयं स न सत्कृतः।
कतिः कति न वा तस्य त्वतोऽधिकाः सुदृशो वशे
न बहुसुलभो जन्मन्यस्मिन् जनो नहि तादृशः।।68।।

प्रणयपेशलया न मया कृतो
यदि कदाचन तस्य तथादरः।
सखि स चेदियता विमनायते
कथय केन किमत्र विधीयताम् ।।69।।

यस्यां त्वत्प्रणयः पुरा सुचरितैः सम्प्राप्य कोटिं परा-
मन्यासां सुदृशां स्पृहास्पदमभूत् सद्भावसम्भावनैः।
तस्या नाम्न्यपि कीर्तिते बत मया व्यावर्त्तयस्याननं
किम्ब्रूमस्त्वमहो मुकुन्द ! कठिनः काष्ठादपि प्रायशः।।70।।

चित्तं यत्र समर्पितं तनुरियं दत्तैव यस्मै मया
स प्रेयानसकृत्सपत्नसदसि प्रस्तौति मे दुष्कथाः।
किं कुर्यां;दियहोचितं सखि ! भवेत्तत्रैव सम्पद्यते
यत्प्राणा न बहिर्भवन्ति कठिनाः कण्ठान्तरावर्तिनः।।72।।

प्रातः प्रयास्यति विलासिनि ! वल्लभस्ते
यत्स्यादमङ्गलममुष्य न तद् विदध्याः।
युक्तं ब्रवीषि सखि ! किन्तु ममाप्यसूनां
यात्राच नास्य गमनं पुरतः प्रशस्तम् ।।73।।

मग्ना मग्ना विरहजलधौ देहलीस्तम्भलग्ना
दृष्ट्वा दृष्ट्वा सुभग ! भवतो वर्त्म यावद् दिनान्तम्।
भिन्ना भिन्ना मनसिजशरैस्त्रप ! त्वत्कृते सा
खिन्ना खिन्ना गमयति मृगीलोचना वासराणि।।74।।

यत्रैव यथैव येन केनापि ते नामनि सूचितेऽपि।
तदेव तत्रैव तथैव तस्यास्तमेव धावन्ति षडिन्द्रियाणि।।75।।

यान्त्यन्तर्बहिरिन्द्रियाणि मिलितुं प्राणैः प्रयाणोत्सुकै-
रायात्यस्तु नदीनिमज्जनभिया निद्रा न नेत्रान्तिकम् ।
नाथ ! त्वद्विरहे सरोरुहदृशो विश्लेषवैश्वानर-
ज्वालाजालभयेन हन्त हृदयं शून्ये परिभ्राम (म्य) ति ।।76।।

भवद्वियोगे हरिणीदृशो दृशोरवैमि वासं विदधे पयोनिधिः।
यदेधते वारि तयोर्विधूदये न च स्मरौर्वानलतोऽपि शाम्यति।।77।।

किन्नास्ति कान्ता तव पान्थ ! सद्मन्यस्यामपि प्रावृषि यत्प्रयासि।
मनांसि पुंसामथवा भवन्ति किन्नाम वज्रादपि दारुणानि।।78।।

पुरे पुरारेस्तरुणेन केन तपांसि तप्तानि समाः सहस्रम् ।
दवानलेनाकुलिता लतेव कलावति ! क्लामयसि यस्य हेतोः।।79।।

अभिनवविरहाग्निप्लोषदोषं विशेषा-
न्मम वपुषि हिमांशोरंशवो वर्द्धयन्ति।
तदुपरि विषमेषुर्बाणवर्षं विधत्ते
तदपि सखि! मदीया नासवो निस्सरन्ति।।80।।

भ्रमयतु मम चेतः पञ्चबाणः परेत-
स्सृजतु वपुषि दोषानत्र दोषाकरोऽपि।
कथय सखि ! किमेतत्सन्तपत्येष तन्मा-
महह मलयजन्मा बन्धुरो गन्धवाहः।।81।।

रचिताः कति नाश्रुभिस्तटिन्यो घटिताः कत्यथवा न बाहुबन्धाः।
सखि हे! गमनोत्सुके मुरारौ करवै किं विधिरेव नानुकूलः।।82।।

परदेशिनि रम्भोरु! त्वया चेत्प्रणयः कृतः।
मल्लीपरिमलोद्वाही सोढव्यो मलयानिलः।।83।।

आलीनां विविधैरुपायरचनैः स्वीयेन धैर्येण वा
भाग्येनाथ ममैव वा यदि तया प्राणा वसन्ते धृताः।
स्निग्धश्यामलवारिवाहपटलैर्व्याप्ते वियन्मण्डले
नो जानामि सखे! भविष्यति दशा का वा कुरङ्गीदृशः।।84।।

सखीजनानां विविधैरुपायैर्यथाकथञ्चिद् गमितो वसन्तः
कादम्बिनीनामुदिते कदम्बे तस्या बत स्यात् कतमः प्रकारः।।85।।

प्रावृट् प्रयत्नेन परेण नीता
यथा यथेयं शरदप्यतीता।
त्वया विना शोगो ? कुलनाथ ! तस्या
हा हन्त हेमन्तनिशासु किं स्यात्।।86।

नवोदिता चान्द्रमसी कलेव त्वं कस्य न स्या नयनोत्सवाय।
ममैव दुर्दैवहतस्य बाले ! विलोकनन्ते विषवद् बभूव।।87।।

तानि स्मितानि मधुरालपितानि तानि
तानि स्वभावललितानि विलोकितानि।
चेतोभवस्य वितनोरपि जीवितानि
धिग्दैवमस्य हतकस्य विषायितानि।।88।।

कालिन्दीजलवीचिडम्बरचमत्कारेण येनाहृतं
नैवाद्यापि निवर्तते मम मनो निम्नादिव प्रस्रवः।
न्यञ्चद्ग्रीवमुदञ्चितभ्रु विकसत्स्मेरश्रिया द्योतितं
विस्मर्येत कथं सरोरुहदृशस्तद्वक्रमालोकितम् ।।89।।

शयाना दृष्ट्वा मां सुदृढ़परिरम्भाय रभसा-
दुदञ्चद्दोर्मूलं प्रसभमुदतिष्ठत् प्रियतमा।
ततो लज्जामीलन्नयनकमलावर्तितमुखी
हठादङ्गाकृष्टिच्छलमकृत यत्तद् व्यथयति।।90।।

उत्सङ्गे मम सुप्तया स्मरकलाकौतूहलासक्तया
तास्ताः कामिमनोविनोदनकरीः श्रुत्वा मदीयाः कथाः।
प्रेयस्या परितोषपूरितहृदा यन्मे प्रसादीकृतं
गाढालिङ्गनचुम्बनं पियसखे! तत्केन विस्मर्यताम् ।।91।।

गजराजगते ! कृते तवाहं न वपुः किं मदनानले जुहोमि।
अनिशं हृदयस्थिता न चेत्त्वं सुकुमाराङ्गि ! निरोधिनी मम स्याः।।92।।

न मृद्वी मृद्वीका भवति मधुरा यस्य पुरतः
कदाचित् काचित्स्यादमृतलहरी यत्सहचरी।
कथं विस्मर्येत प्रणयपरिपाटीपरिणतं
तदाकूतस्यूतं कुवलयदृशः काकुवचनम् ।।93।।

दिवानिशं विरहदवेन दह्यसे
विदीर्यसे हृदय ! न किं सहस्रधा।
अथायसं त्वमसि ततो न भिद्यसे
विभिद्यसे कुसुमशरेण तत्कथम्।।94।

किं मे दुर्जनजल्पितेन विमले वंशे कलङ्केन वा
प्राणो मे प्रहरन्ति हन्ति विषमा बाणा मनोजन्मनः।
पुण्योपार्ज्जितया कदापि कृपया धातुम्मया सा पुनः
प्राप्येत प्रियभाषिणी यदि तदा प्राणैः सह स्थाप्यते।।95।।

अयं पीयूषांशुः किरति किरणानग्निसदृशान्
विषोद्गामी हा धिङ् मलयनिलयो वाति पवनः।
प्रसीद प्राणेशि ! क्षणमपि दृशोरेहि विषयं
नयन्ति प्राणान् मे विषमशरचण्डालविशिखाः।।96।।

राकाशशाङ्कवदने ! चलमप्यभिज्ञं
मन्ये तदेव भवतीमनुचारि चेतः।
प्राणान् धिगस्तु मम हन्त! नितान्तमुग्धान्
ये त्वां विहाय मयि दैवहते वसन्ति।।97।।

चक्षूरागे प्रथममनयोरप्रसक्तं व्यधासी-
रप्रत्यूहं तदवधि तथा भावबन्धं व्यतानी-
प्रौढे प्रेमन्यहह विरहव्याजतो वज्रमेतत्
क्षिप्तादूनो (क्षिप्तं यूनो ?) रुपरि भवता किं विधातर्व्यधायि ।।99।।

आयाते दयिते चिरात् कथमपि प्राप्ते रहःसङ्गति
संरूढ़स्मरकुम्भजनमचुलुकीभूतत्रपावारिधिः।
बाष्पव्याकुलकण्ठरुद्धवचना सम्मील्य सास्रे दृशौ
तस्योद्यत्पुलका तनोति सुतनुर्न्निस्सन्धिदोर्बन्धनम्।।100।।

कामिन्यः कति वा न कामनृपतेराज्ञावशा रात्रिषु
ज्यौत्स्नीष्वप्यभिसारसाहसरसैस्सम्पादयन्तीप्सितम् ।
अस्माकं श्वसितेऽपि हन्त भवति द्राक् सर्वतो डिण्डिमः
किं प्रेमाकुलसुभ्रुवां सखि ! मनस्तापाय यत्केवलम् ।।101।।

सुश्रावण्यमिषेण कुप्यति रहस्स्वामी न सम्भाषते
साशङ्का प्रतिवेशिनः प्रतिगृहं कुर्वन्ति कौलीनकम् ।
चेष्टाः किञ्च निरूपयन्ति निभृतं यत्नो (त्ना ?)त्सपत्नस्त्रियः
प्रेमा कैरपि तर्क्कितस्सहचरि प्राणैर्मम क्रीडति।।102।।

कुलं विशालं दयितो दुरन्तो वासः खलानां सखि ! सन्निधाने।
बभूव वृन्दावनसुन्दरेण तत्प्रेम मे प्राणपराभवाय।।103।।

सा पङ्केरुहलोचना कथमपि प्राप्ता दृशोर्गोचरं
जातः पूर्वजनुष्कृतेन तपसा वाचामपि प्रश्रयः।
प्रत्यग्रप्रणयप्ररोहसमये धातः ! खलानां मुखात्
क्षिप्तो निष्करुण ! त्वया कथमयं हा धिक् प्रवादाशनिः।।104।।

अहह मम हता तनूलतेयं
गृहकुसुमावचयेऽपि खेदमेति।
प्रियसखि ! पुरुषायितैकतोषः
कथय कथं स मयानुरञ्जनीयः।।105।।

अहह मम हता तनुर्न पात्रं
सखि विहिता विधिना विभूषणानाम् ।
क्षणमपि न जहाति हन्त यन्मा-
मयि नयनाञ्जनकारणाय कान्तः।।106।।

इह सहचरि मां वदन्ति सर्वे
वरतनु भूषयसि त्वमेव भूषाः।
अनुदिनमिति नाददेऽहमेता
हसति जनस्सततान्यकृत्यसक्तम् ।।107।।

यं गोरसं ननु जिघृक्षसि तं गृहाण
मा मां विलम्बय हरे! विजनेऽत्र कुञ्जे।
एकास्ति धाम्नि जननी मम पत्युरन्धा
याचिष्यते कु (क ?) मुदकं तृषिता बताऽसौ।।108।।

पान्थोऽसि चेत्कथय सुन्दर! निर्विवेक-
चेता न कच्चिदसि हन्त यथा पतिर्मे।
यः प्रीतिवैरिविधिमूढजने पुरेऽस्मि-
न्नेकां विहाय वनिताम्मगमत् सुदूरम् ।।109।।

कोपं करोतु सखि ! कोऽपि गृहे कदापि
यास्यामि नैव यमुनामुदकाय भूयः।
तत्रालयो बत सरोरुहकाननेभ्यो
निर्गत्य वारिजदृशामधरं धयन्ति।।110।।

जनितो देवसेनायामनिरुद्धेन सूरिणा।
मोहनः कृतवानेतां रसानन्दतरङ्गिणीम् ।।111।।

□□□

ISSN 0377-0575

गैर्वाणी-गौरव-ग्रन्थमाला - 33

गैर्वाणवाणी-गौरवभूत-प्रत्न-नूतन-लघु-ग्रन्थानां सङ्कलनम्

गङ्गानाथझापरिसरशोधपत्रिकायाः परिशिष्टम्

भट्टरामजित्-कृता

बुद्धिशुद्धिः

सम्पादकः

जगन्नाथ पाठकः

राष्ट्रिय-संस्कृत-संस्थानम्

गङ्गानाथझापरिसरः

चन्द्रशेखर-आजादोद्यानम्

प्रयागः-211002

2013

ISSN : 0377-0575

कृतिः : भट्टरामजित् -कृता बुद्धिशुद्धिः

प्रकाशकः : राष्ट्रिय-संस्कृत-संस्थानम्, गङ्गानाथझापरिसरः
चन्द्रशेखर-आजादोद्यानम्, प्रयागः 211002

सम्पादकः : जगन्नाथ पाठकः

वर्षम् : 2013 ई.

मुद्रकः : एकेडेमी प्रेस
दारागंज, इलाहाबाद - 211006

ISSN 0377-0575

Published under *Gairvāṇavāṇi-Gaurava-Granthamālā*
Series-33

BuddhiŚuddhiḥ

of Bhaṭṭarāmjit

Edited by
Jagannath Pathak

Rashtriya Sanskrit Sansthan
Ganganath Jha Campus
Chandrashekhar Azad Park
Allahaad - 211002
2013

Book	:	Budddhiśudhiḥ of Bhaṭṭarāmjit
Edited by	:	Jagannath pathak
Published by	:	Rashtriya Sanskrit Sansthan Ganganath Jha Campus Chandrashekhar Azad Park, Allahaad - 211002
©	:	Publisher
First Edition	:	2013
Printed at	:	Academy Press Daraganj, Allahabad - 211006

Preface

The small book of poetry, titled as बुद्धिशुद्धिः, can be put in the *rāgakāvya*-category, so for as the modern काव्यशास्त्र is concerned. The *kāvya,* containing 137 verses in all, is authored by a famous poet Bhaṭṭarāmjit. It is also edited for the first time by another great poet of the present time, Dr. Jagannath Pathak. The present edition of बुद्धिशुद्धिः has been prepared with the help of a single manuscript procured from Allahabad Museum (vide its accession No. 330/127). For more details of the manuscript one may refer to the Editor's note under a title पृष्ठभूमि. We do not know much about the author of बुद्धिशुद्धिः, i.e. Bhaṭṭarāmjit. The ending colophon of the manuscript contains the following fact about the author Bhaṭṭarāmjit in *anuṣṭubh* metre :

श्रैनाथितानन्तपदद्वन्द्वो द्वन्द्ववर्जितः।चक्रे चक्रधरप्रीत्यै बुद्धिशुद्धिं तु रामजित् ।।

The above colophon says that the author Rāmajit or Bhaṭṭarāmajit has written this बुद्धिशुद्धि for the pleasure of Cakradhara, i.e. the lord Viṣṇu (चक्रधरप्रीत्यै). The kāvya contains verses based on भक्ति and वैराग्य etc. Though it is not a स्तोत्रकाव्य in a complete sense, still it can very well enrich the great tradition of स्तोत्रकाव्य.

The poet has divided the present *rāgakāvya* into four parts called 'वैमल्य' and in the first वैमल्य he depicts ध्यान, पञ्चोपचारफल etc. along with the glorification of the holy place Kashi (Varanasi) and गङ्गा (the river goddess) etc. whereas the second वैमल्य is centred around भक्ति, कथामहिमा, वैराग्य and ज्ञान etc. In the third वैमल्य, however, he has taken care of the subjects like अदृष्टबल, कालबल, the bad position of विप्र-s caused by कलि along with दुर्जनचेष्टा and स्त्रीनिन्दा etc. while in the last वैमल्य, i.e. the 4th one the poet has handled the themes like तृष्णा (or लोभ), काम, क्रोध, शोक, कदर्य and दरिद्र etc.

It is worth-mentioning here that another work of the same author, titled 'गीतगिरीशम्' had been edited for the first time by Pt. Prabhat Sahstri and it was published by Devabhasha Prakashan, Daraganj, Allahabad in 1970. Pt. Shastri has quoted the following verse of गीतगिरीश in his Introduction to introduce the present poet Bhaṭṭarāmjit :

आसीदसीममहिमा स हिमावदातमूर्ते-
भर्वस्य चरणार्चनयाऽऽप्तकीर्तिः।
श्रीनाथभट्ट इति तत्तनयेन रामनाम्ना-
द्भुतं व्यरचि गीतगिरीशमेतत् ।।

Here in this verse we do not find much information about the poet. However, as per the informations given by Dr Prabhat Shastri in his Introduction, the manuscript catalogue (Vol. 5, p. 464) of India Office Library, London keeps record of the following verse :

वचनार्णवमालोक्य मुनीनां मितवादिनी।
स्वविभागविवेकस्य टीका रामजिता कृता।।
पुष्करिणी मितवादिन्येषा पार्श्वे मिताक्षरासिन्धोः।
सज्जनमनोमरालाः खेलनवायान्तु निःशङ्कम् ।।

From this verse it is clear that Bhaṭṭarāmjit has written an auto commentary (*svopajña-vyākhyā*) *Mitavādinī* on his own *Vibhāgaviveka*. According to Pt. Shastri, Gītagirīśam was published with a commentary by Atmaram from Medical college press of Varanasi in 1874 (vide Catalogue of Sanskrit Manuscripts, private libraries of the North West Provinces, Ist volume, P.16). But it was not available to Pt. Shastri. Moreover, he was also not aware of the present work *Buddhiśuddhi*.

In one of the manuscripts of *Gītagirīśam*, the time of its scribing was recorded as *samvat* 1756 (accordingly 1702 AD). However, the scribing time of Buddhiśuddhi is given as *Samvat* 1653 (accordingly 1596 AD). Pt. Prabhat Shastri has fixed the time of Bhaṭṭarāmjit as the second half of 15th century and the first half of 16th century AD. On the other hand, in Gītagirīś :am, Shastriji records poet's name as Kavinṛpati Rāmbhaṭṭa. However, in Buddhiśuddhi his name has been stated as Bhaṭṭarāmajit. In fact, Shastriji accepts the present author as a Maharashtrian Brahmin or a Gujar Brahmin. गीतगिरीशम् on the other hand, is a mature work in the tradition of Jayadeva's *Gītagovinda*. The poet has clearly owed the indeptedness to Jayadeva. The *rāgakāvya* : *Gītagiriśam* contains12 cantos in all.

However, the kāvya is worthy to be counted in the category of *Mahākāvya* and it is called so in its Manuscript also. Similarly, Jayadeva's *Gītagovinda* also desrves to be called a *sṛngāra mahā-kāvya*.

औत्सुक्यादहमधुना तथाऽनुकुर्वे
लालित्यं कविजयदेवभारतीयम् ।। (प्रथम सर्ग)

The proud statements (*garvokti*) of Sanskrit poets are famous. kavinṛpatibhatta has also made some proud statements in this *kāvya*. It is as good as a *subhāśitasaṅgraha*. The proud statements (*garvokti*) of kavinṛpatibhaṭṭa remind us about the *garvokti* of Paṇḍitarāja. Some *garvoktis* of kavinṛpatibhaṭṭa are as follows :

या वाचामुचितार्थसङ्गतिभृतां भङ्गिर्य ओजःप्रसा-
दाद्याः काव्यगुणा यदन्धकरिपुध्यानावधानादिकम् ।

भारत्या भरतस्य यच्च मथितं तद् रामनाम्नः कवे-
र्विद्वांसः कलयन्तु गीतगिरिशाच्छ्रीकण्ठपादार्पितात् ।।(12/10)

Similarly, one can find his *garvokti* in the following verse also :

मधु विधुतमसि त्वं खण्ड ते खण्डता स्तात्
सरक नकरमेव त्वं त्वमिक्षो क्षुरोऽसि
अमृतमनृतमेवाम्र प्रियस्वाधर त्वं
न (हि) किमधर इमा यद् रामवाचो जयन्ति।। (12/11)

Similarly in the present *kāvya* also one can find the maturity and *garvokti* of the poet. This *kāvya* is also as good as a *subhāṣitasaṅgraha* of a single poet. Title of the present work and its chapter division etc. do also imply the intention of the poet very well. But inspite of that the level of his potic quality is not found detoriated. Whatever subject has been taken care of here by the poet, it has been dealt with all sorts of poetic sincerities. Thus, the poetry as a whole becomes fully enjoyable and acceptable to its readers.

Here the lord Rāma is not seen affected by the news of Kumbhakarṇa's approach when he hears the following statements : o Sugrīva give up all your proudness, O elephant, get afraid and run away, o son of wind deity! you will be ruined undoubtedly, O gavaya! do not shout, o rambha! give up the *stambha,* i.e. the pillar. O Aṅgada! what are you telling : Kumbhakarṇa has approached. Hearing all these hob-nobs, Rāma just smiled slightly and had a glance at his bow. In fact, this sort of his heroic enthusiasm draws the readers towards the feelings of heroic sentiment (i.e. *vīra-rasa*).

The poem *dhyānam* in the first *'vaimalya'* is full of *yoga* terminologies which may not be appealing to the learned readers. But same is not the case with his other poems like *pañcopacāraphala* and *Kāśigaṅgayormahimā* etc. One can find his poetic qualities throughout. Even the unwanted subjects such as the blame of women (*strīnindā*) etc. also do not pinch the readers

beacause the context is nothing but the detachment (or *vairāgya*). As informed by the editor Dr. Pathak, the scribing of the manuscript was not that clear which quite often affected his editing in the fixation of correct readings. Therefore, he has humbly made an appeal to the readers to suggest better readings if any which can be accomodated in the next editions.

Hope, just like the other works of the author, the present kāvya will also be well appreciated by the lovers of Sanskrit poetry. Dr. Pathkji certainly deserves our appreciation for not only editing the work but for providing us for publication.

Banamali Biswal

पृष्ठभूमि

भट्टरामजित् द्वारा विरचित बुद्धिशुद्धिः संस्कृत का एक सुन्दर लघुकाव्य है। संयोग से इस की एक मात्र पाण्डुलिपि मुझे इलाहाबाद संग्रहालय की पाण्डुलिपियों की छान-बीन करते समय उपलब्ध हुई। जिसका का परिचय इस प्रकार है-

- पुस्तक सं.330/127

1. पत्रों की संख्या : 2-16, प्रथम पत्र अप्राप्त है;
2. पत्रों का परिमाप : 26.5 X 12 से.मी.

   प्रत्येक पृष्ठ में आठ पंक्तियाँ है तथा प्रत्येक पंक्ति में लगभग 33 अक्षर है :
3. पाण्डुलिपि पूर्ण, किन्तु कुछ क्षतिग्रस्त
4. प्रत्येक पृ. में 10 पंक्तियाँ और प्रत्येक पंक्ति में लगभग 34 अक्षर हैं।

अन्त में लेखक रामजित् ने अपना परिचय इस प्रकार एक अनुष्टुप् द्वारा दिया है-

श्रैनाथितानन्तपदद्वन्द्वो द्वन्द्ववर्जितः।

चक्रे चक्रधरप्रीत्यै बुद्धिशुद्धिं तु रामजित् ।।

बुद्धि-शुद्धि भक्ति, वैराग्य आदि को प्रश्रय देने वाली कृति है, फिर भी यह समग्रतया कोई स्तोत्रकाव्य नहीं है। इसे रचनाकार ने चार 'वैमल्यों' में विभक्त किया है। प्रथम वैमल्य में ध्यान, पञ्चोपचारफल तथा काशी और गङ्गा की महिमा का वर्णन है, द्वितीय वैमल्य के विषय हैं- भक्ति, कथामहिमा, वैराग्य और ज्ञान; तृतीय वैमल्य के अन्तर्गत अदृष्ट बल, काल बल, विप्रों की कलिकृत दुर्दशा, दुर्जनचेष्टा और स्त्रीनिन्दा है और अन्त के चतुर्थ वैमल्य में तृष्णा और लोभ, काम, क्रोध, शोक, कदर्य, दरिद्र को विषय बनाया गया है। सम्पूर्ण रचना में 137 पद्य हैं।

संयोग की बात है, कि इसी रचनाकार की एक दूसरी रचना 'गीतगिरीशम्' नाम का एक रागकाव्य स्व.डा.प्रभात शास्त्री द्वारा देवभाषा प्रकाशन, दारागंज, इलाहाबाद -6 से सं.2027 वि. (1970 ई.) में प्रथम बार सम्पादित होकर प्रकाश में आ चुका था। डा.शास्त्री ने अपनी 'भूमिका' में गीतगिरीश के अन्त में प्राप्त कवि-परिचय का यह पद्य उद्धृत किया है-

आसीदसीममहिमा स हिमावदातमूर्ते-

र्भवस्य चरणार्चनयाऽऽप्तकीर्तिः।

श्रीनाथभट्ट इति तत्तनयेन रामनाम्ना-

द्भुतं व्यरचि गीतगिरीशमेतत् ।।

इस पद्य में कवि के सम्बन्ध में कोई अतिरिक्त परिचय प्राप्त नहीं होता। किन्तु शास्त्री जी की भूमिका की सूचना द्वारा इण्डिया आफिस लाइब्रेरी, लन्दन के संस्कृत मैन्युस्क्रिप्ट कैटलॉग

भाग 5 तथा पृ.464 पर यह निर्देश मिलता है-

वचनार्णवमालोक्य मुनीनां मितवादिनी।
स्वविभागविवेकस्य टीका रामजिता कृता।।
पुष्करिणी मितवादिन्येषा पार्श्वे मिताक्षरासिन्धोः।
सज्जनमनोमरालाः खेलन्त्वायान्तु निःशङ्कम् ।।

इस निर्देश से स्पष्ट प्रतीत होता है कि भट्ट रामजित् ने अपने ही विभागविवेक नाम के ग्रन्थ की 'मितवादिनी' नाम की टीका भी लिखी थी।

प्रभातशास्त्री जी की सूचना के अनुसार 'गीतगिरीशम् '' आत्माराम की टीका के साथ वाराणसी में 1874 ई.में मेडिकल हाल मुद्रणालय में मुद्रित हुआ था (कैटलाग आफ संस्कृत मैन्युस्क्रिप्ट प्राइवेट लाइब्रेरीज आफ दि नार्थ वेस्ट प्राविन्सेज, प्रथम भाग, पृ. 16)। किन्तु यह संस्करण शास्त्रीजी को प्राप्त नहीं हो सका था। स्व. प्रभात शास्त्री जी को 'बुद्धिशुद्धि' की जानकारी नहीं थी।

'गीतगिरीश' की एक पाण्डुलिपि पर प्रतिलिपिकाल संवत् 1756 उल्लिखित है। इसके अनुसार 1702 ई. की उसकी पाण्डुलिपि सिद्ध होती है, किन्तु बुद्धिशुद्धि का प्रतिलिपिकाल सं.1653 निर्दिष्ट है, तदनुसार 1596 ई. में यह लिखी गई थी। प्रभातशास्त्री ने भट्टरामजित् का जन्म-काल अनुमान के आधार पर ईसा के सोलहवीं शती का पूर्वभाग लगाया है। अधिक से अधिक भट्ट रामजित् के समय को ईसा की पन्द्रहवीं शती के उत्तर-भाग और सोलहवीं शती के पूर्व भाग के बीच माना जा सकता है। प्रभातशास्त्री जी द्वारा सम्पादित संस्करण में 7 कविनृपतिरामभट्टः' यह नाम मुद्रित है,किन्तु 'बुद्धिशुद्धि' के प्रस्तुत संस्करण में पाण्डुलिपि में प्राप्त 'भट्ट रामजित्' नाम को अपनाया गया है। शास्त्री जी रामजित् भट्ट को या तो महाराष्ट्रीय या गुर्जर ब्राह्मण मानते हैं।

'रागकाव्य'' विधा के अन्तर्गत, जयदेव के गीतगोविन्द की परम्परा में प्रस्तुत गीतगिरीशम् एक प्रौढ़ रचना है। भट्टरामजित् ने इसमें जयदेव के गीत-गोविन्द का ऋण स्वीकार किया है-

औत्सुक्यादहमधुना तथाऽनुकुर्वे
लालित्यं कविजयदेवभारतीयम् ।। (प्रथम सर्ग)

द्वादश सर्गों में लिखित 'गीतगिरीशम्' एक राग-काव्य होने पर भी एक महाकाव्य की कोटि में परिगणनीय है, जैसा कि इसकी एक पाण्डुलिपि में इसे 'महाकाव्य' के रूप में निर्देश किया गया है। जयदेव के गीतगोविन्द को भी शृङ्गार-महाकाव्य के रूप में लक्षित किया जा सकता है। पण्डितराज जगन्नाथ की भाँति 'कविनृपति' भट्ट रामजित् की ये गर्वोक्तियां आकलनीय हैं-

या वाचामुचितार्थसङ्गतिभृतां भङ्गिर्य ओजःप्रसा-

दाद्याः काव्यगुणा यदन्धकरिपुध्यानावधानादिकम् ।

भारत्या भरतस्य यच्च मथितं ताद्रामनाम्नः कवे-

र्विद्वांसः कलयन्तु गीतगिरिशाच्छ्रीकण्ठपादार्पितात् ।। (12/10)

तथा,

मधु विधुतमसि त्वं खण्ड ते खण्डता स्तात्

सरक नकरमेव त्वं त्वमिक्षो क्षुरोऽसि

अमृतमनृतमेवाम्र म्रियस्वाधर त्वं

न (हि) किमधर इमा यद् रामवाचो जयन्ति।। (12/11)

इसी प्रकार भट्टरामजित् की प्रस्तुत दूसरी रचना में भी कवि के कवित्व की प्रौढ़ि लक्षित की जा सकती है। यह रचना सुभाषित -संग्रह प्रकृति की हो गई है। अधिकतर 'सुभाषितसंग्रह' कई कवियों के सुभाषितों के संग्रह होते हैं, किन्तु यह 'बुद्धिशुद्धि' एक ही कवि के सुभाषितों का संग्रह है। इसका नामकरण और 'वैमल्य' के नाम से रचना का विभाजन भी कवि का मन्तव्य प्रकट करता है। किन्तु इतने मात्र से 'कविनृपति' भट्टरामजित् का कवित्व पक्ष यहाँ किञ्चित् न्यून हो गया हो, ऐसा नहीं लगता। कवि जिस प्रसंग या बात को उठाता है उसे एक पूर्णता देता है और साथ ही ग्राह्य भी बनाता है। प्रथम 'वैमल्य' के आठवें पद्य में, जब वह कहता है- हे सुग्रीव! अपना सारा गर्व छोड़ो, हे गज! भय धारण करो (और भागो) हे वायुपुत्र! निश्चय ही तुम्हारा नाश होने वाला है; हे गवय, बहुत चिल्लाओ नहीं, हे रम्भ, स्तम्भ छोड़ो, हे अंगद क्या कह रहे हो, अरे कुम्भकर्ण आ धमका है !" इस प्रकार शोर मचने लगा तब, हे राम! तुम्हारे मुख पर एक हल्की मुस्कान खिली और केवल तुमने अपने धनुष पर एक दृष्टि डाली !

यहाँ कुम्भकर्ण के आगमन के समाचार से अप्रभावित राम के वीरोचित उत्साह की सहज अभिव्यक्ति मन को कुछ क्षणों के लिए वीर-रस की अनुभूति के सराबोर कर देने वाली प्रतीत होती है। प्रथम वैमल्य में 'ध्यानम् ' शीर्षक में प्रस्तुत पद्य योग के नाना पारिभाषिक शब्दों से भरे होने के कारण कवित्व से अस्पृष्ट है, किन्तु 'पञ्चोपचारफलम् ' तथा 'काशीगङ्गयोर्महिमा' के पद्यों में कवित्व के स्पर्श को अस्वीकार नहीं किया जा सकता है। केवल इतना ही कहा जा सकता है कि इनमें वाग्भङ्गी की गतानुगतिकता अवश्य लक्षित होती है। अन्य 'वैमल्यों' में भी विभिन्न शीर्षकों में संकलित पद्यों में कवित्व का स्पर्श लक्षित किया जा सकता है। यह कहने की आवश्यकता नहीं कि वैराग्यपरकता के कारण कवि ने 'स्त्रीनिन्दा' आदि जो बातें कहीं हैं वे हमे उद्विग्न नहीं करतीं।

प्रस्तुत रचना के सम्पादन के क्रम में मुझे प्रतिलिपिकार के लेखन में नाना प्रकार की अस्फुटताओं को झेलना पड़ा है। यद्यपि अक्षर बड़े हैं, फिर भी यत्र-तत्र उनका सही रूप में न

पढ़ पाने की समस्या सामने आती रही और समाधान न कर पाने के कारण एक प्रकार की व्याकुलता का भी अनुभव हुआ। कहीं-कहीं तो मैं समाधान न ढूँढ़ पाने के कारण व्यथित भी हुआ। मेरी इस व्यथा को प्रबुद्ध तथा सहृदय पाठक प्रस्तुत रचना में अन्तःप्रवेश के अवसर पर अनुभव अवश्य करेंगे। उनसे अनुरोध है कि यदि उन्हें मेरी त्रुटियों के निराकरण सूझें तो मुझे लिखकर सूचित करने की कृपा करेंगे।

यह रचना यथासम्भव प्रथम बार प्रकाश में आ रही है। इस कारण, आशा है, संस्कृतज्ञ-समाज में इनका स्वागत होगा।

जगन्नाथ पाठक

भट्टरामजित् -कृता
बुद्धिशुद्धिः

.......तपहरः श्रीरामभूमीभृतः ।।4।।

त्वद्धस्तः कल्पशाखी वचनमपि सुधा ते त्वदूरू च रम्भा
त्वच्चित्तं सद्विमानं वदनमपि च ते नन्दनं सज्जनानाम् ।
इच्छा ते कामदोग्ध्री पदनखमणयश्चिन्तितार्थप्रदास्ते
भक्तानां शेवधिस्त्वं तदसि हि भरतभ्रातरेको द्युलोकः ।।5।।

काश्मीराङ्गकलिङ्गकीरकुरुकर्णाटान्ध्रगान्धारका-
श्यानर्त्तद्रविडत्रिगर्तमिथिलादीलाप (?) मालार्चितम् ।
वार्द्धार्षभरेवतत्रिशिखरश्रीशैलहेमाचल-
प्रालेयाचलपालसेवितपदं श्रीराघवं स्तौम्यहम् ।।6।।

कलिदलनस्य प्रहतमलस्य क्षतशमलस्य स्फुटकमलस्य।
विततबलस्य क्षुभितखलस्य श्रयत भुजं रघुवीरनृपस्य।।7।।

गर्वं सुग्रीव सर्वं त्यज गज विभज त्वं भयं वायुसूनो
नूनं नष्टोऽसि कष्टं तव गवय महन्मा नदीस्तारतारम् ।
रम्भ स्तम्भं विमुञ्चाङ्गद निगदसि किं कुम्भकर्णोऽयमाया-
तीत्थं कोलाहले त्वं स्मितलवसचिवः केवलं चापमैक्षः।।8।।

अस्तं पौलस्त्य मा याः प्रघस वस चिरं शक्रजिद् विक्रमस्ते
मिथ्या सुप्तघ्न विघ्नस्तव भवति पुरा कुम्भन स्तम्भमञ्च।
मूर्द्धाबद्धाञ्जली त्वां कृपयतु नृपती राम इत्थं ब्रुवाणः
पौलस्त्यस्यानुजन्माऽरचदिति भवत्येकभक्तिप्रयुक्तिम् ।।9।।

अमानध्वनद्‌धन्वधों (दो ?) कारधारा-
धरीभूतनिर्धूतधाराधराय।
भ्रमद्‌भल्लभल्लीमतल्लीलसल्ली-
लयात्कृत्तमत्तद्विषत्कन्धराय।।10।।

करालातिकालासिहेलाहतोत्तुङ्गमातङ्गपङ्गूकृताध्वानिलाय।
पतत्पट्टिशैः पिष्टदुष्टारये श्रीविदेहात्मजानाथ तुभ्यं नमोऽस्तु।।11।।

अथ ध्यानम्

न नीचे नात्युच्चे तृणहरिणचर्मादिजनिते
समासीनः पीठे सरलतनुरुत्सङ्गगगभुजः।
नसोग्रं सम्पश्यन्नसुसरणिमुद्‌बोधयति यः
प्रकारैः पूराद्यैः स भवति हरिध्याननिपुणः।।12।।

शनैर्मूलाधारात् प्रणवमभिदं मूर्द्धनि गतं
विधाय प्राणेन प्रतिभटितघण्टानुरणितम्।
बिसेनेव व्याप्तं नवनलिननालं सुचरितः
सगर्भायामे बिन्द्वावियुतममुं ध्यायति जनः।।13।।

कजेऽत्युष्णां (?) रम्भाकुसुममुकुलाभं हृदयगं
विपर्यस्तं ध्यात्वाऽष्टदलविलसत्कर्णिकमथ।
रविं सोमं वह्नि क्रमत इह विन्यस्य विकचे
स्मरन्तीमं केचिद्‌धुतवहमहामण्डलगतम्।।14।।

अथ पञ्चोपचारफलम्

त्वदर्च्चार्च्चायै यः सुसरिति झा (?) रे वा सरसि वा
जले यत्र क्वापि प्रकृतिसुभगः स्नाति पुरुषः।
स चित्रं यन्मज्जत्यमरललनावर्त्तुलघन-
स्तनालम्बो सक्तोप्यतरतरशृङ्गारजलधौ (?) ।।15।।

सचन्द्रश्रीखण्डद्रवभवसमालम्भसुभगां
करोति त्वन्मूर्त्तिं सजलजलदश्रीसचिव यः।
स मन्दं भ्राम्यद्भिर्मलयजरसार्द्रैर्निजतनौ
करैः स्वर्वेश्यानां भवति नियतं निर्वृततरः।।16।।

हरे श्रीमन्नीलोत्पलकलितमालाकुलगलं
विधत्ते मर्त्यस्त्वां निजजनकृपाले जगति यः।
स संक्रीडेन्नीलोत्पलदलदृशां श्यामरुचिभिः
कटाक्षैराक्षिप्ते तरणितनयापाथसि सुखी ।।17।।

नरो धोपैर्धूमैरतिसुरभिभिर्नीलयति चेत्
तव प्रासादान्तः स वदनमरेः श्यामलयति।
महानीलव्रातैर्विरचितविमानेऽपि रचय-
त्यसाचात्मानं .....मृगमदरुचारूषिततरम् ।।18।।

विराजद्भिर्नीराजनमनुविधत्ते तव जनः
प्रदीपैरापूर्णैर्यदि सुरभितैलेन सुदशैः।
भवेदेष प्रेष्यीभवदमरकोटीरनिकर-
स्फुरद्धीरत्विड्भिर्दिवि नियतनीराजितपदः।।19।।

घृताभ्यक्तैर्भक्तैर्मधुरिमधरैः पायसवरैः
ससूपैश्चापूपैर्दशति तव सौहित्यमिह यः।
स गीःपीयूषाद्यैर्लघुचुलकनात्कस्य तु मन-
स्यगस्त्योऽयं नेति प्रकटयसि (ति?) बुद्धिं स्वविषयाम् ।।20।।

पुरः पृष्ठे पार्श्वे दशसु च दिशासूपरि तथा
नमस्तुभ्यं तुभ्यं पुनरपि च तुभ्यं भवतु नः।
नमस्कुर्मः केभ्यस्त्वदितरसुरेभ्यो नरहरे
मनाक्त्वद्भ्रूवल्लिभ्रमणविरतेभ्यस्त्रिजगति।।21।।

अथ काशीगङ्गयोर्महिमा

मृतप्रायं कायं त्रिदशतटिनीनीरलुलितं
हरे विष्णो जिष्णो मुरनरकघातिन्निति शनैः।
वदन्तं दन्ताग्रस्थिततुलसिकं केशव कदा
मुदा द्रष्टास्मि श्रीपरिवृढसुनामाङ्कितमिमम्।।22।।

काशि नाशितमलासि वासिनामाशिषः प्रतिददासि पासि च।
राजराजसखराजधानिके न त्वयीदमतिचित्रमीश्वरि।।23।।

शिक्षिता न यदि खर्वगर्वता तर्हि पर्वतवदर्ववत् क्रमात् ।
मुक्तमार्दवलवः परिभ्रमन् किं समेति पुरभित्पुरं नरः।।24।।

मदङ्गं गङ्गे त्वं स्नपय पयसा तत्र कियती
भवित्र्यम्भोहानिस्तव वद वदान्ये जननि तत् ।
त्वया सिक्तो यज्ञावभृथमपि नेच्छामि जलदः
शिलाश्च ... क्षेत्राण्यपि च युगपत् प्लावयति हि।।25।।

वारिचारिशिशुमारशावकस्तीरनीरपतरुश्च तावकः।
द्वाविमावमृतपो (को ?) पहासिनौ जाह्नवीदृशमपीह मां कुरु।।26।।

निमज्जुन्नुन्मज्जन्मकरखरदंष्ट्राभिरभितो
विभिन्नश्छिन्नो वा करटकटुचञ्चूपुटहतः।
अये धन्यो धन्योऽयमिति वचसामेकविषयः
प्रवाहे जाह्नव्या भवति मृतकोऽन्यत्र न खलु।।27।।

तटिनी कटिनीतवल्कलेन भ्रमता स्वाङ्ममतामपास्य दूरात् ।
शुभदाशु कदा मयाप्स्यते सा बलिबन्धुर्बटुकस्य पादपाथः।।28।।
इति श्रीभट्टरामजिद्विरचितायां बुद्धिशुद्धौ प्रथमं वैमल्यम् ।।1।।

अथ भक्तिः

अस्तु वस्तुनि निरस्तसमस्तोपाधिनि स्वयमुपात्तविग्रहे।
मानसं स्थिरमानसमृद्धौ मामकं सपदि नन्दनन्दने।।1।।

सपदि यदि मुकुन्दे मानसं मानसम्पद् -
रहितमहितहन्तर्यस्ति निस्तीर्णदोषम् ।
कथमथ पथिकः स्यां संयमिन्या दमिन्याः
कथमतिथिरपि स्याद्रौरवं वा मदक्ष्णोः।।2।।

अकलि ललितवेशः केशवः क्लेशहन्ता
यदि हृदय ! किमन्यद् द्रष्टुमन्यत्र यासि।
सुरतरुमवधीर्याधीर्यदीच्छेद्बुबूलं
प्रकटविकटकण्टं स्यान्न कस्योपहास्यः।।3।।

कति कति न मतिर्मे माधव ! त्वद्वियुक्ता
भ्रमति विमतिमूले कर्कशे तर्कतन्त्रे ।
फलितमकलितस्यापार्थकं पार्थयन्त-
स्तुषकुशसिकतानां कण्डनेनैव तुल्यम् ।।4।।

न रसा विषयाकुलस्य ते स्युर्हृदये येऽच्युतभक्तिभारभाजः।
करटः कुरटन् मलावटस्थः किमवाप्नोति मरालबाललीलाम् ।।5।।

हसताऽपि सता पितस्त्वदीयं यदि नामाघविदारणं नरेण।
जगृहेऽजगृहेऽपि येन नूनं नरकं नैति स कङ्करङ्कजुष्टम् ।।6।।

श्यामतामरसदामवाम ते राम नाम जनकामदायकम् ।
निःसृतं यदि मुखाश्रुविस्तृतं तर्हि साधनमवाप बाधनम् ।।7।।

पुष्करं चरणपुष्करं हरेः सेतुरेतदुदितानुपालनम् ।
नैव मुक्तमविमुक्तमर्चनं त्यज्यतामपरतीर्थचर्चनम् ।।8।।

चरणौ करुणायतो हरेस्तरुणार्कारुणसत्तलाङ्गुली।
नखचन्द्रिकया करिष्यतो मम हृद्ध्वान्ततततेर्निकृन्तनम्।।9।।

बीजं मुक्तिलताततेर्जनमनः स्वाधीनतापादकं
चूर्णं भागवतैकचित्तमधुलिड्लेह्यः परागोऽपि च।
रुद्रेन्द्रादिसुराङ्गराग उपनन्दादेस्तु पिष्टातकः
श्रीनारायणपादरेणुनिवहो भूयान्मम श्रेयसे।।10।।

यदवध्यवलोकिताघहर्त्री पटली काऽपि घनस्य नूतनस्य।
यमुनोपवने पदा चरन्ती तदवध्युज्झति मां मनोमयूरः।।11।।

नन्दने न नवचन्दनेऽपि सा वन्दने तु रतिरस्ति या हरेः।
मन्दनेत्र यदि नेक्षसे हरिं कं दयालुमपरं श्रयिष्यसे।।12।।

अवनीधवनीतिरीतिमारादनुरीकृत्य निकृत्य किं गतोऽसि
विदुरस्य गृहान्महांस्तवायं निजभक्ते स्फुटलक्ष्यपक्षपातः।।13।।

सावज्ञमज्ञजनताजनतापदायि-
वाक्येषुभिः क्षुभितधीरपि नातपद्यः।
तं मन्य ईश भवभीशमलापहर्त्तुः
पादाम्बुजं तव तनुत्रवदावृणोति।।14।।

अथ कथामहिमा

निद्रया निशि दिवाप्यभद्रया वार्त्तया च परमार्त्तया धिया।
व्यग्रमग्रमधमेषु माधव त्वत्कथारतिरवत्ववद्यतः।।15।।

साधुरीतिरियमेव माधुरी नाधरीभवति यत्प्रतिक्षणम् ।
या धरीणतरनौर्भवोदधेर्माधवामृतकथारसोद्भवा।।16।।

मधु विधुतमसि त्वं खण्ड ते खण्डता स्तात्
सरक नकरमेव त्वं त्वमिक्षो क्षुरोऽसि।
अमृतमतृतमेवाम्र म्रियस्वाच्युतस्या-
नुपममधुरिमा यत्सङ्कथा कथ्यतेऽत्र।।17।।

ह्रदिनी ह्रदि कर्णकूपपद्या
पतयालुः सततं हरेः कथाख्या।
क्रथयिष्यति मूलतो विशालान्
किल सालान् मदनादिकान् जवेन।।18।।

अग्निः शीतं शीतभानुस्तु भानोस्तापं पाथो व्यर्थयत्येव वह्निम् ।
संसाराब्धेरौर्वभूतं हि तापं कृष्णस्यैका कीर्तिरुत्कृन्ततीह।।19।।

शिरः स्व (:) सरि (दृग?) ल्लकी तल्ललाटं
त्रिसामा श्रुतिः कृष्णवेणी च वर्णा-
द्वशौ (सौ) सूरपुत्री सरस्वत्यथो वाक्
नदी गोमती लोमपंक्तिस्तदीया।।20।।

करौ काशिका नासिका तापिका हृत् ह्रदः शोणनामोदरे वारिधिस्तु।
पदं सर्वतीर्थानि यस्या हरेः सा कथा सुन्दरी शर्मदाऽस्त्यस्तु लोके।।21।।

अथ वैराग्यम्

रूपकूपपतितं मम चक्षुर्गन्धिबन्धनमवाप च नासा।
स्पर्शकर्शिततरा किल मे त्वग् गह्वरं रसमुपैति च जिह्वा।।22।।

मच्छ्रुती रिपुरवश्रुतिरुग्णा मोहरोहधरणिर्मम चेतः
अक्षमाक्षगणविक्षतमित्थं मन्तुमन्तमपि माधव धाव।।23।।

कामिनीकरकवर्णविभ्रमल्लोचनं जनितशोचनं मम।
मोचनं नु जगतः परं हरिं वीक्ष्य वीक्ष्य करवै सुरोचनम् ।।24।।

हारिहेममणिमौक्तिकराशिः किं करिष्यति मरिष्यतो मम।
सञ्चिनोमि धनमीद (दृ?) शं कृशं स्यान्न यत्त्रुटति देहबन्धने।।25।।

अज निजवृजिनैरधः पतन्तं
तरणितनूजजनैरुपेत्य बद्धम् ।

मुखबिलविगलत्करालललालं
हरि हरि कालकराद् विमोचयेथाः।।26।।

कपिपिकशुककाककङ्ककोक-
श्वखरवराहवृकादिकाः कुयोनीः।
अभयद निजकर्मणाऽटतो मे
तव चरणस्मृतिरस्त्विययान् प्रसादः ।।27।।

रचना क्व च नाम न स्फुरत्यजया तेऽज यया विमोहिनी।
मयि विभ्रममभ्रभासुरस्थितमेषा हरतात्त्वदाश्रिते।।28।।

भ्रमताऽभिमतासु तासु तासु क्षणरुचिरासु चिरासु दुःखदासु।
रमणीषु मणीषु हारिणीषु स्वयमरिणेव विवञ्चितो मयात्मा ।।29।।

मेदोमांसवसास्थिकेशरुधिरत्वङ्मज्जपाञ्चालिका
रामा कामहतस्य ते प्रकुरुते किं क्षोभमाम्यन्तरम् ।
विश्वासोऽधममेव वस्यपि (?) न चेत् तस्या व्रणे वा क्षते
संजात (ते?) क्षरणे त्वमन्तरगतं द्रष्टासि यत् सौष्ठवम् ।।30।।

मुखं चन्द्रोऽनिद्रे कुवलयदले नेत्रयुगलं
कुचौ रौक्मौ कुम्भौ वदसि कदलीत्यूरुमपि च।
मुखं वान्तिं कुर्वत्स्फुटितमपि नेत्रं प्रपतितौ
कुचौ खञ्जं पाट्टं (दं ?) क्षिपसि विपरीतं किमखिलम् ।।31।।

ललति गलमलं ललन्तिकाभि-
र्विपुलदुकूलमलङ्करिष्णु कट्योः।

हरति नरमनः सहंसकोऽ (ङ्)घ्रिः
सहजगुणः क इवास्ति मूढ नार्याम् ।।32।।

यदि न मे दिनमेकमपि स्थिरा तनुरुरुक्रम रुक्क्रमजर्जरा।
चलदलीयदलाम्बुचला कथं स्थितिमुपैत्यमला कमलालया।।33।।

कलयता लयमाकमलालयात् स्थिरतरः कतरो भवतेक्षितः।
अचिररुक्चलजीवित जीवताचिरमयं रमयन् हरिरिल्यताम् (?)।।34।।

कमलकोमल कोमल एष मे हृदि लसतयलसस्य रमापते।
न गणयामि विकर्मणि यद्वशः श्रुतियशःस्वजनुःस्वजनुर्गणम् ।।35।।

भस्म न स्म तव वर्ष्म भावि चेत् तस्य विटत्वमिति चेन्न कीटता।
अर्थमर्थयसि किं तदर्थतश्चीयतां न सकलः प्रदीयताम् ।।36।।

विलम्ब्यालमुलङ्घ्य बालस्वभावं हृदि श्रीहरिं हारवद्धारयन्तु।
जनुर्मानुषं क्वानुषङ्गं ततः स्त्रीसुतश्रीसुहृद्देहगेहे त्यजन्तु।।37।।

वरं मर्क्कटः कक्कटः कुक्कुटोऽश्व-
स्तथा श्वापि विश्वेशितर्निर्विवेकः।
परं धिङ् नरं यो हरे त्वां विजानन्
न सेवेत चेतः क्षिपन्नैन्द्रियेषु ।।38।।

मदान्धोद्धुराः सिन्धुरा सिन्धुरङ्ग-
तरङ्गा इव द्वारि तुङ्गास्तुरङ्गाः।
सहेलामहेलाश्वपुत्रारिपुत्राः
ससङ्कल्पभक्तस्य विष्णोस्तदल्पम् (?) ।।39।।

अभद्रविद्रावितधर्मनिद्रादनव्यवायास्तु शुनोऽपि सन्ति।
वरं नरत्वं समवाप्य कापि श्रियः पतेः किं क्रियते न पूजा।।40।।

अक्षाणि क्षपयन्ति मङ्क्षु निखिलं धैर्यं रुणद्धयेकिका
तृष्णा यत् रघुवीर नीरसरसाद् व्यासङ्गभङ्गं कुरु ।।41।।

गत्वरं तव भवैकजित्वरं सत्वरं नरवपुः प्रसृत्वरम् ।
दैन्यमद्य यमसैन्यमित्वरं तद्भजान्तसहकृत्वरं हरिम् ।।42।।

अथ ज्ञानम्

एकतोऽग्निरितरत्र जन्तवस्तत्परत्र मलमूत्रयन्त्रणा।
गर्भगेहगतदेहिनः सुखं कुत्र पाशितपतत्रिवत्सतः।।43।।

बालता कलितकालसाध्वसा साध्वसाधु विविनक्ति नैव या।
व्याधिबाधिततनोर्नरस्य सा याति मातृपितृपार्श्ववर्तिनः।।44।।

अभ्रवद् भ्रमति धीर्युवतायां तत्र तत्र धनपुत्रकलत्रे।
तां विहारहरिणो हरिणाक्ष्याः पक्ष्ममारुतधुतः समुज्झति ।।45।।

कम्पकार्श्यपलितश्वसितादीन् जृम्भयत्यथ जरादिविकारान् ।
मृत्युमाह्वयति मङ्क्षु स चापि श्येनपातमभिपत्य हिनस्ति ।।46।।

घूर्णितोऽपि विषयैर्विषतुल्यैश्चूर्णितोऽप्यशनिनेव सुदुःखैः।
वागुरामिव मृगो निजनष्ट्यै सप्रपञ्चमवशोऽञ्चति मर्त्यः।।47।।

तरौ शकुन्ता इव चैत्यजाते (?) पान्थाः प्रपायामिव सम्मिलन्तः।
मेघा इवाकाशपथे क्षणेन स्वकर्मणा लोकगणा भ्रमन्ति ।।48।।

रज्जौ भुजङ्गो रजतं शुक्तिकायां
मरीचिकायामिव वारिधी (धि) र्यथा।
मुखं यथाऽऽदर्शतले तथा परे
ब्रह्मण्यपीदं त्रिजगद् विकल्पितम् ।।49।।

हृष्यन्तस्तनयधनाद्यवेक्षणेन
क्षुद्राक्षक्षपिततरा नरा भ्रमन्तः।
मज्जन्तो मरुजमरीचिकासु मिथ्या
ब्रह्माख्यं ह्रदमवशा विशन्ति नैते ।।50।।

निधायासनं खानि बुद्ध्या पिधाय-
प्रधानानिलं चात्मवश्यं विधाय।
धियं ध्येयमूर्तौ समाधाय धन्या
न मन्यन्त एतत् परब्रह्मतोऽन्यत् ।।51।।

शुद्धं शान्तं नित्यमेकं निरीहं
सत्याद्वैतं निर्विकारं यदाद्यम् ।
शश्वत्कूटस्थाय्यवस्थाविमुक्तं
तद् ब्रह्माहं मंक्षु साक्षात् प्रपद्ये ।।52।।

इति श्रीभट्टरामजिद्विरचितायां बुद्धिशुद्धौ भवत्यादिवर्णनं नाम द्वितीयं वैमल्यम् ।।2।।

अथादृष्टबलम्

दैव कैव गणनास्ति मादृशि त्वादृशां दशमुखोऽपि येन सः।
मृत्युमारुतनिरन्तरोच्छलच्छीर्णपर्णकणतामवापितः।।1।।

दैव नैव भवतः परो रिपुः कोऽपि सोऽपि पृथिवीपतिः पुरा।
वीरसेनतनयस्त्वया रयाद् भ्रामितोऽभ्रमि च वायुना वनम् ।।2।।

तल्प एव सुखसुप्त उज्झति स्वानसून् नर इहापरः पुनः।
जीवति स्वधितिनापि ताडितस्तत्र कर्म निजमेव वर्मति।।3।।
सावकाशशिबिकाधिशयालुं भूमिपालमपरे भयभाजः।
संवहन्ति यदि दैव तदैव ज्ञातवाम्यमसि साम्यविरोधिन् ।।4।।

दृष्टो न दिष्टविभवो भवता यदेनं
श्वानं वहन्ति शिबिकामधिरोप्य वाहाः।
दक्षोऽधिशिक्षितजनोऽपि जनो विपक्ष
दैवो निरैक्ष्यत न कैर्भुवि भैक्ष्यवृत्तिः।।5।।

अथ कालबलम्

कृतान्तोद्गतातङ्कपङ्के निमग्नः
परार्द्धद्वयायुः क्षणार्द्धं न शर्म।
विरञ्चिश्चिरं चिन्तयन् यत्समागात्
परं कः करालात्तु कालात्र भीतः ।।6।।

असौ प्रकाशीकृतलोकराशि-
र्विधिर्विनाशो यदि तर्हि साशीः।

कोऽस्त्यत्र लोके क्रियतां न शोके
मनः स्वनाशेऽपि मृते च तोके ।।7।।

एतन्मूलमिदं प्रवृद्धमितरद्वृद्ध्यैधते मे धनं
भूयो वर्द्धयितास्मि काकिणिकयाप्यूनं विधास्ये न च।
इत्याशारशनोपबद्धमनसं श्येनः कपोतं यथा
कालः कालयति क्षणाद् घनधनव्यग्रं समग्रं जनम् ।।8।।

नलिनीदलजलतरलं क्षणरुचिरुचिरं शरद्घनप्रायम् ।
आयुर्मा युवतीजनधनसुतसङ्गाद् वृथा यातु ।।9।।

अथ विप्राणां कलिकृतदुर्दशा

ललाटार्द्धचन्द्रैर्नृपाणां यदीयं मुदाऽपूजि पूर्वं लसत्पादपीठम् ।
नृपाणां तु तेषां नृहस्तार्द्धचन्द्रैरहो धिग्गलं मर्द्यते घार्घ ते र्द्य? च।।10।।

पूजनाय पुरुषाननुयातान् सूनचन्दनकरान्न ययुर्ये।
ते तिरस्कृतिपरान् धृतयष्टीन् यान्ति याचनकृतः क्षितिदेवाः ।।11।।

सूक्तिमौक्तिकमयीं कमनीयां सत्स्रजं ससृजिरे जगतीशाः।
यत्र तत्र विपदं द्विजचक्रे चर्क्रतीह खलगीर्गणबाणाः ।।12।।

पर्यभू (द्) द्विजजनो निजसेवामादिशन् कृतयुगे तु किलास्मान् ।
रोषितैरिव ततोऽवरवर्णैर्योज्यते द्विजजनोऽधमकृत्ये ।।13।।

धिक्कलिं सकलकालकल्मषं त्रस्यतेऽद्य वृषलादपि विप्रैः।
वाजिवारणगतस्य तस्य तैर्गम्यतेऽपि पुरतो विधृतास्त्रैः ।।14।।

अथ दुर्जनचेष्टा

वचनरचनां मृद्वीं मृद्वीकया तुलितामलं
कलयति खलः काले द्रुह्यत्यथापि निरागसे।
मधुरिमधरं गीतं गायन् मृगाय यथा वृथा
मृगयुरिह सत्कोशच्छन्नावसी इव ताविमौ ।।15।।

यदि दुर्जनजनजिह्वा प्रह्वा न स्यात् परापवादेषु।
उत्करमघौघजन्यं काऽन्या मार्जन्यपामृज्यात् ।।16।।

अपवादवदावदः परस्य स्फुटमात्मानमपि स्तुवन् स्वकृत्या।
चरितैः स्वयमात्मनः किलान्यं जनकं दुर्ज्जन एष आह दुष्टः ।।17।।

येन कर्णान्तनिर्मुक्तो गीःशरो धातुसप्तकम् ।
संशोषयत्याशु नृणामस्त्वेष खलताखलः ।।18।।

श्रुतिरत्नशतैश्चितोऽपि भीत्यै
न खलः स्या (न) मणियुक्फणीव कस्य।
मधुराण्यपि तद्वचांस्यकाले
कुसुमानीव भयं न किं नयन्ति ।।19।।

अथ स्त्रीनिन्दा

कोपन्यक्कृतकृष्णपृदाकुः क्वचन च मिथ्यारचितसुकाकुः।
अनुकृततृणपुञ्जावृतकूपा क्वचिदग्निः क्वचिदुदकसरूपा ।।20।।

मनसा ध्यायत्यन्यं पुरुषं पश्यत्यक्ष्णेतरमपि सुरसम् ।
वाचा परमप्युररीकुरुते योषित्यत्र मनः किं नर ते ।।21।।

चन्द्रतिरस्कृतिचतुरं वदनं वाचश्चामृतमधुरिमसदनम् ।
हृदयं जितकर्तरिकाधारं तां कान्तां को मनुते सारम् ।।22।।

भर्त्ता भ्राता जनकः पुत्रः प्रेष्ठो नासामपरः कुत्र ।
ईषत्स्वार्थे सर्वान् घ्नन्त्यस्ता एता जनबन्धनतन्त्यः ।।23।।

क्षुरतैक्ष्ण्यं चपलाचाञ्चल्यं दाहकतामप्यादायाग्नेः।
या स्त्री विधिना घटिता तस्यां तव किं मूढासक्तिर्जज्ञे ।।24।।

भ्रमयति रमयति मदयत्यदयं
वञ्चयति प्रतिमोहयति च या।
हसति श्वसिति विरौति विरोदिति
वामा रामा किन्तु न कुरुते।।25।।

अथ पुत्रवर्णनम्

अमुत्र कुत्र पुत्रता य आज्ञयाऽग्निवत्पितुः।
हृदि ज्वलत्यलं स लम्पटो विटो नटो यथा।।
तातध्यातकरः श्रेष्ठः प्रोक्तोद्यक्तस्तु मध्यमः।
अद्धाऽश्रद्धोऽधमः पुत्रोऽकर्ता वाचः पितुस्तु विट् ।।26।।

उदरम्भरिरेव यःसुतः सति वित्ते पितरौ न सेवते।
स तु पापविपूरितोदरो नरकान्ते समुपैति सर्पताम् ।।27।।

अकृत्वा पोषणं पित्रोर्मासं पुष्णाति यन्निजम् ।
सुतो दूता यमस्यान्ते खादयन्ति तदेव तम् ।।28।।

इति श्रीभट्टरामजिद्विरचितायां बुद्धिशुद्धौ दैवादिवर्णनं नाम तृतीयं वैमल्यम् ।।3।।

अथ तृष्णालोभौ

अन्तं दन्ततितिर्गता श्रुतिरिता नाशं करौ कृणितौ
चक्षुः प्रक्षुभितं मतिर्व्विरतिमत्यासीद् वलीमद् वपुः।
शौक्ल्यं शीर्षाणि नो पदात् प्रचलतः पादौ पदं श्रीपते !
तृष्णा कृष्णभुजङ्गिकेव शरणे शून्ये वसत्येकिका ।।1।।

क्व सर्वे गर्वेणापिहितमतयो दैत्यपतयो
गता रक्षःपक्षः क्व च विचलितश्चालितसुरः।
अतन्द्राः क्षोणीन्द्राः क्षपितरिपवः क्वापि पतिता-
स्तथाप्याशापाशः कृशयति भृशं माममृदुलः ।।2।।

खड्गायतेऽपि श्रीखण्डो माला ज्वालायते तथा।
शरायन्ते गिरः स्निग्धा लुब्धानामर्पणं विना।।3।।

लोहद्वयादापि पयोद्वयादा तथैव चोदुम्बरयोर्द्वयादा।
प्रगृह्णतां लोभवतां नराणां लोकद्वये नास्ति तथादरः किम् ।।4।।

लोभक्षोभदभीभवं (?) विभवता भूतानि भूतादिभिः
क्रान्तानीव यतो वदन्ति विधनं श्रीदं जडं पण्डितम्
नीरूपं स्मरसुन्दरं हतभगांस्त्रीमप्यथाब्जालया-
मल्पाशाविवशानि दुर्भरकृते दीनानि हीनानि च ।।5।।

सरः सरस्वान् शिखरी शिलालघुमहासरित्सारणिका सुदारुणम् ।
वनं वनी सर्वत आशु धावतां भयं न लोभादवगच्छतां नृणाम् ।।6।।

धनधनञ्जयधूमितचेतसः प्रमदमानमतङ्गजमास्थिताः
कति जनार्दन नार्दनमादधुर्मयि खलाः खलु लोभभराकुले ।।7।।

अथ कामः

कामधामपरिधूमिधाम्नि स्वान्त आन्तरविकारविदीर्णे।
चीर्णपुण्यनिचयैः सुनिचेयाः किं स्थितिं गुरुगिरः प्रभजन्ते ।।8।।

रतिपतिकृतीं कं कं लोकं न कम्पितवान् विधिं
व्यथित तनयाभीकं भिल्ली भवः समभावयत् ।
शिशिरकिरणस्तारामाराज्जहार गुरोः प्रियां
सुरपरिवृढोऽहि (इ?) ल्यां कल्यां रतावभजद् रहः ।।9।।

कटाक्षप्रक्षेपक्षपितहृदयो दुर्युवतिभि-
स्तदाप्त्याशापाशैः सित इव ततो नापसरति।
कुलं कीर्तिं लज्जां निजचरितमप्युज्झति यतो-
(ऽ) खिलो लोकः सोऽयं मदनमहिमा दत्तजडिमा ।।10।।

यतिवनिगृहिवर्णिनोऽपि वर्णान्
धनपतिनिःस्वनिरक्षरज्ञलोकान् ।
पशुपशकुनिवराककीटकूटा-
नपि वशयत्यतुलः प्रसूनधन्वा ।।11।।

स्नुषायामम्बायां स्वसरि गुरुपत्न्यां दुहितरि
प्रवर्तन्तेऽगम्यास्वपि च मदनस्पृष्टमनसः।
यशोऽधीतिं कुल्याचरणमपि मंक्षु त्यजति यत्
निदानं तत्र श्रीरतिपतिरतीवोद्धुरतरः।।12।।

यस्याप्यास्यं सवनवितततौ सौमसौरभ्यगर्भं
स्वादुङ्कारं विदशति पुरोडाशशेन् स शिष्टः।
स्वैरिण्यास्यात् पिबति सरकं पानपात्रादिवास्याद्
दन्तैरन्तर्दशनवसनं दंशदायी स्मरात् स्यात् ।।13।।

स्रष्टारस्त्रिभुवनमण्डलस्य सम्यक्
द्रष्टारो विहितनिषद्धवर्त्मनां ये।
तेऽपि स्त्रीभृकुटितटीनटैः कटाक्षै-
राक्षिप्ताः कति पतिता न सन्ति लोके ।।14।।

कलिताखिलशास्त्रमस्तवैरं नरमुच्चैर्मननादिशुद्धबुद्धिम् ।
अवधीरितदेहगेहमाराद् वशयत्येष विजित्वरः स्मरोऽसौ ।।15।।

अथ क्रोधः

कटत् कटिति दन्ततः सुतसुतेति निःश्वासतः
स्वनो भवति नृत्यतोऽपि च ललाटपट्टे भ्रुवौ।
रुषा तु जनलोचनद्वितयमेतदेति द्रुतं
जपाकुसुमतुल्यतां तनुरपि स्फुटं वेपते ।।16।।

विकटभ्रुकुटीतटः कटूनि
स्फुटमेवौष्ठपुटात् पठन् पटूनि।
भ्रमयन् रयतो भुजाभुजङ्गी
गणयेत् को नु गुरून् सुरांश्च रुष्टः ।।17।।

क्रोध बोधहर नो धरातले त्वादृशोऽस्ति खलु कोऽपि किल्विषी।
आत्मजो जनकमग्रजं लघुर्लाघवं नयति यन्त्रियन्त्रितः ।।18।।

प्रथयन् पृथुवेपथुं वृथाऽयं
रचयन् लोचनकोणशोणताञ्च।
दशनध्वनिमादिशंश्च कोपः
किमु मृत्युर्मदिरामदोऽथवा किम् ।।19।।

अथ शोकः

तरवारितैव्यविषमाग्निशिखे
विषधारिवृश्चिकविषे च नरम् ।
न तथा समाकुलयतो हि यथा
सुतवित्तनाशजनिते तु शुचौ ।।20।।

तनुतानवमातनोति शोको लघयत्याशु मतिं स्मृतिं छिनत्ति।
अपि मृष्टरसान्नभोजिनो नुः कुरुते भस्मकवद्वृथाभुजिं ताम् ।।21।।

उपदेशकथोदबिन्दवः पतिता (:) शुकुज्वलनाकुले हृदि।
पयसः पृषता इवायसेऽनलतप्ते विलयं व्रजन्ति हि ।।22।।

शोकानलज्वाल्यमानं वपुरश्रु प्रमुञ्जति।
आर्द्रं दार्विव रसं ज्वलनज्वलदुज्ज्वलम् ।।23।।

अथ कदर्यः

लोकतर्जितः कदर्यवर्य ते दानवर्जितमिहार्जितं वृथा।
बद्धमुष्टिरसि लुब्ध तत्र चेत् सत्करोषि किमु नात्मनस्तनुम् ।।24।।

तृणतूलरजःकणैः कदर्यं गणयेत् को नु परोपकारशीलैः।
वपुषा वचसा धियापि नान्यानुपकुर्वन्तममुं पुनः पुनर्धिक् ।।25।।

नलिननिलया गेहे गुप्ता स्वयं प्रतिभासते
न तु नरवचस्येतादृक्षे क्षमो महदादरः।
अवटघटितस्वर्णौघस्याप्यहो कृपणस्य यत्
वदति वदनस्थायी नैव श्रियं किल कालिमा ।।26।।

अथ दरिद्रः

न पतिं पतिरिति युवतिर्न सुतः पितरं पितेति वा ब्रूते।
एतावाप्यपलपतो यद्यश्रीकं कथं नान्ये ।।27।।

चक्षुष्मानप्यन्धो बधिरो विधुरोऽपि कर्णदोषेण।
वाचा न्यक्कृतवाचस्पतिरपि मूको दरिद्रोऽयम् ।।28।।

श्रैनाथिर्नाथितानन्तपदद्वन्द्वो द्वन्द्ववर्जितः।
चक्रे चक्रधरप्रीत्यै बुद्धिशुद्धिं नु रामजित् ।।29।।

इति श्रीमद्भट्टरामजिद्विरचितायां बुद्धिशुद्धौ लोभादिवर्णनं नाम चतुर्थं वैमल्यम् ।।4।।

बृहस्पतिसमो वक्ता बुद्ध्या च कविना समः।
लिखन् विमुह्यते सोऽपि किम्पुनश्चाल्पबुद्धयः।।
नारायणराम श्रीमाल्लि ब्राह्मणि परोपकाराय ल्यक्षते।।

वैमल्यः (म्) प्रथमं 28, द्वितीयं 52, तृतीयं 28, चतुर्थं 29, एकत्र 137, संवत्-1653, वर्षे अश्वनवदि बुधे। जगन्नाथके लवितुं श्रीमाली। श्रीरस्तु।

□□□

To Our Contributors

The Rashtriya Sanskrit Sansthan, Ganganatha Jha Campus, Allahabad (formerly Ganganatha Jha Research Institute till 1973 and Ganganatha Jha Kendriya Sanskrit Vidyapeetha till 2002) under the Ministry of HRD, Government of India, was founded on November 1, 1943 in the memory of Mm. Dr. Sir Ganganatha Jha, one of the greatest Orientalists of India. From the very beginning, a number of Indologists and erudite scholars of eminence like Mm. Dr. Gopinatha Kaviraj, Dr. Ishwari Prasad, Mm. Dr. Umesh Mishra, Pt. Kshetresh Chandra Chattopadhyaya and others have been closely associated with this Research Institute which has been conducting higher research in Indology and publishing a research journal of International repute on Sanskrit and Indological subjects since its inception. The Research Journal, in addition to the research papers written by eminent scholars from all over the world, also contains sections on short communications, critical editions of short original Sanskrit texts and reviews of books concerning Indology.

We welcome your kind and invaluable cooperation in the form of your research papers and reviews written either in English or in Hindi or in Sanskrit Languages. The papers must give an evidence of research by discovery of new facts or by that of new interpretation or relationship of known facts and must not be parts or chapters of theses. They should be brief and completely ready for the press with an abstract of maximum 200 words. The abstract should be either in Sanskrit or in English. But the language should be other than the language in which the paper is written.

The research papers should be computerized (either in Unicode or Kruti-Dev-10 or in APS Fonts), fully corrected and complete from all aspects with notes and references at the end of the paper numbered consecutively. The writers are requested to follow the standard system of presentation and transliteration. The titles of the books and journals as well as important Sanskrit or non-English words or quotations written in Roman script should be in italic and properly marked with diacritical signs. Titles, authors and places of publications or editions of books and journals referred to for the first time in the paper should be given in full and thereafter, their abbreviations should be used. The postal address of the author with phone No. and email ID should be given at the end of the papers with a brief self-introduction if possible.

The contributors will get 25 off-prints of their research papers and one author-copy of the journal. The decision of the Editorial Board is final with regard to the publication of the Research papers.

The papers are preferred by Email or in CD composed in desired fonts along with a hard copy.

Editor

Under the Auspices of the Ministry Of Human Resource Development Government Of India

राष्ट्रिय-संस्कृत-संस्थानम्

गङ्गानाथ-झा-परिसरः

चन्द्रशेखर-आजादोद्यानम्

प्रयागः -211002